व्यासयतिः (व्यासतीर्थः)

He was the founder of the Vyāsarāya matha and died in 1539.

(Aufrecht).

34

Acc No.
34

क्रम-संख्या 34

ग्रन्थ-नाम न्यायामृतम्

ग्रन्थकर्त्ता व्यासपति

विषय न्यायशास्त्र

लिपि देवनागरी

पत्र-संख्या २८४

पत्र-प्रमाण २८.३ × १२.१ मि० मि०

पंक्तियां १२

अक्षर ५१

पाठ-संख्या ७२२८

पूर्ण/अपूर्ण

प्रारम्भ :—

Acc. No.
35

संख्या ६१

१०६ प्रथमपरिच्छेदः १७३ पर्य्यन्ता द्वितीयः।

१८५ तृतीयः शेषं चतुर्थः। संख्या ०९

संख्या १२

॥ न्यायांमृतम् पत्र १९४॥

न्यायाº
१
श्रीगणेशायनमः॥ श्रीगोपालायनमः॥ निखिलगुणनिकायंनित्यनिर्धूतहेयंप्रभुमतममतिमेयंप्रबुद्धसौख्याम्बुपा
यांसकलनिगमगेयंसर्वशब्दाभिधेयंनवजलधरकायंनौमिलक्ष्मीसहायं॥१॥ विघ्नौघवारणंसत्याशेषविश्वस्यका
रणं।करुणासिंधुमानंदतीर्थवंद्यमहंभजे॥२॥ अभ्रमंभंगरहितमजडंविमलंसदा॥ आनंदतीर्थमतुलंभजेतापत्र
यापहं॥३॥ चित्रैःपदैश्चगंभीरैर्वाक्यैर्मानैरखंडितैः॥ गुरुभावंव्यंजयंतीभातिश्रीजयतीर्थवाक्॥४॥ समुत्सार्यतमस्तोमं
सन्मार्गंसंप्रकाश्यच॥ सदाविष्णुपदासक्तंसेवेब्रह्मण्यभास्करं॥५॥ ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः॥ लक्ष्मी
नारायणमुनीन्वंदेविद्यागुरून्मम॥६॥ श्रीमध्वशास्त्रदुग्धाब्धिंधीमंदरमहीभृता॥ आमथ्योध्रियतेन्यायामृतंविबुध
तृप्तये॥७॥ विक्षिप्तसंग्रहात्क्वापिक्वाप्युक्तस्योपपादनात्॥ अनुक्तकथनात्क्वापिसफलोयंश्रमोमम॥८॥ ननुमिथ्यैव दु
[illegible] विश्वं॥ तथाहितत्रविप्रतिपत्तिः॥ ब्रह्मप्रमान्येनवासप्रकारकेणवाअबाध्यत्वेसत्यसद्विलक्षणंसविभ्रमान्यत्॥ प्रतिप
न्नोपाधौत्रैकालिकनिषेधप्रतियोगिनवा। पारमार्थिकत्वाकारेणनिषेधप्रतियोगिनवा। अखंडार्थनिष्ठवेदां
तजन्यनिष्प्रकारकब्रह्मप्रमाबाध्यमपिविश्वंब्रह्मप्रमान्येनवासप्रकारकेणवानबाध्यमितिनाप्राप्यासिद्धिः॥ एवमु राम
त्तरत्रापिपूर्वोत्तरपक्षानुमानश्रुतिषुसंकल्प्यविप्रतिपत्तिरूह्या॥ इदंचविप्रतिपत्तिप्रदर्शनंतार्किकरीत्यैव ननु १
वस्तुतस्तत्पक्षेपिविप्रतिपत्तिवाक्यस्यपक्षपरिग्रहैकफलकत्वात्। तस्यचकथावाह्येननिग्रहानर्हेणलौकिकरीत्या

नुसारिणा संस्कृतरूपेण वा मया प्रपंचमिथ्यात्वं साध्यत इति वादिवाक्येन वा त्वया प्रपंचमिथ्यात्वं साध्यमिति मध्यस्थकल्पितविप्रपत्ती
कारेण वा सिद्धौ प्रतिज्ञातिरिक्तस्य कुसृष्टियुक्तस्य विप्रतिपत्तिवाक्यस्य वैयर्थ्यात्॥ न च मध्यस्थोपस्थित्यर्थं तत्। प्रतिज्ञयैव तत्सिद्धेः॥ न च
पक्षत्वप्रयोजकसंशयार्थं तत्॥ वादिप्रतिवादिनोः प्राश्निकानां च निश्चयवत्वेन तदयोगात्॥ आहार्यसंशयस्य चातिप्रसंगेन पक्ष
त्वाप्रयोजकत्वात् विप्रतिपत्तिवाक्यात्तदपेक्षत्वाच्च॥ संशयं विनापि सिसाधयिषाविरहसहकृतसाधकप्रमाणाभावत्वरूपस्य पक्ष
त्वस्य संभवाच्च॥ प्रमाणं त्वत्रानुमानं। विमतं मिथ्या दृश्यत्वात्॥ जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवदित्यानंदबोधोक्तेः॥ अयं पटः
एतत्तंतुनिष्ठात्यंताभावप्रतियोगी पटत्वात् अंशित्वाच्च पटांतरवदिति तत्त्वप्रदीपोक्तेः॥ यद्यपि विमतिरपि नियतविषयत्वापावच्छेदकसा
पेक्षा॥ तथापि सावयवत्वसाधितेन कार्यत्वेन पृथिव्याः सकर्तृकत्वसाधनेमिव सुनियामकनियतयालक्ष्यविप्रतिपत्त्या पक्षतावच्छेदेन विरुद्धः॥
द्धादृष्टी सत्यमिथ्या वा जलं सत्वमिथ्यात्वेयननुगतधर्माश्रया अनुगता विमतिपत्तिः पक्षतावच्छेदिका॥ यद्यपि विमतिः समयबंधादिना
व्यवहितत्वान्नानुमानकालेऽस्ति तथापि सैवोपलक्षणतया तत्तत्तां वा विशेषणतया पक्षतावच्छेदकमस्तु॥ अत एव विमतमित्येव प्रा
चां प्रयोगः॥ न तु वियदादीत्येव पक्षनिर्देशः॥ अवच्छेदकाभावे असंकुचितेनादिशब्देनात्मादेरपि ग्रहणापातात्॥ नापि प्रपंच इत्येव पक्ष
निर्देशः॥ प्रपंचशब्देन वियदाद्यन्यतमस्य अनुदायोक्तौ वियदादिमिथ्यात्वासिद्धेः॥ वियदादीनामेवोक्तावववच्छेदकाभावेनोक्तदोषात्॥ नापि
वियदादीत्येव पक्षनिर्देशः। घटादिरिक्तपक्षतुल्य इति वाच्यं॥ पश्चादन्यत्र निश्चितसाध्याभाववति हेतुसंदेह इव निश्चितहेतुमति साध्यसं
देहेपि संदिग्धानैकांत्यात् इति तत्प्रत्यविषयेपि घटे स्वार्थानुमानानुगतस्य साधकबाधकप्रमाणविरहरूपपक्षत्वस्य सत्वेप्येवं पक्षनिर्दे

न्याय॰ २ णस्य घटादिसाधारणविप्रतिपत्त्यनानुगुण्याच्चाविप्रतिपत्तौ तु न विमतिर्धर्मितावच्छेदिका आत्माश्रयात्। नवीनास्तु। एतत्पटात्यंताभावः
एतत्तंतुनिष्ठः एतत्पटानाद्यभावत्वात् एतत्पटान्योन्याभाववत् तंतुनाशजन्यस्य पटनाशस्य तंत्वग्रवृत्तित्वादनादीति विशेषणं। विमतं वा ब्र
ह्मप्रमान्येनेत्यादि विप्रतिपत्तिवाक्योक्तविशेषणत्रयवत्त्वे सत्यव्याप्यवृत्तित्वानधिकरणं वा स्वसमानाधिकरणात्यंताभावप्रतियोगि।
अनात्मत्वात् संयोगवत्॥ अत्र च पक्षधर्मताबलान्मिथ्यात्वसिद्धिः॥ विमतं नित्यद्रव्यान्यतरकेवलान्वय्यत्यंताभावप्रतियोगि। पदा
र्थत्वात् नित्यद्रव्यवत्॥ तार्किकमते नित्यद्रव्याणामवृत्तित्वेन तदत्यंताभावः केवलान्वयीति न दृष्टांतः साध्यविकलः। अत एव नात्म
नि व्यभिचारः मिथ्यात्वसिद्धिस्तु पक्षधर्मताबलात्॥ आत्मत्वावच्छिन्नधर्मिताको भेदो न परमार्थसत्प्रतियोगिकः। अनात्ममात्रप्रति
योगिकत्वात् शुक्तिरूप्यप्रतियोगिकभेदवदित्याहुः॥ मिथ्यात्वं च मृद्यपि नात्यंतासत्त्वमपसिद्धांतात्॥ नाप्यनिर्वाच्यत्वमप्रसिद्धेः॥ नापि
सद्विविक्तत्वं। सतोपि सदंतरविविक्तत्वात्॥ नापि सत्त्वानधिकरणत्वं निर्धर्मके ब्रह्मण्यपि तत्सत्त्वात्। न च निर्धर्मकत्वादेव तत्र सत्त्वा
नधिकरणत्वमपि नेति वाच्यं। निर्धर्मकत्वरूपहेतोः सत्त्वानधिकरणत्वाभावरूपसाध्यस्य च भावाभावाभ्यां व्याघातेनाभावरूपधर्म
निषेधायोगात्॥ अन्यथा असत्त्वानधिकरणत्वस्यापि तत्राभावेन तद्व्यावृत्त्यर्थं अनिर्वाच्यलक्षणे सत्त्वानधिकरणत्वरूपविशेषणा
योगात्॥ न च प्रमित्यविषयत्वं मिथ्यात्वं ब्रह्मानुवेदांतजन्यवृत्तिव्याप्यमिति वाच्यं॥ शुक्तिरूप्यादेरपि व्यवसायद्वारानुव्यवसायप्र
तिसाक्षाच्च बाधकज्ञानं प्रति निषेध्यत्वेन विषयत्वात्॥ सत्त्वप्रकारकप्रमाप्रतिसाक्षाद्विषयत्वं चेदाव[illegible]स्यकत्वात् सत्त्वाभाव एव मिथ्या राम
स्यात्। नापि भ्रांतिविषयत्वं॥ ब्रह्मणोप्यधिष्ठानत्वेन तद्विषयत्वात्॥ भ्रांतिमात्रविषयत्वस्य चोक्तरीत्या शुक्तिरूप्यादावभावात्॥ २

अध्यस्ततया भ्रांतिविषयत्वं चेद्विशेष्यवैयर्थ्यात॥ विशेषणमात्रस्य च निरुच्यमानमिथ्यात्वानतिरेकात॥ नापि बाध्यत्वं॥ तद्धि न ता
वदन्यथा विज्ञातस्य सम्यग्विज्ञातत्वं॥ मिथ्यात्वलक्षणे कल्पादिविज्ञातस्य प्रपंचस्य सत्यत्वस्थापित्वादिनाविज्ञातत्वेन सिद्धसाधनात॥
नापि बाधकज्ञानविषयं॥ ब्रह्म एवेति व्याप्तेः॥ नापि नास्ति नासीन्न भविष्यतीति बोध्यमानाभावप्रतियोगित्वेन तद्विषयत्वं॥ मन्म
ते आपणस्थरूप्यस्यैव तत्प्रतियोगित्वात॥ नापि ज्ञाननिवर्त्यत्वं॥ उत्तरज्ञाननिवर्त्यपूर्वज्ञानादाविव सत्वेप्युपपत्तेः॥ नापि
स्वसमानाधिकरणात्यंताभावप्रतियोगित्वं मिथ्यात्वं॥ अव्याप्यवृत्तिसंयोगादेरिव सत्वेप्युपपत्तेः॥ नाप्यव्याप्यवृत्तित्वानाश्रयस्वसमा
नाधिकरणात्यंताभावप्रतियोगित्वं॥ आरोपितस्य संयोगस्यात्यंताभाववत्त्वेनारोपितस्य संयोगस्यात्यंताभावादन्यएवव्याप्यवृत्ति
रिति वाच्यं॥ शुक्तिरूप्यादौ तदभावादित्युक्तत्वात॥ नाप्यविद्यातत्कार्ययोरन्यतरत्वं॥ अनादौ जीवब्रह्मविभागादावव्याप्तेः॥ प
क्षांतरे अज्ञानस्य तत्कार्यभ्रांत्यादेश्च सत्वेनार्थांतराच्च॥ शुक्तिरूप्यादावनिर्वाच्याविद्याकार्यत्वस्य प्रतिवाद्यसंमतेश्च॥ तथापि
मिथ्याशब्दो निर्वाच्यवचन इति पंचपादिकारीत्या सदसत्वानधिकरणत्वरूपानिर्वाच्यत्वं मिथ्यात्वं॥ तत्र सिद्धिश्चख्यातिवा
देव दूष्यते॥ यद्वा बाध्यत्वमनिर्वाच्यत्वं तच्च शुक्तिरूप्यादेरेव पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगीति मते प्रतिपन्नोपाधौ त्रैका
लिकनिषेधप्रतियोगित्वं॥ उक्तं हि विवरणे॥ प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्येति॥ उक्तं च वार्त्तिके तत्वमस्यादिवा
क्यार्थसम्यग्धीजन्ममात्रतः॥ अविद्या सहकार्येण नासीदस्ति भविष्यतीति॥ प्रतिपन्नत्वं च न प्रमितत्वं येन विरोधः॥ नापि भ्रांतिप्रतिप
न्नत्वं येन सिद्धसाधनं॥ किंतु प्रतीतत्वमात्रं॥ सर्वांशश्च प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं विवक्षितं॥ सत्वपक्षे रजतत्वं प्रतिपन्नोपा

धौ शुक्तौ निषिध्यमानमपि रजतं तेन निषिध्यत इति न सिद्धसाधनं ॥ मतांतरे तु बाध्यत्वं ज्ञानत्वेन ज्ञाननिवर्त्यत्वं ॥ उक्तं हि विवरणे अज्ञा
नस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाध इति ॥ ननु भित्तिं प्रति मनसो मनस्त्वेन हेतुत्वेपींद्रियत्वेनाहेतुत्व
वत् पूर्वज्ञानादिकं प्रति तु उत्तरस्य ज्ञानेच्छादेरुत्तरात्मविशेषगुणत्वेन निवर्त्तकत्वेपि ज्ञानत्वेन निवर्त्तकत्वात् ॥ अथवा चित्सुखरी
त्या स्वसमानाधिकरणात्यंताभावप्रतियोगित्वं मिथ्यात्वं । संयोगतदत्यंताभावयोरवच्छेदकभेदेन भिन्नाश्रितत्वस्यैवाभ्युपगमेन स
त्वपक्षे सामानाधिकरण्यायोगात् ॥ शुक्तिरूप्यादेरपि पारमार्थिकत्वाकारेण स्वसमानाधिकरणात्यंताभावप्रतियोगित्वाच्च ॥ न
चाधिकरणशब्देन तात्विकाधिकरणोक्तौ समवायिनि संयोगिनि वा तत्त्वेन तदधिकरणे तदत्यंताभावायोगेनासंभवः ॥ अधिकर
णत्वेन प्रतीतिमात्रोक्तौ अन्यथाख्यातिपक्षे रजतत्वादेः स्वाधिकरणत्वेन प्रतीतशुक्त्यादावत्यंताभावस्य सत्त्वात् सिद्धसाधनमिति
वाच्यं ॥ स्वात्यंताभावाधिकरणएव प्रतीयमानत्वस्य विवक्षितत्वात् ॥ तत्पक्षे च रजतत्वारजतत्वादिकं स्वात्यंताभावानधिकर
णे रजते विभाति ॥ आनंदबोधरीत्या सद्विविक्तत्वं मिथ्यात्वं ब्रह्म सद्रूपत्वाभावः ॥ ब्रह्म च सत्तारहितमपि सामान्यमिव सद्रूपं
दृश्यत्वं च न्यायदीपावलीरीत्या दृग्विषयत्वं । ननु यन्न मिथ्या तन्न दृश्यमिति व्यतिरेकस्याग्रहे संदिग्धानैकांत्यं ॥ तद्ग्रहश्च न तावदसति ॥ त
त्र सद्विविक्तत्वरूपमिथ्यात्वव्यतिरेकाभावात् ॥ मिथ्यात्वांतरव्यतिरेकस्याभावेपि तत्र साध्यव्यतिरेकग्रहार्थं तस्यापि ज्ञातत्वेन व्यभिचारात् ॥
ब्रह्मणि मिथ्यात्वव्यतिरेकग्रहे च ब्रह्मापि दृश्यमिति चेत् ॥ न ॥ आकाशस्य स्वरूपेणापरिच्छेदेपि घटावच्छिन्नस्य परिच्छेदवत् ब्रह्मणः
स्वरूपेण दृश्यत्वेपि व्यतिरेकावच्छिन्नस्य दृश्यत्वात् यद्वा प्रमाणमालारीत्या स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिर्दृश्यत्वं ॥ त राम ३

थावात्मनो ज्ञानविषयत्वेपि नोक्तरूपं दृश्यत्वं॥ अस्वप्रकाशत्वं वा दृश्यत्वं॥ स्वप्रकाशत्वं च फलाव्याप्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं॥ फलं
च वृत्तिप्रतिफलितं चैतन्यं॥ स्वप्रकाशत्वाभावश्च घटादौ विशेषणाभावेन धर्म्यादौ तु विशेष्याभावेनेति विशिष्टाभावोनुगतः॥ अस्मिं
श्च पक्षे जडत्वमसंविद्रूपत्वमित्यसंकरः॥ श्रुतिश्चात्र प्रमाणं॥ एकमेवाद्वितीयमित्यादौ अद्वितीयादिपदैर्द्वितीयमात्रनिषेधात्॥
न च प्रत्यक्षबाधादनुमानमप्रमाणं॥ श्रुतिश्चाप्रमाण्यमिति युक्तं। प्रत्यक्षेण व्यावहारिकसत्वग्रहात् अनुमानादिभिश्च पारमार्थिकसत्व
निषेधात्॥ न हि वर्तमानमात्रग्राहि प्रत्यक्षं त्रैकालिकाबाध्यत्वग्राहि वह्निरनुष्ण इत्यत्र तूष्णत्वस्य प्रत्यक्षसिद्धव्यावहारिकसत्वनिषेधा
द्बाधः॥ दृश्योतवनमोमेल्यचंद्रप्रादेशत्वग्राहि प्रत्यक्षयोरनुमानागमाभ्यां बाध इति॥ ॥उच्यते॥ ॥मिथ्यात्वं हि त्वयैव पक्षांतरानि
षेधेन पंचधा निरुक्तं। तत्राद्ये किं सत्वे सत्यसत्वरूपविशिष्टस्याभावोभिप्रेतः किं वा सत्वात्यंताभावासत्वात्यंताभावरूपधर्मद्वयं॥
यद्वा सत्वात्यंताभाववत्वे सत्यसत्वात्यंताभाववत्वरूपविशिष्टं। नाद्यः॥ सन्मतेपि सदेकस्वभावे जगति तस्य सिद्धत्वात्॥ द्वितीयः। व्याहतेः
निर्धर्मकब्रह्मवत् सत्वराहित्येपि सद्रूपत्वेनामिथ्यात्वोपपत्त्यार्थांतराच्च॥ पृथिवी इतरभिन्ना पृथिवीत्वादित्यत्र त्रयोदशान्योन्या
भावानामिवात्रापि सत्वासत्वात्यंताभावयोः प्रत्येकं प्रसिद्धत्वेन कथंचिदप्रसिद्धविशेषणत्वाभावेपि असत्वात्यंताभावांशे सिद्धसा
धनत्वाच्च॥ न हि सिद्धमसिद्धेन सहोच्चार्यमाणमसिद्धं भवति पृथिवी इतरभिन्नेत्यत्र तु जलादौ एकैकान्योन्याभावोपि न पृथिवीत्वोपहिते सि
द्धः॥ दृष्टांतस्य साध्यवैकल्याच्च पृथिवीत्वहेतुः केवलव्यतिरेकी॥ त्रयोदशान्योन्याभावरूपसाध्यस्य व्यतिरेकनिरूपणं तु भिंनाश्रितानाम

पित्रयीदशान्यान्याभावानां समूहालंबनैकज्ञानोपारूढत्वमात्रेणोक्तं ॥ अतएव न तृतीयः ॥ व्याहतेरर्थांतरात्साध्यवैकल्याच्चाकिंच यथात्र
नित्ये वाङ्मनसे इत्यत्र पक्षतावच्छेदकनानात्वेनांशे सिद्धसाधनत्वेपि पृथिवी इतरभिन्नेत्यत्र पक्षतावच्छेदकैक्यान्नांशे सिद्धसाधनं तथेहा
पि यद्यपि कथंचित्साध्यतावच्छेदकैक्यान्नांशे सिद्धसाधनं नापि व्यर्थविशेष्यत्वं विमतमुपादानापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमित्य
त्र कृतिग्रहणेनैवेश्वरसिद्धावपि चिकीर्षादेरिव गुणादिकं गुणादिनाभिन्नाभिन्नं समानाधिकृतत्वादित्यत्र तार्किकांगीकृतभिन्नत्वस्येव
व्यापकविशेषणानामुद्देश्यप्रतीत्यर्थत्वात् ॥ इह च सद्विलक्षणत्वे सत्यसद्विलक्षणमिति प्रतीतेरुद्देश्यत्वात् ॥ यदि चाभेदे सत्यपि घटः
कलशादिति समानाधिकरण्यादर्शनादप्रयोजकत्वं निरविशिष्टधीस्तत्रोद्देश्या तर्हि तुच्छे सद्वैलक्षण्ये सत्यपि दृश्यत्वादर्शनादिनापि सो
द्देश्यतिसमं ॥ तथाप्यप्रसिद्धविशेषणत्वं ॥ पृथिवी इतरभिन्नेत्यत्र त्वनेकधर्मसाधनपक्षे एवं प्रत्येकप्रसिध्या साध्यप्रसिद्धिरुक्ता ॥ अ
न्यथा शशादीनां प्रत्येकं प्रसिध्या शशशृंगोल्लिखितत्वस्यापि सा स्यात् ॥ न द्वितीयः ॥ त्रैकालिकनिषेधस्य तात्विकत्वेऽद्वैतहानिः ॥
प्रातिभासिकत्वे सिद्धसाधनात् ॥ व्यावहारिकत्वेपि तस्य बाध्यत्वेन तात्विकसत्वाविरोधित्वेनार्थांतरात् ॥ अद्वैतश्रुतेरतत्वावेदकता
पाताच्च तत्प्रतियोगिनो प्रातिभासिकस्य प्रपंचस्य पारमार्थिकत्वाकारेण वा ॥ नाद्यः ॥ शुक्त्यादिसिद्धौ रूप्यादिकस्यार्थक्रियासमर्थस्या
विद्योपादानकस्य तत्वज्ञाननाश्यस्य च वियदादे रूप्यादेश्च धीकाले विद्यमानेनासद्विलक्षणस्वरूपेण त्रैकालिकनिषेधायोगात् ॥
त्रैकालिकनिषेधं प्रति स्वरूपेणापणस्य रूप्यं वा पारमार्थिकत्वाकारेण प्रातिभासिकरूप्यं वा प्रतियोगीति त्वन्मतहानेश्च अत्यंता
सत्वापाताच्च ॥ प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगीत्वमपि त्वन्मते असत्वेन संमतस्य घटादेः सर्वत्र त्रैकालिकनिषेधप्रतियो

गित्वपर्यंतमिति तन्मतं॥ अन्यथान्यत्र सत्वापातात्। न हि तेषामन्यत्र संभवितीति तत्त्वदुक्तेश्च॥ तथा च नात्यंतासत्वापत्तिर्न हि शशशृंगा
दीनामपि तीतोन्यदसत्वमस्ति॥ न च तेषां निरुपाख्यत्वमेव असत्वं निरुपाख्यपदेनैव व्याख्यायमानत्वात्॥ असतोप्रतीतावसद्वैलक्षण्य
स्यानस्यासत्प्रतीतिनिरासस्यासत्पदप्रयोगस्याप्ययोगाच्च॥ नाप्यपरोक्षतोक्तिरूप्यादौ चैवं विधासद्वैलक्षण्यस्याप्यन्यवादेपि सत्वात्।
त्वयाप्यसच्चेन्न प्रतीयेतेति वदतोक्तप्रतीतिं प्रति प्रयोजकस्यान्यस्यैवासत्वस्यावक्तव्यत्वाच्च॥ ब्रह्मण्यंगीकृतं यत्प्रतिपन्नोपाधौ नि
षेधाप्रतियोगित्वात्मकमबाध्यत्वरूपं सत्वं तद्विरुद्धस्यैवासत्वरूपत्वाच्च॥ अन्यथाप्रतीत्यनुपाधिकासत्वाभावे ब्रह्मण्यपि सत्वेन प्र
तीतिरेव सत्वं स्यात्। येन पुंसा शशशृंगाभावो न निश्चितस्तस्य गोशृंगमस्तीतिवत् क्वचिदपि शशशृंगमस्तीतिवाक्यादपि तत्प्रतीत्युत्पत्ते
श्च। तन्मतेपि हि तत्राबाध्यत्वस्यास्तित्वस्यानिर्वाच्यत्वेप्यविशिष्टानसदेव वदत्युतेचे तदनिर्वाच्यत्वभंगे॥ तदैक आहुरसदेवेदमग्र आ
सीदिति श्रुत्याप्यसतः सत्वप्रतीतेश्च॥ नापि सदनिर्वाच्याभ्यामन्यत्वमसत्वं अनिर्वाच्यस्यासत्वनिरूपणत्वेनान्योन्याश्रयात्॥ लाघवे
न सार्वत्रिकत्रैकालिकनिषेधाप्रतियोगीरूपसदन्यत्वस्यैव तत्वाच्च॥ अनिर्वाच्यस्यापि स्वरूपेण त्रैकालिकनिषेधेऽसतो नि
र्वाच्यादन्यत्वासिद्धेश्च। अर्थक्रियासामर्थ्याभावादिकं त्वसत्वमित्यशक्यशंकं॥ शुक्तिरूप्यादौ शुद्धब्रसत्वात्॥ न च निःस्वरू
पत्वमसत्वं मिथ्याभूतं तु सस्वरूपमिति वाच्यं॥ मिथ्याभूतस्यापि स्वरूपेणैव त्रैकालिकनिषेध इति पक्षे निःस्वरूपत्वस्य दुर्वारत्वात्।
न च मिथ्याभूतं सस्वरूपं मिथ्यात्वादेव स्वरूपेण त्रैकालिकनिषेधसामानाधिकरण्यविरोधीति वाच्यं॥ स्वदेशकालयोस्तत्स्व
रूपसंहितेषोस्तत्स्वरूपप्रतिषेधत्वस्य पारिभाषिकत्वापातात्॥ अन्यथा तत्तुच्छविषयावतत्तु व्यावहारिकपदस्वरूपापातात्॥ प्रा

गभावादिसमानकालीनत्वेनाप्यविरोधापाताच्च तुच्छेपि परोक्षप्रतीत्याद्यन्यथानुपपत्त्या तादृशस्वरूपस्य सत्त्ववत्त्वाच्चात् तस्मात्सर्वत्रैकालि
कनिषेधप्रतियोगित्वमेवाऽसत्तासत्त्वं॥ तत्र तदानीमसदित्यनेन तत्र तदा निषेधप्रतियोगित्वस्यैवात्यंतासदित्यनेनापि सर्वत्र सदा निषेधप्रतियोगित्वं
स्यैव प्रतीतेः॥ न च मिथ्याभूतस्यापि स्वरूपेणैव निषेध इति पक्षे तदभावः संप्रतियोगिकः॥ तुच्छाभावस्तु निष्प्रतियोगिक इति वा मिथ्याभूतस्या
पि सदा सर्वत्र सद्वैलक्षण्यमात्रं तुच्छस्य तु स्वरूपेणैव प्रतिषेध इति वा वैषम्यं वक्तुं शक्यं॥ अथ मतं॥ असतो सत्त्वादेवात्यंतिकनिषेधप्रतियोगिता
पिनेति तन्न॥ असत्त्वस्योक्तनिषेधप्रतियोगित्वरूपत्वेन हेतोर्विरुद्धत्वात्॥ असतोऽसत्त्ववत्सद्वैलक्षण्यवत्त्वयोच्यमानप्रतियोगित्वाभा
ववत् परोक्षतानव्यवहारौ प्रतिविषयत्ववत् असद्वैलक्षण्यं प्रतिप्रतियोगित्ववच्च निषेधप्रतियोगित्वस्याप्युपपत्तेश्च॥ प्रागभावदिदशा
यामसत एव घटादेस्तत्प्रतियोगित्वदर्शनेन प्रतियोगित्वस्य रूपादिवद्धर्मिसत्त्वनिरपेक्षत्वाच्च॥ कालांतरे सत्त्वस्य त्विदानीमनुपयोगात्॥
शिष्टमनिर्वाच्यभंगे वक्ष्यते॥ एतेन यदुक्तं मकरंदे। असतोप्रसक्तेर्न निषेधाप्रतियोगित्वमिति तन्निरस्तं॥ असतोप्रसक्त्या ब्रह्मजगतोरसद्वैल
क्षण्यस्य नासदासीदिति श्रौतनिषेधस्यासति च सद्वैलक्षण्यस्य प्रतियोगित्वाभावस्य चासिध्यापातात् तस्यापि प्रतीत्यधीनसिद्धिकत्वात्॥
ननु तत्र शशशृंगाभासादिनाबुद्धिपूर्वकारोपेण वा प्रसक्तिर्व्यपदेशार्थे नशशे नाप्रसक्तस्य निषेधेपि शशशृंगाभासादिमूलके प्रतियोगिस्यत्या
दिके सति प्रत्यक्षेण प्रसक्तस्यैव वा निषेधो युक्तः॥ अन्यथां गुल्यग्रे हस्तिशताभावोन सिध्येदिति चेत् समप्रहृतेपि। शशशृंगं नास्तीत्यवा
धितप्रतीतेः। न च तत्राप्यबुद्धिपूर्वकमारोपितस्यानिर्वाच्यस्यैव शृंगस्य निषेधः॥ अनाभासस्यैवारोप्यनिषेध इति तार्किकमते आभा
सस्यानिर्वाच्यस्य प्रसक्त्यानाभासस्य निषेध इति त्वन्मते चानिर्वाच्यान्यस्यैव शृंगस्य निषेधव्यत्वात्॥ जगदादावनिर्वाच्यभूताभासा

सद्वैलक्षण्यमेव न त्वेनाभासासद्वैलक्षण्यमित्यापाताच्च॥ ननु सदा सर्वत्राविद्यमानत्वमसत्वं चेदनाश्रितात्मादि विभुद्रव्यात्यंताभा
वः केवलान्वयीत्वात्मादिरप्यसत्स्यादिति चेत् तर्हि त्वन्मतेप्यात्मा मिथ्या स्यात्। तस्यापि स एवाधस्तादित्यादिश्रुति प्रतिपन्नोपाधौ
कालत्रयेप्यभावात्॥ अथ विभुत्वेनोर्ध्वधरोभाव ही नोप्यात्मा सामान्याद्दिवत्स्वदेशकालयोरस्तित्वसदा सर्वत्रात्मेत्यवाधितप्रती वे२
तेरिति न तस्य मिथ्यात्वं तर्हि तत एव तासत्वं॥ देशकालावपि सदा सर्वत्र देशकालावित्यवाधितप्रतीत्या प्रमेयत्वाभिधेयत्ववृत्तार्थि
काभिसत गगनात्यंताभाव तद्वृत्तिवृत्ती अन्योन्यवृत्तीचा अन्यथा त्वन्मतेपि तयोः प्रातिभासिकत्वस्यादिति न कश्चिद्दोषः॥ तस्मात्स्वरू
पेण त्रैकालिकनिषेधप्रतियोगित्वे असत्वं दुर्वारं तदुक्तं॥ नासीदसि भविष्यतु तदिति तानमेयता। यादिबाधस्तदासत्वे तेनैवांगीकृते
पुनरिति॥ नापि पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगित्वमित्यत:॥ अबाध्यत्वरूपपारमार्थिकत्वस्यावाध्यत्वरूपमि
थ्यात्वनिरूप्यत्वेनान्योन्याश्रयात्॥ रूप्यं नास्ति नासीन्न भविष्यतीति नेह नानास्ति किंचनेति च स्वरूपेणैव निषेधस्य॥ अन्यथा न प्रे
गादेरपि न स्वरूपेण निषेधः किंतु सत्वेनेति स्यात् रूप्यावच्छिन्नपारमार्थिकत्वस्यापि अपरोक्षप्रतीत्यन्यथानुपपत्याधीकाले वर्त्तमान
तया निषेधायोगाच्च॥ पारमार्थिकत्वस्यापारमार्थिकत्वेन निषेधे त्वनवस्था॥ सुखाद्यनुभवरूपस्यप्रत्यक्षेणापि मपि सुखानुभवइत्या
दिप्रत्यक्षेण स एवाधस्तादिश्रुत्या च प्रतिपन्नोपाधौ निर्धर्मकत्वेन पारमार्थिकत्वाकारेण निषेधेनातिव्याप्तेश्चाप्रतिपन्नोपाधि
शब्देनाधिष्ठानत्वविवक्षायां बाध्यत्वस्य निरूप्यमानमिथ्यात्वानतिरेकेण [illegible] त्माश्रयात्॥ सोपवैयर्थ्याच्च॥ ब्रह्म
णः प्रतिपन्नोपाध्यभावेपि पारमार्थिकत्वरूपधर्माभावस्य चेद्दोपरिछिन्नसद्रूपत्वाविरोधित्ववत्॥ घटादेः प्रतिपन्नोपाधिसङ्गावे

पि पारमार्थिकत्वाभावस्य घटादौ परिच्छिन्नसद्रूपत्वाविरोधित्वोपपत्तेश्च। नहि ब्रह्मण्यपि स्वरूपातिरिक्तं पारमार्थिकत्वं तत्त्वतोऽस्ति। अद्वैत
हानेः। न च सोपाधिकबाधाभावगर्भितं पारमार्थिकत्वं निरुपाधिकब्रह्ममात्रं। एवं च ब्रह्मकालत्रयेपि सत् वियदादिरुत्पादि च क
दाचिदेवेति नित्यत्वानित्यत्वानित्यत्वाभ्यामेवं वैधर्म्यं न तु सत्यत्वमिथ्यात्वाभ्यां। तथा चास्वरूपेण त्रिकालसत्त्वनिषेधो नास्तीति
मते। रूप्यादेस्तात्विकत्वेन निषेधस्यात्मनोपि वा। नापि ज्ञाननिवर्त्यत्वमिति तृतीयः। अतीतघटादावव्याप्तेः। शुक्तिज्ञानेन रूप्यं
नष्टमिति कदाप्यननुभवेन तत्राप्यव्याप्तेः किंच। एतावन्तं कालं शुक्तिज्ञानमासीदिदं रूप्यमासीदित्यनुभवेन शुक्तिवत्सत्येऽज्ञानभ्र
मादौ शुक्तिज्ञानेन तदज्ञानं नष्टमित्यनुभवेन ज्ञानत्वेनाज्ञाननिवर्त्तकत्वाच्च। ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यस्य चेच्छाद्यनिवर्त्यस्मृ
तित्वेन स्मृतिनिवर्त्यसंस्कारादावतिव्याप्तेः। अनुभवत्वव्याप्यधर्मेण तन्निवर्त्यत्वस्य च यथार्थस्मृतिनिवर्त्ये यथार्थस्मृतिविषये
अव्याप्तेः। भ्रमोत्तरप्रमानिवर्त्यत्वस्य च तत्त्वज्ञानसंस्कारनिवर्त्ये। ज्ञानसंस्कारेऽव्याप्तेः। स्वोपादानाज्ञाननिवर्त्तकज्ञाननिवर्त्य
त्वस्य चानाद्यध्यासेऽभावाज्ञानादेवज्ञानोपादानकत्वस्यैवलक्षणत्वापाताच्च। तथा च विज्ञाननाश्यता मिथ्यारूप्यादौ नानुभू
यते। किं त्वधिष्ठानवत्सत्ये तदज्ञानेनानुभूयते। एतेन स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वं मिथ्यात्वमिति चतुर्थोपि निरस्तः।
अत्यन्ताभावस्य तात्विकत्वे प्रातिभासिकत्वे व्यावहारिकत्वे च दोषस्योक्तत्वात्। अत्यन्ताभावप्रतियोगित्वं स्वरूपेणेति पक्षे पारमा
र्थिकत्वेनेति वा पक्षे दोषस्योक्तत्वाच्च। पंचमेपि सति किं सत्त्वाजातिमद्विवक्षितं। अबाध्यं वा ब्रह्म वा। नाद्यः। त्वन्मतेपि घटादौ जातेः सत्त्वात्
द्वितीये बाध्यत्वं मिथ्यात्वमिति स्यात्। तच्च निरस्तं। न तृतीयः। सिद्धसाधनात्। नृशृंगादावपि सद्रूपत्वाभावादन्यस्याप्यसत्त्वस्याभा

विनात्यंतासत्वापाताच्च॥मन्मतेअबाध्यत्वादिरूपस्यसत्वस्याभिधेयत्वादिवत्स्वाश्रितत्वेनब्रह्मणिसत्वाभावेसद्रूपत्वासिद्धेश्च॥तस्मात॥
अनिर्वाच्येऽप्रसिद्ध्यादिः प्रतीतेप्रतिषध्यता।स्वाश्रयेत्यंताविरहः सद्विलक्षणतातथा॥इतिपक्षत्रयेत्यंतासत्वंस्यादनिवारितं॥धीनाश्य
त्व त्वेत्वनित्यमेवस्यान्नमयात्मना॥२॥ममत्वत्यंतासत्वमेवमिथ्यात्वमितिनास्मत्स्तुतिवंदी॥मिथ्यात्वनिरुक्तिभंगः॥०॥अस्तुवामिथ्या
त्वंमत्किंचितत्यापिमिथ्यात्वंअबाध्यंबाध्यंवा॥आद्येद्वैतहानिः॥नहिप्रपंचोपाधिकंभ्रमकालानिश्चितंतन्मिथ्यात्वंनिरुपाधिकभ्र
मकालनिश्चितायधिष्ठानब्रह्ममात्रं॥तस्यमांप्रत्यपिसिद्धत्वात॥दृश्यत्वादेर्मिथ्यात्वएवव्यभिचारश्च॥मिथ्यात्वस्यचादृश्यत्वेनुमानवैयर्थ्य
तस्यसाध्यत्वप्रार्थीत्वात॥अंत्येसिद्धसाधनमद्वैतश्रुतेरतत्वावेदकत्वंचस्यात।जगच्चसत्यंस्यादात्मवत नचात्मत्वमुपाधिः॥सत्यत्वेविना
तद्विरुद्धस्यमिथ्यात्वस्यमिथ्यात्वेव्याघातवदसत्वादिरूपानात्मकत्वंचस्यासत्यत्वंविनाव्याघाताभावेनोपाधेरप्रयोजकत्वात।नचमिथ्या
त्वंनब्रह्ममात्रंकिंतुद्वितीयाभावोपलक्षितंब्रह्मेतिवाच्यं।उपलक्षणद्वितीयाभावएवबाध्याबाध्यविकल्पात।द्वितीयाभावाधिकरणतयाअविद्या
धिष्ठानंतयातत्साक्षितयाचभासमानंचिद्रूपस्योपलक्षणस्याभावेऽनद्वितीयाभावस्योपलक्षणत्वायोगाच्च॥ननुरूप्यधर्मेमिथ्यात्वमपि
मिथ्यैव॥नचतथात्वेरूप्यस्यसत्यत्वंसत्यंस्यादितिवाच्यं।धर्मिण्येमिथ्यात्वेविरुद्धयोरपिधर्मयोर्मिथ्यात्वात॥परस्परविरुद्धयोरेक
स्याभावेन्यस्यसत्यत्वनियमात्त्रूपत्रधर्मीसत्तत्रैव॥नहिवंध्यासुतस्याऽश्यामत्वाद्यभावेगौरत्वंसत्वं॥नवास्वप्नेतातस्यगजस्यमिथ्या
त्वेतत्रैवतातत्तदभावः।सत्यइतिचेत।न।प्रतिपन्नोपाधौनिषेधप्रतियोगित्वंहिमिथ्यात्वं।नचप्रतियोगिधर्मांतरवद्धर्मिसत्वापेक्षामि
त्यनिर्वाच्यभंगेवक्ष्यते॥धर्म्यसत्वेधर्मासत्वंतुधर्मिसत्वसापेक्षधर्मविषयंमिथ्यात्वंतुतत्प्रतिकूलं॥अन्यथासिद्धसाधनात।किंच

न्या २१० प्रतिपन्नोपाधावभावनिषिद्धं प्रत्युतबाधकज्ञानेनविहितमपिरूप्यमिथ्यात्वंयदिप्रातिभासिकरूप्यसंबंधमात्रेणप्रातिभासिकंतर्हिसति
१ ब्रह्मणि।निषिद्धा अपिधर्माः संतः स्युः।रूप्याधिष्ठानशुक्तिरपिप्रातिभासिकीस्यात्॥रूप्येप्रपंचेचसद्वैलक्षण्यंवसत्स्यात्।असद्वै
लक्षण्यंचासत्स्यात्॥असत्त्विचसद्वैलक्षण्यमसत्स्यात्॥रूप्यतन्मिथ्यात्वयोर्मिथ्यात्वेप्रातिबाधव्यवस्थाचनस्यात्।तदुक्तेन
धर्मिणोमिथ्यात्वेनहेतुनासाध्यस्यामिथ्यात्वामिथ्यात्वस्यापिप्रातिभासिकत्वापत्त्याहेतोरत्यंताप्रामाण्यंचस्यात्॥हेतुकृतस्यधर्मिमिथ्यात्व
स्यमिथ्यात्वेघटरूपादौव्यभिचारापत्त्यासत्यत्वावश्यंभावाद्धिरोधश्चस्यात्॥नचत्वन्मतेरूपादिकिंवियदादिकंवावंध्यासुतवद्धिः
स्वरूपंशून्यतापातात्॥स्वाप्नस्यापिकल्पितत्वेनध्वंसादेर्मिथ्यात्वेपितन्मिथ्यात्वंस्वप्नेप्रतीतमपिआत्मवदबाध्यत्वात्सत्यमेव॥नच
तोग मिथ्यात्वंप्रपंचवत्समसत्ताकं।एवंचनोक्तिकाद्वैतहानिः।नापिसिद्धसाधनंत्वन्मतेप्रपंचेस्वसमसत्ताकमिथ्यात्वासिद्धेरितिवाच्यं॥
मिथ्यात्वस्यव्यावहारिकत्वेनहिरोधिनोप्रातिभासिकस्यानये।इतस्वतःप्रामाण्यप्रत्यक्षादिसिद्धस्यविश्वसत्यत्वस्यपारमार्थि
कत्वापातात्।द्वैताद्वैतप्रामाण्ययोर्व्यावहारिकपारमार्थिकविषयत्वेनव्यवस्थोक्तस्यायोगाच्च।मिथ्यात्वस्यप्रातिभासिकेव्या
वहारिकतयाव्यावहारिकेचप्रातिभासिकतयादृष्टत्वेनतयोस्तुल्यसत्ताकत्वायोगाच्च।अन्यथाप्रपंचेसत्यत्वमिथ्यात्वयोर्विधि द ३
समुच्चयोवानिषेधसमुच्चयोवास्यात्॥तथाचमिथ्यात्वंयद्यबाध्यंस्यात्तर्हिद्वैतमतक्षतिः।मिथ्यात्वंयदिबाध्यंस्याज्जगत्सत्यत्व
मापतेत्॥१॥नचमिथ्यात्वस्यसत्यत्वंमिथ्यात्वाभ्यांदूषणेनित्यसमजातिः।स्वव्याघातादेरभावात्।उक्तंहिमिथ्यात्वस्यामिथ्या हि २
त्वेमिथ्यात्वंबाधितंनचेत्।सत्यत्वस्यचसत्यत्वेसत्यत्वंस्थापितंभवेदिति।किंचाधर्मस्यतदन्यस्वविकल्पानुपपत्तितः।धर्मि

एतत्त्वहिशिष्टत्वभंगो नित्यसमो भवेदिति तल्लक्षणं॥ नचात्र मिथ्यात्वस्य सत्यत्वे धर्मिणो मिथ्यात्ववैशिष्ट्यभंग उक्तः किंत्वद्वैतहानिः प्रस्तुतभेदः
किं भिन्ने उताभिन्न इत्यादिवदुक्तिरेवाभिन्नादिरूपविशिष्टमात्रनिरासकत्वेन स्वव्याघातजातिः उक्तं हि एतामेव जातिमभ्युपेक्ष्य तर्कवा
दिनां बौद्धचार्वाकवेदान्तिनां बालव्यामोहहेतवः कोलाहला इति॥ ॥ सामान्यतो मिथ्यात्वभंगः॥ ॥ दृश्यत्वहेतूक्तिरपि॥ स्तंभादि
प्रत्यये मिथ्याप्रत्ययत्वात्तथाहि यः प्रत्ययः स मृषा दृष्टः स्वप्नादिप्रत्ययो यथेति बौद्धोक्तयुक्तिमिति॥ इदं मात्रं॥ इयां दृश्यत्वं वृत्तिव्याप्य
त्वं वा फलव्याप्यत्वं वा साधारणं वा कदाचित्कथंचिद्विषयत्वं वा॥ स्वव्यवहारे स्वातिरेकि संविदपेक्षानियतिर्वा॥ अस्वप्रकाशत्वं वा॥ नाद्यः
आत्मनोपि वेदान्तजन्यवृत्तिव्याप्यत्वात्॥ अन्यथा ब्रह्मपरत्वेन वेदान्तानां ब्रह्मज्ञानार्थश्रवणादिविधेश्चावैयर्थ्यं॥ ब्रह्मविचारयतो गुरुशिष्य
योर्मौनंभौ वंचस्यात्॥ किंच ब्रह्मजिज्ञासा ब्रह्मज्ञानमित्यादौ कर्मणि षष्ठी तमेव धीरो विज्ञाय इत्यादौ द्वितीया दृश्यतेत्वग्र्यया बुद्ध्येत्यादौ ति
ङ आत्मा वा अरे द्रष्टव्य इत्यादौ तव्यादिश्च न स्यात्॥ दृशोऽनेन दृग्विषयत्वरूपदृश्यत्वस्यानंचनस्यात् सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यक्ति
ते इत्यादि स्ववचनविरोधश्च स्यात्॥ [redacted] नच विपक्षे धर्मिसमसत्वस्य हेतोर्वृत्तिर्व्यभिचारः नत्वारोपितस्यापि तस्यापि तत्र संगात् दृश्यत्वं
च व्यावहारिके जगति च पारमार्थिकात्मन्यपि व्यावहारिकमेवेति न व्यभिचार इति वाच्यं॥ ब्रह्मजगतोः पारमार्थिकत्वव्यावहारिकत्व
विभागस्याद्याप्यसिद्धेः॥ किंच पक्षे धर्मिसमसत्वस्य साध्यस्याभावो बाधः पक्षे हेतोर्धर्मिसमसत्वं च सिद्धिः॥ तथा चात्मनितात्विकधं
र्महीनेश्च प्रकाशत्वादि साध्यबाधः॥ नास्साधकानुभूतित्वादेश्चासिद्धिः एवं विपक्षे धर्मिसमसत्ताकः साधनस्याभावो व्यभिचारि
त्वं तथा च दृश्यत्वादीनां आत्मनि व्यभिचार इति च स्यात्॥ तस्माद्दार्ष्टान्तिकपक्षत्वे तत्र व्यावहारिकस्य हेतोः सत्त्वान्नासिद्धिः तथा

न्याय०
८

तस्य विपक्षत्वे विद्यावहारिकस्य हेतोः सत्वाद्व्यभिचारः॥ अथ धर्मिसमसत्वं हेतुविशेषणं। तर्ह्यात्मनिकस्यापि धर्मस्यैवं च स्याभावाद्विषयत्वादिरेव
मिथ्यात्वहेतुः स्यात्॥ समरीत्यात्मनि व्यभिचारस्य॥ दृष्टांतस्य साधनवैकल्यं च॥ ननु शुद्धं ब्रह्म न दृश्यं किंतु विशिष्टमेव॥ दृश्यत्वश्रुतयो
पि तद्विषयाः अन्यथा यत्तदद्रेश्यमित्यादिश्रुतिविरोधादिचेत्॥ न स्वतःसिद्धे निर्विशिष्यमाणत्वेन शुद्धासिद्धिप्रसंगात्॥ अज्ञाते धर्मिणि
कस्यचिद्धर्मस्य विधातुं निषेद्धुं चाशक्यत्वेन शुद्धे दृश्यत्वनिषेधायतस्य तेयत्वाच्च॥ न च स्वप्रकाशत्वेन स्वतःसिद्धे शुद्धे वृत्त्या दृश्यत्वनिषे
धः॥ शुद्धं स्वप्रकाशमिति शिष्टे जन्यविशिष्टवृत्तौ शुद्धप्रकाशे तस्य स्वप्रकाशत्वासिद्धेः॥ लाघवेन स्फुरणमात्रमेव मिथ्यात्वे तंत्रमिति
त्वतः स्फुरदपि ब्रह्म मिथ्यैव तत्सत्यत्वश्रुतिस्तु जगत्सत्यत्वश्रुतिवदनुमानादिविरोधेनासद्वैतलक्षणपरेत्यपाताच्च॥ शुद्धं न दृश्य
तेइत्यत्र शुद्धशब्दस्याभिधया लक्षणया वा शुद्धाबोधकत्वेन तस्य योगवैयर्थ्याच्च। विशिष्टे मिथ्यात्वदृश्य[...]योर्व्यतिरेकासंभवेन
शुद्धनिष्ठव्यतिरेकज्ञानाय शुद्धस्य ज्ञेयत्वाच्च॥ विशिष्टज्ञाने [वि]शेष्यस्यापि भानेन विशिष्टस्य दृ[श्यत्व]वन्नैव शुद्धस्यापि दृश्य[त्व]वि
सिद्धेश्च॥ न च विसवेशिपि विशिष्टायेत्यादौ देवतात्ववद्विषयत्वमपि विशिष्ट एव न तु विशेष्य प्रीतिपु तं देवतात्ववदेव वि
षयत्वस्य विशेष्यवृत्त्यभावेन भागासिद्धेः॥ घटत्वादि विशिष्ट एव दृश्यत्वं न तु विशेष्य घट इत्यापाताच्च॥ विशिष्टज्ञानेपि विशेष्ये कदाचिदज्ञानाद्या
पाताच्च॥ दंडी चैत्र इति ज्ञाने नैव चैत्रो ज्ञात इत्यनुभवाच्च॥ एतेनानुभवविरोधादिनैवाश्रीकोमयोर्देवतात्ववत्॥ विषयत्वं व्यासज्यवृत्तीति
न विशेषवत् दिति निरस्तं॥ अत एवादृश्यत्वश्रुतिः साकल्येनादृश्यत्वपरा अन्यथा यत्तदद्रेश्यमित्यादौ यद्व[...]द्याद्योगात्॥ एतेन चरम सा०
वृत्त्युपहितस्यैवात्मनस्तद्विषयत्वात्तस्य च मिथ्यात्वान्न व्यभिचार इति निरस्तं। चरमवृत्तेः स्वविषयांतर्भावेन तस्याः स्वप्रकाशत्वस्याप्रमाः

त्वस्य चापातात्॥ इत्थं परागोत्र सन्नयोपपद्यते न तत्प्रतिभास्यतयेति कल्पनाविरोधाच्च। बहिर्ज्ञाने च विषयस्य सत्यत्वेन व्यभिचारानु
द्धारात्॥ न च स्वरूपेण दृश्यत्वं हेतुः ब्रह्म तु विशिष्टरूपेणैव दृश्यमिति वाच्यं। निर्विकल्पकाभावपक्षे घटादेरपि तत्सद्भावपक्षे निर्व्या
तीन्द्रियस्यापि विशिष्टरूपेणैव दृश्यत्वे नासिद्धेः। न हि लिंगादिना निर्विकल्पकधीः। वेदान्तानां कल्पित विशिष्टपरत्वे तत्त्वावेद
कत्वायोगाच्च॥ तरति शोकमात्मविदित्यादौ मोक्षसाधनशुद्धरूपप्रत्ययोक्तेश्च। किंच शुद्धज्ञानाभावे तदाच्छादकस्य मूला
ज्ञानस्य निवृत्तिर्न स्यात्॥ ज्ञानस्याज्ञाननिवर्त्तकत्वे हि समानविषयत्वं तंत्रं। न च घटादिज्ञान... विषयत्वमेव तन्त्रं संगो
रवात्॥ दीपेच्छादौ समानविषयत्वेनैव विरोधितमोद्वेषादिनिवर्त्तकत्वदर्शनाच्च। घटपटाविति ज्ञानेन ... ज्ञानस्य विशिष्टज्ञानेन
च विशेषणज्ञानस्य निवृत्तिदर्शनाच्च॥ ब्रह्मज्ञानस्य निर्विषयत्वे ज्ञानत्वायोगस्य वक्ष्यमाणत्वाच्च। अथ तदज्ञाननिवर्त्तकत्वे तदा
कारत्वमेव तंत्रं। तच्च तद्विषयत्वाभावेपि कारणसामर्थ्यादेव शब्दप्रमाणादिशब्दजन्यज्ञानस्यैव वस्तुकं दृश्यत्वव्याप्त्यादिकमपि तद्विषयमि
ति चेन्न॥ स एवाकारो यस्येति वा तदाकार एवाकारो यस्येति वा तदाकारश्चाकारो यस्येति वा। नाद्यः। वृत्त्यनाश्रितस्यात्मनो वृत्त्याकारत्वायोगा
त्। न द्वितीयः। साकारवादापातात्। जडघटाकारवृत्त्यावेत्मीयस्वरूपेणानंदापरिच्छेदाद्याकारस्याभावाच्च॥ सत्तैकाकारत्वे घटज्ञा
नस्याप्यात्माकारत्वापातात्। आत्मनो निराकारत्वाच्च। अत एव न तृतीयः॥ ज्ञानानंदादिनामात्मस्वस्वभावात्। सत्तया सामान्यस्य चा
८ तिप्रसक्तेः संस्कारनुज्ञानस्य च घटत्वयोः कथंचित्संभवेपि अपरिच्छिन्नपरिच्छिन्नयोः ब्रह्मतद्वृत्त्योरयोगात्॥ तस्मात्तद्विषयत्वमेव
तदाकारत्वं वाच्यं॥ अन्यथा घटादिज्ञानेपि तद्विषयत्वं तंत्रं। आत्मा ज्ञानेन तु तदाकारत्वमित्यनेनैव गमादिति स्वरूपे आत्मनि व्यभिचारः

न्या॰१०
८

।अनिर्वचनीयत्वादिकं मिथ्यात्वमिति पक्षे व्यभिचारश्च। असद्वैलक्षण्यस्य नार्थतस्यापितेयत्वात्। अथ स्वास्त्त्रप्राचांरीत्याद्दृग्विषयत्व
मात्रं दृश्यत्वं किं त्वाध्यनिकरीत्या फलव्याप्यत्वमिति द्वितीयोस्त्विति चेत्॥ फलं हि मद्रीत्या व्यवहारो वा भवद्रीत्या ज्ञातता वा त्वद्रीत्या वृत्तिप्र
तिफलितं चैतन्यं वा॥ तदभिव्यक्तं विषयाधिष्ठानचैतन्यं वा। नाद्यः॥ हानादेर्गम्यानादावभावात्॥ अभिलापस्य चात्मन्यपि भावात्॥ २४
न द्वितीयः॥ ज्ञाततायाम घटादौ परस्याप्यतीतादावभावात्। न तृतीयचतुर्थौ। अतीतादावसिद्धेः॥ तेपि स्वसत्ताकाले फलव्याप्यमिति
चेति॥ ना। चित्सुखेन नमो गिप्रत्यक्षगम्यतयाऽपरोक्षत्वं धर्मादीनां चोदनैकप्रमाण्ययोग्यत्वादित्युक्तत्वेन तद्विरोधात्॥ तदुक्तमपि
तदुक्तत्वेन योगित्वं प्रत्यपरोक्षमिति स्वुक्चत्वाच्च। पक्षैकदेशे साक्षिवेद्याविद्यांतःकरणतद्धर्मसुखादौ दृष्टांते शुक्तिरूप्ये च फ
शि॰२ लव्याप्यत्वाभावाच्च॥ नापि साधारणमिति तृतीयः॥ ब्रह्मव्यतिव्याप्यत्वरूपविशेषस्य सत्वेन सामान्य[illegible]पि सत्वात्॥ न च स्वतं[illegible]
चतुर्थः। अतीतादेरपि कदाचित्स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वात्॥ अविद्यादेरपि साक्षिविषयत्वात् नित्यातीं[illegible]दी
ज्ञातत्वेनाज्ञातत्वेन वा साक्षिविषयत्वात्॥ दृग्रूपस्यात्मनस्तु तदविषयत्वादिति चेत्। न। नित्यातींद्रियं पूर्वं न ज्ञातमिदानीं शब्देन
ज्ञातमितिवत् शुद्धं ब्रह्म पूर्वं न ज्ञातमिदानीं वेदांतेन ज्ञातमित्यनुभवेन ब्रह्मणि व्यभिचारात्। तद्व्यवहारजननेन तद्विषयत्वमात्रं त
त्वेन स्वव्यवहारहेतोः श्रितोप्यभिधानस्याभिधेयत्ववत्। चिद्विषयत्वाच्च। कल्पितभेदेन विंबप्रतिविंबयोर्लिंगलिंगिभाववज्जीवब्रह्म
णोर्ज्ञातत्वेयभाववच्चात्मनोपि स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वसंभवाच्च॥ अन्यथा तया तदज्ञाननिवृत्त्ययोगात्॥ तदाकारवृ

चक्षुश्चापातात् ॥ इत्युपरागो न सन्नयोपपद्यते तेन तत्प्रतिभास्यत्वेति कल्पस्य विरोधाच्च । बहिर्लिङ्गादिवैच विषयासमत्वेन व्यभिचारानु
द्धारात् ॥ न च स्वरूपेणादृश्यत्वं हेतुः ब्रह्म तु विशिष्टरूपेणैवादृश्यमिति वाच्यं । निर्विकल्पकाभावपक्षे घटादेरपि तत्सद्भावपक्षेऽनित्या
तीन्द्रियस्यापि विशिष्टरूपेणैवादृश्यत्वेनासिद्धेः । न हि लिंगादिना निर्विकल्पकधी । वेदान्तानां कल्पित विशिष्टपरत्वे तत्त्वावेद
कत्वायोगाच्च ॥ तरति शोकमात्मविदित्यादौ मोक्षसाधन शुद्धरूपपरत्वयोक्तेश्च । किंच शुद्धज्ञानाभावे तदाच्छादकस्य मूला
ज्ञानस्य निवृत्तिर्न स्यात् ॥ ज्ञानस्याज्ञाननिवर्तकत्वे हि समानविषयत्वं तंत्रं ॥ न च घटादिज्ञान घटाद्यज्ञानाविषयत्वमेव तं[illegible]गौ
रवात् ॥ दीपे छादौ समानविषयत्वेनैव विरोधित मोहे छायादि निवर्तकत्वदर्शनाच्च । घटपटाविति ज्ञानेन [illegible] ज्ञानस्य विशिष्टज्ञानेन
च विशेषणाज्ञानस्य निवृत्तिदर्शनाच्च ॥ ब्रह्मज्ञानस्य निर्विषयत्वे ज्ञानत्वायोगस्य वक्ष्यमाणत्वाच्च ॥ अथ तदज्ञाननिवर्तकत्वे तदा
कारत्वमेव तंत्रं । तच्च तद्विषयत्वाभावेऽपि करणसामर्थ्यादेव शशशृंगादिशब्दजन्यज्ञानस्येव युक्तं दृश्यत्व श्रुत्यादिकमपि तद्विषयमि
ति चेन्न ॥ स एवाकारो यस्येति वा तदाकार एवाकारो यस्येति वा तदाकारश्चाकारो यस्येति वा । नाद्यः । वृत्त्यनाश्रितस्यात्मनो वृत्त्याकारत्वायोगा
त् । न द्वितीयः । स्वाकारवाधापातात् । जडघटाकारवृत्त्यावात्मीयस्वरूपेणानंदापरिच्छेदाद्याकारस्याभावाच्च ॥ सन्निधेयैकाकारत्वे घटज्ञा
नस्याप्यात्माकारत्वापातात् । आत्मनो निराकारत्वाच्च । अत एव न तृतीयः ॥ ज्ञानानंदादिनासाम्यस्याप्यसंभवात् । संतत्यासाम्यस्य चा
स तिवृत्तेः संस्कारानुगामस्य च घटतरयोः कथंचित्संभवेऽपि अपरिच्छिन्नपरिच्छिन्नयोः ब्रह्मतद्वृत्त्योरयोगात् ॥ तस्मात्तद्विषयत्वमेव
तदाकारत्वं वाच्यं ॥ अन्यथा घटादिज्ञानेऽपि तद्विषयत्वं तंत्रं । आत्मज्ञानेन तु तदाकारत्वमित्यननुगमादिति सकृ आत्मनि व्यभिचारः

ना॰सि॰ । अनिर्वचनीयत्वादिकं मिथ्यात्वमिति पक्षे व्यभिचारश्च। असद्वैलक्षण्यस्य नार्थतस्यापि तेयत्वात्। अथबाधकज्ञानारीत्या दृग्विषयत्व
२ मात्रं दृश्यत्वं किं त्वबाधकनिकरीत्या फलव्याप्यत्वमिति द्वितीयोऽस्त्विति चेत्॥ फलत्वं हि मद्रीत्या व्यवहारो वा भवद्रीत्या ज्ञातता वा त्वद्रीत्या वृत्तिप्र
तिफलितं चैतन्यं वा॥ तदभिव्यक्तं विषयाधिष्ठानचैतन्यं वा। नाद्यः॥ हानादेर्गगनादावभावात्॥ अभिलापस्य चात्मन्यपि भावात्। २४
न द्वितीयः॥ ज्ञाततायाम् अघटादौ परस्याप्यप्रतीतादावभावात्। न तृतीयचतुर्थौ। अतीतादावसिद्धेः॥ तेऽपि स्वसत्ताकाले फलव्याप्यमिति
चेति॥ ना। चित्सुखेनन योगिप्रत्यक्षगम्यतयाऽपरोक्षत्वं धर्मादीनां चोदनैकप्रमाणयोग्यत्वादित्युक्तत्वेन तद्विरोधात्॥ तुष्ठमपि
तुक्तत्वेन योगित्वं प्रत्यपरोक्षमिति सुवचत्वाच्च। पक्षैकदेशे साक्षिवेद्याविद्यान्तःकरणतद्धर्मसुखादौ दृष्टान्ते शुक्तिरूप्ये च फ
सि॰ २ लव्याप्यत्वाभावाच्च॥ नापि साधारणमिति तृतीयः॥ ब्रह्मवृत्तिव्याप्यत्वरूपविशेषस्य सत्वेन सामान्य[illegible]सत्वात्॥ न च स्फुरत्ताहे
चतुर्थः। अतीतादेरपि कदाचित्स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वात्॥ अविद्यादेरपि साक्षिविषयत्वात् नित्यातीन्[illegible]
ज्ञातत्वेनाज्ञातत्वेन वा साक्षिविषयत्वात्॥ दृग्रूपस्यात्मनस्तु तदविषयत्वादिति चेत्। न। नित्यातीन्द्रियं पूर्वं न ज्ञातमिदानीं शब्देन
ज्ञातमितिवत् शुद्धं ब्रह्म पूर्वं न ज्ञातमिदानीं वेदान्तेन ज्ञातमित्यनुभवेन ब्रह्मणि व्यभिचारात्। तद्व्यवहारजननेतद्विषयत्वमात्रेव
त्वेन स्वव्यवहारहेतोश्चितोऽप्यभिधानस्याभिधेयत्ववत्। चिद्विषयत्वाच्च। कल्पितभेदेन बिम्बप्रतिबिम्बयोर्लिङ्गलिङ्गिभाववज्जीवब्रह्म
णोर्जीवत्सेयभाववच्चात्मनोऽपि स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वसम्भवाच्च॥ अन्यथा तया तद्ज्ञाननिवृत्त्ययोगात्॥ तदाकारवृ

त्येव वाच्यं वृत्तिव्याप्तौ घटादावपि तथात्वापातेनासिद्धेः॥ अज्ञानाविरोधिस्फुरणरूपत्वस्य चात्मनीव घटादावपि सत्त्वाच्चेत्यात्॥ अस्फुरणरूपे
प्रतीद्रियेष्विवैंद्रियकेऽपि वृत्तिविषयत्वमात्रेणान्यव्यवहारादिसंभवे तत्प्रतिफलितचैतन्यविषयत्वस्य वा तदभिव्यक्तचैतन्यविषयत्वस्य वाक
ल्पनायोगाच्च॥ घटादावंधकारनिवर्तकप्रभायाइवाज्ञानाविरोधित्वात्तानस्यानंतत्वभावाच्च॥ अ[illegible]थाहको घाकारांतःकरणवृत्तिप्रतिफलि
तं तद्ग्राह्यं वा इच्छादिपरोक्षवृत्तिप्रतिफलितं तद्ग्राह्यं वा परोक्षत्वानंतमोनिवर्तकप्रभावत्प्रतिफलितं तद्ग्राह्यं वा प्रमांतरं च कल्प्यं स्यात्॥ तमेव भां
तमित्यादिश्रुत्यर्थस्त्वप्रतीकर्मव्यवस्थाभंगे वक्ष्यते चैतन्याविषयस्याप्यापरोक्ष्यं च चैतन्याभिव्यंजकत्वार्थमावश्यकेनेंद्रियजन्यत्वं प्रत्यक्ते
नवृत्तिमात्रेण साक्षात्कारत्वरूपविशेषेणोपपन्नं॥ इच्छादिवृत्यनिषे[illegible]परोक्षवृत्तिगेन सानत्वरूपविशेषे[illegible]विषयस्फुरतात्तत्त्ववृत्तत्वं[illegible]घ
निष्टेनानुभावादिगतेन विशेषेण तद्विषयस्यानुभूतत्वानुमितत्वादिवच्च॥ अन्यथा परोक्षत्वापरोक्षत्वैकत्र नान[illegible]पेन स्यात्॥ न पंचमः
आत्मनोऽपि स्वप्रकाशत्वाद्वितीयत्वादिविशिष्टस्य व्यवहारे तदपेक्षानियमात्॥ नन्वात्मनि विशिष्टव्यवहारे विशेषणोपनायकमानापेक्षानिय
मेऽपि न स्वरूपमात्रव्यवहारे तदपेक्षेति चेत्॥ न। घटादावपि तथैत्यसिद्धेः॥ ननु घटादौ स्वरूपमात्रव्यवहार एव नास्ति आत्मनि तु सुषुप्तावस्ती
ति चेत्॥ न। एतावंतं कालं सुखमहमस्वाप्समिति परामर्शेन तस्य विशिष्टत्वेनैव सिद्धेः॥ न चात्मनि विशिष्टव्यवहारे तदपेक्षायामपि न विशेष्यां
शे तदपेक्षा स्वप्रकाशत्वात् घटादौ तदंशेऽपीति चेत् न नियतिपदवैयर्थ्यात्॥ आसंसारमज्ञानावृतस्य शुद्धस्य स्वव्यवहारे नधिगतार्थबोधक
वेदांतजन्याज्ञाननिवर्तकवृत्त्यपेक्षानियमाच्च। वृत्त्यन्यसंविदपेक्षायाश्च तव नित्यातींद्रिये मम घटादावप्यभावादिस्तुक्तत्वात्॥ न च घटादाव
पि वृत्त्यात्मनाऽऽत्मा नेति वृत्तिव्यवहारार्थसंविदंतरापेक्षानुभूयते॥ एतेन स्वव्यवहारे स्वावच्छिन्नसंवित्सापेक्षत्वं दृश्यत्वमिति निरस्तं॥ न षष्ठः॥ घटादौ विषे

ध्यवत्फलव्याप्यत्वाभावात् स्वविशेषणस्याप्युक्तन्यायेन सत्वेनाविद्यादेश्शुक्तिरूप्यादौ च विशेषणवद्विशेष्यस्यापि सत्वेन विशिष्टरूपस्वप्रकाशत्व
व्यतिरेकरूपहेतोः पक्षैकदेशे दृष्टान्ते चाभावात्॥ अत्रोक्तं चित्सुखेन शुक्तिरूप्यादौ विशेषणमस्ति न तु विशेष्यं अध्यस्तत्वात्॥ अपरोक्षव्य
वहारायोग्यमपि तत्र तद्व्यवहारस्य अधिष्ठानभूतसाक्षिगतापरोक्षाध्यासाद्युक्तः इदमिति व्यवहारायोग्यमपि तस्मिन्नधिष्ठानगतेदंतारोपादि
दमिति व्यवहारवत्॥ यद्यपि घटादिरप्यध्यस्तस्तथापि तत्र सत्वमिवापरोक्ष्यं व्यावहारिकं रूप्यादौ तु प्रातिभासिकमिति॥ तन्न॥ सर्वव्यावहा
रिकोपादाने ब्रह्मज्ञानात् प्राग्बाधिते शुक्त्यादिसिद्धे च व्यावहारिकेऽज्ञानांतःकरणादौ च योग्यत्वस्यापि व्यावहारिकत्वात्॥ नह्यपरोक्षै
करसेन साक्षिणा साक्षाद्दृष्टे अज्ञानादावापरोक्ष्यं प्रातिभासिकं वृत्तिद्वारा तद्दृष्टे घटादौ तु व्यावहारिकमिति युक्तं। शिष्टं स्वप्रकाशवा
दे वक्ष्यते। किं चास्वप्रकाशत्वस्य पंचमप्रकाराविद्यानिवृत्तौ व्यभिचारः। यत्तु प्रमाणावस्थत्वन्यतराधीनवृत्तिवि[illegible]षयत्वं तु [illegible]स्य घटादि
वत् प्रमाणाधीनवृत्तिविषयत्वस्य प्रातिभासिकवदस्वधीनवृत्तिविषयत्वस्य चाभावान्नात्र व्यभिचार इति तन्न युक्तं। प्रमाणा[illegible]धीनवृ
त्तिविषयत्वस्यापि मिथ्यात्वेनैव व्याप्तेः। साधकोक्तौ तु तदुक्तौ व्यभिचारः॥ तज्ज्ञानस्यापि ज्ञापकाधीनत्वात्॥ धीमात्रशरीररूप्यादिवृत्तेर्वस्तु
परतंत्रत्वस्याप्यभावाच्चावस्तुपरतंत्रशब्देनासदविषयकत्वस्यासाद्धत्वलक्षणविषयत्वस्य चोक्तौ च मद्रीत्या दृष्टान्तस्य साधनवैक
ल्यात्॥ ब्रह्मणि व्यभिचारापरिहाराच्च। एवं च न धर्मादौ फलव्याप्तिवृत्तिव्याप्यत्वमात्मनि। अज्ञातत्वादिरूपेण चिद्वेद्यत्वं तु चित्यपि॥ अनौ
पिद्वाभिलापत्वमस्त्येवोपपदात्मनि॥ तदुक्तं स्वप्रभत्वं च रूप्ये नास्त्यस्ति चात्मनीति दृश्यत्वहेतुभंगः ६॥ जडत्वमप्यज्ञातत्वं वा॥ अज्ञानत्वं
वा। अस्वप्रकाशत्वं वा॥ आद्ये नाज्ञत्वं वा पराभिप्रेतं वानाद्यः। तन्मते पक्षनिक्षिप्तस्याहमर्थस्येव ज्ञातत्वात्स्फुटत्वात्। मनोपज्ञातत्वाच्च॥

शुद्धेपि कल्पितं ज्ञातृत्वमस्तीति चेन्न कल्पितेन हेत्वभावेन व्यभिचारापरिहारात्॥ कल्पितस्य ज्ञातृत्वस्याभावो हेतुरिति चेन्न। गौरोहं जानामीति कल्पित
ज्ञातृत्ववति देहादौ तदभावासिद्धेः॥ धर्मिसमसत्त्वस्य ज्ञातृत्वस्याभावो हेतुरिति चेत्। न। तादृशज्ञातृत्ववत्यंतःकरणे तदभावासिद्धेः॥ शुद्धे तादृश
ज्ञातृत्वाभावाच्च॥ न द्वितीयः। वृत्तिज्ञाने भागासिद्धेः॥ यदि च सांख्यवेदांतिनां तु करणव्युत्पत्त्या बुद्धिवृत्तिर्ज्ञानमिति विवरणोक्तेर्वृत्तिरसाप्तिस्तर्हि
परोक्षवृत्त्या स्वविषये अज्ञाननिवृत्तिव्यवहारस्य तया न स्युः। ज्ञानसाध्यकार्यत्वात्॥ धर्मी धर्मादिकं जानामीत्यनुभवश्च न स्यात्। किं चात्मनि व्यभि
चारः। तथा ह्यात्मरूपं ज्ञानं सविषयं निर्विषयं वा॥ आद्येपि स्वविषयं परविषयं वा। नाद्यः। स्ववृत्तिविरोधेन परैरस्वीकारात्। ननु स्वकर्मत्वाभावेपि स्व
व्यवहारजननयोग्यत्वरूपं स्वविषयत्वमस्ति। तत्स्वभावस्यापि स्फुरणस्य तद्व्यवहारस्तेन क्रतयात्तद्विषयत्वमिति चित्सु[illegible]वोक्तेरिति चेत्॥ न॥ घटादेव
पि तदन्यस्य ज्ञप्तिकर्मत्वस्याभावात्॥ न हि घटादावपि तदाकारवृत्तिः तत्प्रतिबिंबितं चैतन्यं वा ज्ञप्तिः। तां च प्रति कर्मत्वं [illegible]रकविशेषत्वं वा तज्जन्या
वरणाभिभवरूपातिशययोगित्वं वेत्युक्तं। ज्ञानैकसत्तिदुःखादौ तु ज्ञप्तिरूपत्वादौ चोक्तरूपज्ञप्तिकर्मत्वाभावापातात्॥ ब्रह्मणोपि चरमवृत्तिविषय
स्योक्तरूपांतर्ज्ञप्तिं प्रत्युक्तरूपकर्मत्वापाताच्च। किंतु वृत्त्यभिव्यक्तं घटाधिष्ठानचैतन्यं तज्ज्ञप्तिः॥ न च तस्य घटादावपि व्यवहारादन्यत्कृत्यमस्ति॥
इयांस्तु भेदः। केवलं घटादिः स्वान्यज्ञप्तिकर्म चैतन्यं तु स्वस्वरूपज्ञप्तिकर्मेति। न द्वितीयः। मोक्षे पराभवात्। त्वन्मते च वर्तमानस्यैव साक्षात्कृति
विषयत्वात् वह्निरासीदित्याद्यनुमिताविव साक्षिज्ञाने मोक्षसुखस्यातीतविषयोल्लेखरूपोपपत्त्यापाताच्च। निर्विषयत्वे तु ज्ञानत्वमेव न स्यात्। तद्धि
विषयानुल्लेखित्वं न तु स्फुरितस्य विषयस्यावर्तमानत्वमत्यंतासत्त्वं वा येनातीतादिज्ञाने हेतुकज्ञाने च व्यभिचारः स्यात्। न च कदाचित्सविषय
त्वमात्रेण ज्ञानत्वं। सुषुप्तियोगिकेऽभावादौ सविषयकडक्कादौ घटादिज्ञाने च सविषयकत्वादेः स्वभावत्वदर्शनात्॥ परमगुरुपादैर्मोक्षे

आनंदाप्रकाशापातेश्च। अर्थप्रकाशत्वरूपज्ञानस्वभावाभावेपि ज्ञानत्वघटादेरपि ज्ञानत्वापाताच्च। अर्थाप्रकाशात्मकजडव्यावृत्तेरप्यर्थ
प्रकाशात्मकत्वं विनायोगाच्च॥ एवं ज्ञानत्वाभावादपि न ज्ञानं। न हि भोज्यभोक्तृरहितमुक्तिरस्ति। यदि च ज्ञानस्यानादित्वान्न तदनपेक्षा तत्
र्थं नादेः प्रागभावादेः प्रतियोगिनिजगते रूपस्य च धर्मस्य व्यक्तिरूपे धर्मिणि जीवब्रह्मविभागस्य च धर्मिप्रतियोगिनोर्वेदरूपस्य च
रूपस्य च वक्तृवाच्ययोरज्ञानस्य चाश्रयविषययोः ब्रह्मसत्तायाश्च कर्त्रर्यपेक्षा न स्यात्। तथा चास्ति ब्रह्मण्यादौ कर्तृरिल्लकारेण
स्यात्। अतीतादिज्ञानस्य ईश्वरज्ञानस्य चोत्पन्नार्थविषयाद्यनपेक्षत्वेपि तन्निरूप्यत्वदर्शनेन ज्ञानस्य तात् सेयनिरूप्यस्वभा
वत्वाच्च॥ इदमहं जानामीति ह्यनुभवः। उक्तं हि विवरणेपि। ज्ञातुरर्थप्रकाशस्य ज्ञानत्वदिति॥ तथा च। सत्त्वेयविहीनं तत्र ब्रह्मज्ञानात्मकं य
दि। भोक्तृभोज्यविहीनापि भवेत्तर्हि सुजिक्रिया। किं चात्मज्ञानं चेत् प्रमा भ्रमो वा। नाद्यः। तद्वेद्यस्याविद्यादेः त[illegible]कत्वापातात्। नांत्यः।
दोषजत्वात्। नन्वंतःकरणवृत्तिप्रतिबिंबितः स प्रमा अविद्यावृत्तिप्र[illegible]बिंबितस्तु भ्रम इति चेत् न स्वभावप्रकं[illegible]त्वस्यानुक्तरत्वात्॥ स्वभा
वतो रूपद्वयहीनस्य स्वभावतो ज्ञानमपि न स्यात्। न तृतीयो निरस्तत्वात्। चतुर्थोपि न तावदात्मत्वं जातिविशेषः॥ आत्मन एकत्वात्। वि
शिष्टात्मनां भेदेपि पक्षनिक्षिप्तत्वात्॥ नापि ज्ञातृत्वं वा ज्ञानत्वं वा स्वप्रकाशत्वं वा निरस्तत्वात्। नाप्यानंदत्वं। जन्मादिमत्यनात्मनि वैषयि
कानंदे आत्मानंदत्वासिद्धेः॥ तस्याप्यात्मत्वे नीरपानजाच्च क्षीरपानजं सुखमधिकमित्यनुभवेन वैषानंदस्य मीमांसेत्या श्रुत्या साधनता
रतम्याद्युक्त्या च भिन्नभूमानंदतारतम्यं न स्यात्। अखंडे स्वरूपानंदे भिव्यक्तितारतम्यस्याप्ययोगात्। विरोधिनो दुःखस्य सर्वात्मना अभा
वेपि सुखतारतम्यानुभवाच्च। अंतःकरणवृत्तिरूपज्ञानवत् वृत्तिरूपसुखाभावे हं सुखीत्यनुभवायोगाच्च। अनानंदत्वस्य मिथ्यात्वं प्र



चप्रत्यक्षविकरणासिद्धंत्यभिप्रेतार्थउपक्रमाद्यानुगुण्यप्रेज्ञानेचानाश्वासः स्यादिति प्रमाणतदाभासव्यवस्थानस्यात्। यद्यपि धर्म्यंशेकेवदंत्ता
नांशे परिच्छिन्नत्वविशिष्टमुपजीव्यत्वमस्ति तथापि तन्नबाध्यतोऽशिष्टमेकमंगेवस्यते।। ।।प्रत्यक्षस्योपजीव्यत्वेन प्राबल्यं।। ।।यदि च
प्रत्यक्षलिंगवाक्यं तर्हि ओडुंबरीस्पृष्ट्वोद्गायेत् ऐंद्र्या गार्हपत्यमुपतिष्ठते शरमयं बर्हिर्भवतीति श्रुतित्रयग्राहि प्रत्यक्षं च यथाक्र
मं ओडुंबरीं वासर्वां च प्रपितव्येति स्मृतिरूपेणास्वर्वैवेष्टन श्रुत्यनुमानेनैंद्रसश्रुतिप्रदानुषसंगतिं मंत्रसामर्थ्यंच्छुवेतार्हद्रोषत
ऐंद्र्या गार्हपत्य
श्रुत्यनुमानेनचोदनालिंगसाहस्येराकुशश्रुत्यनुमानेनवाप्रेतेति सर्वैर्वमीमांसोन्मत्तितांस्याः शब्दयो प्रत्यक्षं च तत्रैष्टात्रपु
मित्याविवरणोक्रमात्मप्रत्यापित्वप्रत्यभिज्ञानं चवोद्धुक्ततत्त्वलौकिकत्वानुमित्या बाध्येतेतिकालान्ययोःप्रदिष्टोच्छेदः स्यान्नतथा
चंद्रंगीत्वेपघुत्वंतेत्रेनत्तुतद्धिशेषेसोगोरवादिस्यादित्रकोनुगृहीतेनपधुत्वादिनाशशादेस्तात्त्विकंव्यावहारिकं वाप्यं गंगधर्वव
द्रव्यस्यभूतत्वेनापृथिवीत्वं पदार्थत्वादिनानुमितमतस्याऽनित्यत्वेतु खस्यनिरूपाधिकेषत्वाभावःदुःखस्य निरूपाधिकद्वि
ष्टत्वाभावः असद्वैलक्षण्येन शुक्तिरूप्यस्यापि सत्यत्वं अप्रातिभासिकत्वादिनां प्रपंचस्याद्दश्यत्वेघटवत्त्रित्वादिना दृश्यत्वस्य
मिथ्यात्वाव्याप्यत्वे चस्यादितिव्यावहारिकस्यापिव्यवस्थानस्यात्। नव्यं त्रप्रत्यक्षस्यबाधादन्योदोषोस्ति।। ।।प्रत्यक्षस्यानुमानबाध्यत्वे बा
धकं।। ।।यदिवाक्शेशव्दबाध्यं तर्हि जैमिनिनातस्माद्धूमएवाग्नेर्दिवाददृशेनार्चिरित्यायर्थवादस्य अदितिर्द्यौरित्यादिमंत्रस्य च

तर्हि शब्दबाध्यं।
विमतं दुःखं नात्रैपदार्थत्वात्। पटवत्। विमतं दुःखं निरूपाधिकेषत्वाभाववत्। दुःखवत्पदा
र्थत्वात्। विमतं दुःखं निरूपाधिकद्विषत्वाभाववत्पदार्थत्वात् सुखवत् ४

शुक्तिरूप्यं सत्। असदैलक्षणत्वात् ब्रह्मवत्। प्रपंचोऽदृ
श्यः अप्रातिभासिकत्वात् ब्रह्मवत्। दृश्यत्वं मिथ्यात्वाव्याप्यं
प्रतीतत्वात्। प्रमेयत्ववत् ३

साते ७

असतः विलक्षणत्वेन। शुक्तिरूप्यस्य शुक्तिसत्वापेसत्त्वेनेसध्ये: ३

यथा उडुंबर
स्पर्शाध्येतव्ये
व ६
हेत्वाभासः १

गंधवद्द्रव्यं न पृथि
वीभूतत्वात् जल
वत् ५ अदिति
द्यौरेवमाता इत्य
र्थ अत्रादौ विरो
धेन गुणं रूपदेव
मातरिलक्षणा १

मीमांसायां पंच सप्तवासः आला भिक्षित्वा पेटिकेति संज्ञा २

अन्यशेषत्वात् ३

न्या०पा० इष्टविरोधे नांप्रामाण्ये प्राप्ते तदविरोधाय गुणवादस्तु गुणादविप्रतिषेधः स्यादित्यादिना गौणार्थता नोच्यते तान् सिद्धिरित्यादित
१८ त्सिद्धिये टिकू यौ च यजमानः प्रस्तर इत्यादे गौणार्थता नोच्यते। तत्र याव प्रत्यक्षाविरोधाय तत्त्वंपदयोर्लक्षणा नोच्यते श्रुतिविरोधा
त प्रत्यक्षस्ये वाप्रामाण्यसंभवात्। एतेनाद्वैतवाक्यमनन्यपरत्वान्नामुख्यार्थं प्रस्तरवाक्यादिकं त्वन्यपरमिति वाचस्पत्युक्तं निरस्तं। सावकत्यात् ३
सत्यपि तात्पर्यलिंगे मानांतरविरोधे प्रस्तरादिवाक्यवन्न सोमेन यजेतेत्यादिवचानन्यपरत्वस्येवायोगात् न हि उरूपांम
रे चोदिश्य अहोदर्श नो वेति सिंह इति च शतकृत्वः प्रयुक्तमपि वाक्यं वाच्यार्थपरं भवति न वा तत्त्वमसि वाक्यं षड्विधतात्पर्यलि
गोपेतमपि मानांतरविरुद्धं वाच्यार्थपरं। किं चोपक्रमोपसंहारादिके हि प्रत्येकं तात्पर्यलिंगं। अस्ति च प्रस्तरादिवाक्ये पर्वतात्त्व
तिपृ त्यक्षे च प्रत्यक्षसिद्धे भेदे श्रुतिद्वैकाल्लिंग सिद्धे तात्पर्यलिंगांतरं मत्तु वादकस्येवेति किं तद्वा तुल्येन। यच्चोक्तं वाचस्पतिना।
प्रस्तरादिवाक्यमन्यशेषत्वाद सुख्यार्थं अद्वैतवाक्यं तु न तथा। उक्तं हि शाबरभाष्ये न विधौ परः शब्दार्थ इति तन्न। अन्यशे
षेपि प्रत्यक्षाविरुद्धे लोके इयं गौः क्रय्या बहुक्षीरेत्यादौ काम धेनुरित्यादौ विवांमुख्यार्थत्वेवेदेपि सोंते दीदित्यादौ प्रस्तरादिवा
क्य इव मुख्यार्थेतरनाश्रयणात्। अनन्यशेषेपि सोमेन यजेतेत्यादौ वेप्यधिकरणेनाचाये विरुद्धत्रिकद्रुयायातान्साभाना राम
धिकरणेनान्वये प्रत्यक्षाविरोधाय सोमवतायागेनेति मत्वर्थलक्षणायाः विचारविधायकेव जिज्ञासा सूत्रेज द्विजिज्ञासस्वेत्यादि १८
परः लात्त्वतिको नाकिं त्वर्थवादरूपे विधित त्रैवर्णविकामधेनुरितु कोलत्त
ग्ण्स्यान्त प्रत्यक्षविरोधात। हृद्ध शाब्देः त्वात्ति रेने नल त्वणा प्रस्तरवाक्यवत्त्र
सविरोधाद स्येवेति ३

यदि पूर्वत्वादिमात्रं लोप्येत तदा नान्यथा

सर्ववाक्यानि ब्रह्मणि अमुख्यार्थान्येव किमर्थं मुख्यत्वाग्रहः २ विधौ लक्षणा न भवति अविधौ भवतीति नियमो ऽनियमो नास्ति २

जिज्ञासायाः कर्तव्यत्वेन घटनेऽद्विति विचारेण १

अतो नैवं प्रसक्ताविरोधाय जिज्ञासाशब्देन विचारलक्षणया। सर्वं खल्विदं ब्रह्मेत्यादेरमुख्यार्थतया स्वीकृतत्वाच्च। सर्वस्यापि वाक्यस्या
वाच्यब्रह्मणि लक्षणया एवेष्टत्वेनामुख्यार्थत्वनिषेधायोगाच्च। अत्र वा उपपन्नेत्यस्तात्वर्थानुपपन्ने वा लक्षणादीनामविरुद्धविधिसा
धारणाच्च। शाबरवचने त्वत्र वाद मुख्यार्थत्वाय विधौ लक्षणा न युक्तेत्येवं परं। तस्मादप्रत्यक्षं शब्दबाध्यं। तदुक्तं। यजमानप्रस्तरत्वे
यथानार्थः अतो नैवं विना ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः इति॥ ॥प्रत्यक्षस्य शब्दबाध्यत्वे बाधकं॥ ॥यदुक्तं वाचस्पतिना।
पूर्वस्य प्रत्यक्षस्य परेणागमेनापच्छेदन्यायेन बाध इति। तन्न। न त्वयं स्यामि। पूर्वत्वमात्रेणाप्रत्यक्षस्याबाधकतोक्ता। किं तूपजीव्यत्वेन
न चापच्छेदे पूर्वमुपजीव्यं। किं च। प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे प्रतिहर्त्रपच्छेदनिमित्तसर्ववेतसदानस्य परेणोद्गात्रपच्छेदनिमित्त
दानितपनबाधे विनाप्यंतबाधः प्रतिहर्त्रमात्रापच्छेदे द्वयोरपि युगपदपच्छेदे क्रमेणापच्छेदेपि प्रतिहर्त्रपच्छेदस्य पश्चात्त्वे च यदि प्रति
हर्त्रापच्छिद्येत सर्ववेतसं दद्यादिति शास्त्रप्रामाण्यसंभवात्। अत एवोक्तं तत्र विप्रतिषेधात्तु विकल्पः स्यादित्यधिकरणे द्वयो
र्युगपदपच्छेदे विकल्प उक्तः। किं च। यद्युद्गाताजघन्यः स्यात् सर्ववेतसं दद्यादित्यधिकरणे उद्गात्रपच्छेदस्य प्रतिहर्त्रपच्छेदात्पर
त्वे उद्गात्रपच्छेदनिमित्तकं प्रथमप्रयोगं दक्षिणाहीनेन समाप्य कर्त्तव्यज्योतिष्टोमस्य द्वितीयप्रयोगे तद्दद्याद्यत्पूर्वस्मिन् दास्यन्
दास्यन्नस्यादिति याज्ञिकत्वाद् दक्षिणांशापूर्वभाविप्रतिहर्त्रपच्छेदनिमित्तकपूर्वप्रयोगे सर्वस्वदित्सायाः अबाधेन सर्वस्वेप्यंतः

प्रतिहर्त्रपच्छेदनिमित्तदक्षिणा च दातुमिच्छायजमानः हृदि स्यात् ततः कार्यं इति ता किं तु उद्गात्रपच्छेदे न यंव हिता १

प्रतिहर्त्रोद्गात्रोरपच्छेदाविरित्यर्थः ६

उपच्छेदाधिकरणेपि पूर्वमुपजीव्यं भवेद्यत्र तस्य बाधः स्यात् तदुपजीव्याभावात् पूर्ववाधतत्रापि न सर्वथा बाधः प्रसंगात् सामान्यसंकोचमात्रात् ६

न्या०प० याज्योतिष्टोमे नित्यत्वाद्द्वादशशतन्यासात्तस्मात्तत्र प्रतिहर्त्रपच्छेदस्य सर्वथा वाधः। किंतु प्रयोगांतरे निक्षेप इत्युक्तं। उक्तं हि दुष्टीका
यां। तस्य प्रयोगांतरे निक्षेपः क्रियत इति। अपि चैकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ताभ्यां कृतौ तत्र नैमित्तिककर्त्तव्यतयोर्वदरफ
१९ ले श्यामरक्तरूपयोरिव क्रमेणोत्पत्तेरुपपद्यमानत्वात् शास्त्रद्वयमपि प्रमाणमेव। उक्तं त्वपच्छेदाधिकरणे नैमित्तिकशास्त्रस्यत्व
यमर्थः। निमित्तोपजननात् प्रागन्यथा कर्त्तव्यो विकृत्वर्निमित्ते सत्येवं कर्त्तव्य इति। तत्पदार्थस्येव वदरफलस्येव श्यामरक्त
त्वयेरप्राप्तत्वाभ्यां तस्य पश्चाद्भावाच्च पूर्वशास्त्रस्याप्रामाण्यं। नहि वदरफले श्यामत्वविज्ञानेन अनंतरस्य रक्तत्वस्यावगत्यापि
श्याभवतीति। तस्मान्न पूर्वापर्यविरोधश्च पूर्वाप्रामाण्यमेव च। नियमनात्रास्ति यत्रासावपच्छेदनयोस्तर्वेन। न चैवं प्रकृते प्रत्य
क्षप्रामाण्यस्यावकाशोस्तीति नापच्छेदन्यायः। एतेन सगुणसप्रपंचश्रुतीनां निर्गुणनिष्प्रपंचश्रुतिभ्यामपच्छेदन्यायेन वाध
इति निरस्तं। एतेनैवातत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकं पूर्वस्य वाधकं न्याये सर्पहत्याधवाकयवदित्यानंदवोधोक्तं निरस्तं।
यतः। तत्परत्वमसिद्धत्वात्परत्वे व्यभिचारतः। निर्दोषातान्यथासिद्धेः प्राबल्यं नैव साधयेत्। असिद्धं हि मानांतरविरोधे श्रुतेस्तत्परत्वं
। परत्वे तु प्रमानेंतरधर्मे व्यभिचारि। इदमपि ते च नत्कासेदितिपरं प्रतिमदुमदेत्यादिपूर्ववाधकं। निर्दोषत्वं त्वर्थांतरे प्रामाण्ये राम
नान्यथासिद्धमिति॥ ॥अपच्छेदन्यायवैषम्यं॥ ॥एवं चास्तस्य लिंगादिवाध्यत्वे कालात्ययापदिष्टादेर्दोषतावात्यान्याव्यव १९
नन्वपच्छेदाभ्यामवाध्येदेपि लिंगादिवाध्येएवं पूर्वोक्तेन क्रमेण दोषं मत्वाहएवमिति।

अस्मिन्नशास्त्रमते २
लिंगश्याव त्य

साधनांतरं

स्थापयकं वा वक्तव्यं। अत्रोक्तं खंडने। तत्रोक्तसिद्धस्य शनश्रुतु सत्वांयत्तमानत्वादिवल्लिंगशब्दग्राह्यं सर्वदेषनश्रुत्यनुप्रस्तत्वंय
त्नमानत्वादिकमपिव्यावहारिकं इहत्वक्तसिद्धं सत्वं व्यावहारिकं लिंगशब्दग्राह्यं मिथ्यात्वं तु तात्विकं। एवं चापारमार्थिकमद्वैतं प्रवि
श्यशरणं श्रुतिः। विरोधाद्रुपन्नाख्येनं न बिभेति कदाचनेति। तत्र किं सत्वमिथ्यात्वग्राहीरणो र्व्यावहारिकतात्विकविषयत्वान्न वाध्य
वाधकतैवनेतिभावः। किं वा मिथ्यात्वग्राहितात्विकविषयत्वाद्बाधकमेव न तद्वाध्यमिति। आद्येप्यनुपपत्त्यादिकमनुक्तसिद्धव्यावहा
रिकसत्वस्याभाव मगृहीत्वैवं तदसिद्धस्य तात्विकसत्वस्यैवाभावं गृह्णाति किं वा तत्सिद्धस्यैव प्रतिपन्नोपाधौ तात्विकमभावं
नाद्यः। मिथ्यात्वश्रुतेरप्रसक्तप्रतिषेधत्वापातात् ३। अनुक्तसिद्धस्य सत्वस्य प्रतिपन्नोपाधावभावाग्रहणे तस्य तात्विकत्वापाताच्च
न द्वितीयः। प्रतिपन्नोपाधौ तात्विकतदभावग्राहिणा एवं तद्बाधकत्वेनावाधायोगान्। नोत्पत्तौ उपपत्तिव्यंग्रस्यानुक्तवाधितस्य मिथ्या
त्वस्य तात्विकत्वायोगान्। अयोगे चानौष्ण्यमपितात्विकं स्यात्। एवं चाँदित्यो प्रपंचस्याद्वावपि तात्विकादित्यतो पूर्वस्याश्रित्य शर
णं श्रुतिः। विरोधाद्रुपन्नाख्येनं न बिभेति कदाचनेतिस्यान्। न द्वितीयः मनौष्ण्यमतात्विकविषयांतर्गतेनतत्त्वाद्येनौष्ण्यं न तदत्यस्व
भावं चेन्न तात्विकं न चेदद्वैतस्येवनामांतरं स्यादितिवेत्र विरुद्धं मिथ्यात्वमपिघटादिनुल्यतयाप्रसिद्धेनातात्विकेन नूप्यादिमि
थ्यात्वेन समस्वभावं चेत्र तात्विकं न चेतद्वैतस्यैव नामांतरं स्यादिति सामंपन्नतात्विकत्वमात्रेणाविलक्षणामपि तन्मिथ्यात्व

शुक्तिरूप्यमिथ्यात्वं अतात्विकं तद्गति मिथ्यात्वं तात्विकं रतिवेलक्षण्यं प्रतिपन्नोपाधिबाधितमिथ्यात्व लक्षणामुभयत्रा
पिसममितिचेत् जलानुष्णं अतात्विकं वह्निवह्निस्थत्वं तात्विकमितिवैलक्षण्येपिस्पर्शत्वव्याप्यजातिविरोधउष्णत्वं शीतत्वं तद्वा
न् शीतेगुणात तदाश्रयोद्व्यमित्येवं रूपानौष्ण्यलक्षणामुभयत्र समं १

ओउं अस्य दो
णायेत

सत्वस्य व्यावहा
रिकं मिथ्यात्वस्य
तात्विकं। तस्य
विषयत्वेन स्यात
३

तात्विकस्य मिथ्यात्वानुमित्या बाधे सति सत्यत्वस्य व्यावहारिकत्वं भवति तस्यानुमित्वानुबाधे सति यथा
नभो नैल्यं स्वप्ने न तुल्यं प्रातिभासिकं स्यात्तथैवानोऽस्मन्मपि तद्धि स्वरूपे दायन ५

न्याया० लक्षणमुक्तमिति चेदिदमुपितन्मात्रेणाविलक्षणमपि स्पर्शत्वव्याप्यजातिविशेषवदाश्रयत्वरूपानोऽस्य लक्षणमुक्तमिति समं नन्वप्रा
२० तिभासिकस्यैव मिथ्यात्वं व्यावहारिकं व्यावहारिकस्य तु तात्विकमिति वेत्रजलादिरूपस्य प्रातिभासकोऽस्य स्यांभावरेव व्यावहारिकः
अग्न्यादिरूपस्य व्यावहारिकोऽस्य तु तात्विक इत्यायातानात स्यान्मिथ्यात्वं तात्विकं अनोष्मादिकं तु व्यावहारिकमिति व्यवस्थानपु
व्यवस्था ४ क्ता। अस्तु वा सात्तयापि तात्विकमिथ्यात्वानुमितिबाधे सत्यत्वस्य व्यावहारिकत्ववन्व्यावहारिकानुमत्वानुमितिबाधे नोऽस्य
नभोनैल्यवरस्यार्थक्रियया सह स्वप्नवन्न प्रातिभासिकं स्यान्नात तत्वप्रदीपिकायां तु श्रीऽस्य धीप्रामाण्ये तु पयसंमतिः सत्वबुद्धौ
तु नेत्युक्तं। तत्र रहासंमतो हेत्वभावान्नात तत्वबुद्धौ तु मिथ्यात्वानुमितिः प्रकृत्य तु गृहीतेति नाद्वाध्या इतरानुनेति बाध्येत्युक्तं। त
त्र। मिथ्यात्वप्रकृतेरग्निर्हिमस्पर्शमेव जनमिति प्रकृतेरनुमितहिमनिवारणशक्त्यानुवादित्ववदनु तौ सत्यमिथ्यात्वानुवादित्वोपपत्ते मि ५
ः। मिथ्यात्वेनुमितिस्तर्कानुगृहीता इतरातु नेति चेन्न न तर्कानां मिथ्यात्वानुमितिवदस्वबाधे नात्मन्दृशीकत्वतर्काणामिवाना
तस्य भावात
सत्वान्। उक्तं च सुरेश्वरवार्तिके वोढु प्रति। प्रत्यभिज्ञायमानेऽर्थे तदेवेदमिति प्रवेशाल्लिंगमाभासतामेति प्रत्यक्षार्थविरुद्धदृगिति
न च नोऽस्य स्यैवास्य निरूपत्वान्नस्य चाग्न्यादावेव ग्राह्यत्वान्न तु तदभावानुमा बाधिता। मिथ्यात्वं तु न सत्यत्वाभावः किंतु भवांतरं अ एस
भावत्वेऽपि तत्प्रतियोगी सत्वं ब्रह्मणि प्रसिद्धमिति चेन्न। श्रीऽस्य तदभावयोर्व्यवहारिकत्वतात्विकत्वाभ्यां प्रातिभासिकत्वव्यावहारिक २०
श्रीऽस्य व्यावहारिकमनोऽस्य तात्विकमित्यायातात्।

तत्त्वविशेषेऽयोग्यानुमानत्वसाधनेन तत्र चियोग्यानुमानत्वे सूर्यादौ चिह्नं । तत्त्वमात्रेऽनुमानत्वसाधने शैत्यमेव साध्यं न तत्र तत्त्वाभावरूपानुमानत्वमिति नानुमानबाधः २

नह्युष्णस्यापि रूपत्वे तदभावरूपमनुष्णं साध्यते किं तु औष्ण्यत्वं तदभावात्मकं शैत्यमेवेत्यर्थः ३

न च यत्र व्यापकस्य परिच्छित्तिः स्वसदनेन तान्नमप्रमाणमपि शैत्यवदविलिंगादिकं पुष्टस्य हय्यन प्रकरणादिना [illegible] बलेनापि यथा बाध्यते [illegible] तन्मात्रमधिकरणे ॥१॥

त्वाप्यंशावयवत्वोक्तेः । तत्र प्रतियोगिग्राहिणा उपजीव्यत्वेऽपि हृदधर्म्यादिग्राहिणः सुतरामुपजीव्यत्वाद्वा उक्षमात्रे शैत्यस्य तत्त्वविशेषे वानु
चश्रुतिरूप्यमुपादानमहितंवेत्सककर्त्तृकंभवेत्तत्वेशोजीवोवातस्यकर्त्तेतियुज्यते । नापिनिर्विकारब्रह्मणः श्रोतेजगदुपा
दानत्वनिर्वाहायतत्कल्पनं । सत्यस्यत्रिगुणस्यप्रधानस्यैवतदुपादानत्वेनश्रुत्यादिसिद्धत्वात् । अविद्यायाअप्यनादित्वेनमिर
वयवतयाब्रह्मवद्देवविकारायोगात् । किंचब्रह्मणउपादानत्वेपिनाविद्याकल्पा । तद्वीत्याब्रह्मणएवतात्विकाविकाराविरोधा
दतात्विकविकारेणाश्रुत्यादिवशविवर्त्ताधिष्ठानत्वरूपोपादानत्वोपपत्तेः । अन्यथा ऽविद्योदेराश्रयसाधेसस्यसद्वितीयस्यात
त्वनो ऽद्वितीयात्ब्रह्मणोन्यदधिकरणंकल्प्यंस्यात् । नचपरिणामित्वेनाविद्याकल्पनेअसत्वस्यसत्यरूपांतरापत्तिरूपपरिणा
म्यनयेन्नत्वात् । नचकार्यापेक्षितस्वसत्वसमानसत्ताकोपादानत्वेनैतत्कल्पनारूप्यादेर्विवर्त्ताधिष्ठानरूपोपादानेनतिद्व
त्तोपादानाकांक्षास्यापिघटादिदृष्टांतेनोत्तोपादानकल्पनेकार्यस्यस्वसमानसत्ताकोपादानापेक्षत्वेनासमानसत्ताकस्य राम
ब्रह्मणोविषदादावनुपादानत्वापातात् । नृप्येस्वसमानसत्ताकनिमित्तस्यापिकल्पनायातावनेवद्गीवस्यानवस्थित्वंब्रह्मानंदप्रकाशा ७७
द्यणाद्युपादानस्यकार्यसमानसत्ताकत्वंदृष्टंतद्दृष्टांतेनोपादानस्यान्यत्रापिकार्यसमसभाकत्वकल्पनेपरमार्थसतोब्रह्मणःश्रुत्युक्ताकाशाद्युपादानत्वंनस्यात्ब्रह्मणआकाशसमसत्ताकत्वभा
वात् । अवकाशसत्वव्यावहारिकं २ काचकामलादेरपिप्रातिभासिकत्वंस्यात् इत्यर्थः ९

ह्रि त्वानंदेन प्रकाशते तदविद्यैवेति चेत् ईश्वरात्जीवस्याभिन्नत्वादेव जीवानंदस्यावच्छिन्नत्व एवाईश्वरानंदस्य परिमितत्वेवं १
यथारूप्यं प्रमाणरूपानुव्यवसायवेद्यं परं तु भ्रमविषयत्वेन न तु साक्षात् दृष्ट्यमतस्तन्मिथ्या। तद्वदत्र प्रमाणानि साक्षिविषयाविद्याइति साक्षिविषयत्वेनाविद्यां बोधयंति चेत् तदा मिथ्यात्वं घटते तत्तु न २ अत्र तु प्रमाणा-
नि साक्षादेवाविद्यां बोधयंति अतो न मिथ्या सा ७ नेदं रूप्यमिति बाधगोचरस्य रूप्यस्येव यथा मिथ्यात्वं एवं निषेधत्वेन प्रमाणानि अविद्यां बोधयंति चेत् तदा मिथ्यात्वं घटते तत्तु न अत्र तु सत्वेन बोधयंति। अतो न
मिथ्यात्वं ज्ञाननिवर्त्यत्वेनाप्रामाणिकत्वं न सिद्ध्यतः किंत्वनित्यत्वं। प्रकाशनिवर्त्यांधकारवत् ८

जीवस्थानव ४

यत्तत्कल्पनं तेदेनैव तदुपायत्ते:। अनवच्छिन्नानंदस्यापि प्रकाशमानप्रत्यैरूमात्रत्वे प्रकाशानुपपत्तेश्च॥ ॥अविद्यार्थापत्तिभंगः॥ ॥
किंच त्वन्मते अज्ञानस्याप्रामाणिकत्वात् कथं तत्र प्रमाणोक्तिः अविद्यायामविद्यात्वमिदमेव तल्लक्षणं। मानाऽयातासहिष्णुत्वमसाधार
णमिष्यतरत्तिहरेष्वरोक्तेः। न चातीनस्यव्यावहारिकत्वात्तत्र प्रमाणोक्तिः। प्रातिभासिकोपादानेप्रातिभासिके अज्ञाने तदुक्त्यनुपपत्तेः॥
न हि व्यावहारिकं प्रातिभासिकोपादानं। न च प्रातिभासिके मानमस्ति न च साक्षिसिद्धे ज्ञाने प्रमाणोर सद्भावहत्तिमात्रं बोध्यत इति वाच्यं।
नित्यनिर्दोषसाक्षिवेद्यत्वे तु तरां प्रामाणिकत्वापातात्। तमआसीदित्यादौ सत्त्वस्यैव बोधनाच्च। उक्तानुमानेषु तदप्रतीतेश्चानत्य
नुमानेविव ज्ञापरत्वं प्रमाणोर ज्ञानस्वरूपाग्रहे तत्रासद्भावहत्तेर्बोधत्वाद्ज्ञानच प्रमाणानि साक्षिवेद्यत्वेनाविद्यां बोधयंति येन भ्रम
विषयत्वेनानुव्यवसायवेद्यस्य रूप्यादेरिवाप्रामाणिकत्वं तस्या न। न च प्रमाणानि प्रतियन्नोपाधौ निषेधप्रतियोगित्वेनाविद्यां बोधयंति।
येन तथा बाधगोचरस्य रूप्यादेरिव प्रमाणिकत्वं नेस्याज्ञाननिवर्त्यत्वेन प्रकाशनिवर्त्यांधकारवदनित्यत्वस्यैव बोधनात्॥ ॥
सामान्येनाविद्याप्रामाण्यभंगः॥ ॥किंच अविद्या किं शुद्धसाक्षिचैतन्येनैव भाति। किं वा वृत्तिप्रतिबिंबितेन वा नाद्यः। निर्दोषवित्प्रकाश्यत्वेना
ज्ञानस्य पारमार्थिकत्वापातात्। रामोऽहं पितृतप्रतीत्यापत्तेश्च तदाहानिवृत्तत्वाच्च भातीति चेन्न। न प्रतीतिमात्रशरीरस्य प्रतीत्यनुवृत्तौ निवृत्ययो
गान्। एतेनाज्ञानस्य राहुवत्स्वावृततत्प्रकाशेनैव स्फुरणमिति निरस्तं। नोत्यः अज्ञानस्य कदाचिदप्यप्रतीत्यापातात्। अतः करणाविद्या

भासकस्य शुद्धचैतन्यस्य सत्त्वात्तदानीं १ प्रतीतिमात्रशरीरत्वाद् विद्याप्रतीतिरेवमानेसरप्रतीतिमोक्षेप्यास्ति अविद्यायाः २ यथा राहुरावृतसूर्यस्यैव प्रका— शयति एवमविद्यान्तं तं चैतन्यं अविद्या प्रकाशयतीतिचे
तेनाशक्रुनावंद्रप्रकाशेनाध्रियते। पितृसमीपावस्थानमात्रं अतः चंद्रेण प्रकाश्यते सः अत्र तु आवरणेनानंदा ध्यायत्ति।

ऽसदा प्रमाणं नास्ति दोषोपि नास्ति ... तदा प्रमाणाज्ञातःकरणस्याभावेन दोषज्ञाविद्यावृत्तेरप्यभावेन अज्ञाने अमेव वर्तिष्यते [ज्ञान १] तैं तत्र अज्ञानस्य ... ज्ञाते कसत्वात १ शुद्धचैतन्यवेद्यते इप दास्तैसत्व प्रतीति
स्तदानत्वति विंवित्वेन साक्षि प्रतीतिः साक्षिप्रतीतो ह्यत्रिसत्वप्रतीतिः २ औपचारिकज्ञानविरोधिन औपचारिकाज्ञानत्वं न तु मुख्याज्ञानत्वं ८ अंतःकरणपरिणामे हि मो ज्ञायते ऽनेनेति क ... नुत्पन्नज्ञा
ज्ञानसाधनत्वात ज्ञानमिति औपचारिको व्यवहारः। एवं औपचारिकज्ञानेन औपचारिकाज्ञानस्यैव निवृत्तिः मुख्यब्रह्मरूपज्ञानेन मुख्याज्ञानस्य निवृत्तिः न तु औपचारिकज्ञानेन मुख्याज्ञाननिवृत्तिः ८

तेसमाप्ति ३

पा॰ १० वृत्त्योः प्रमाणदोषाभ्यां जन्यतयोभयाभावेन वृत्त्ययोगाद्वा वृत्तेरपि वृत्त्यंतरप्रतिविंबितसाक्षिवेद्यत्वे न वस्थापाते न तदप्रतिविंवितैतद्वेद्य
७८ त्वे मोक्षेपि वृत्तिप्रतीत्यापाताद्वा प्रतिविंवनोपाधित्वप्रयोजकस्य सत्वस्य पारमार्थिकत्वेन प्रातीतिकत्वावृत्तेः प्रतीत्यधीनान्योन्याश्रयाद्वा ॥ ॥
अविद्याप्रतीतिभंगः ॥ ॥ अविद्याश्रयश्च दुर्वचः। यद्यत्रोक्तं विवरणेतद् अन्यस्याज्ञानकल्पितत्वे न तदाश्रयत्वायोगात्। तदुक्तं। आश्रयत्ववि
षयत्वभागिनी निर्विशेषवितिरेव केवला। पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचर इति। दर्पणस्य मुखमात्रसंबंधेपि प्र
तिमुखे मालिन्यवत् प्रतिविंबे जीवे संसारः न तु विंवे ब्रह्मणि संसारः उपाधेः प्रतिविंबपक्षपातित्वादिति। अत्र ब्रूमः। विरोधाद्युभिमाने
नवाधाश्रुतिविरोधतः श्रांत्यैकाधिकारणत्वाद्वा ज्ञाने शुद्धविरुद्धतां तथा हि। एकविषयज्ञानभावरूपाज्ञानयोस्तमःप्रकाशयोरिव
विरुद्धत्वात्। आश्रयाश्रयित्वं न हि ज्ञानानिवर्त्यमज्ञानं भवति न च वृत्तिज्ञाननिवर्त्यत्वेनाविवरणेतः करणपरिणामज्ञानत्वोपचारादि
तु रूढत्वेनौपचारिकज्ञानविरोधिनो मुख्याज्ञानत्वायोगात्। अज्ञानाविरोधित्वे चैतन्यस्य घटादिवज्ज्ञानत्वायोगाच्च। ज्ञानाज्ञाने हि
ज्ञातुरर्थप्रकाशाप्रकाशौ। न च तदविरोधित्वेपि व्यवहारादिहेतुत्वात् ज्ञानत्वं। अज्ञाननिवर्तकस्यैव तद्धेतुत्वानुभवात्। ज्ञानवदवि
रणोकरणाश्रुत्यपाद्बुद्धिवृत्तिर्ज्ञानमित्युक्तत्वेनाज्ञाने ज्ञानकरणं विरोध्येव न ज्ञानमिति विरोधीति वा। यन्न जानामीति ज्ञानविरोधित्वेनानुभूयमान राम
स्याज्ञानांतरत्वापातात्। साक्षिवेद्यसुखादावज्ञानादर्शनाद्वा। चैतन्याज्ञानयोः सौरप्रकाशदिवाभीतांधकारयोरिव सत्यत्वमिथ्या ७८

ज्ञातुरर्थप्रकाशो ज्ञानं। ज्ञातुरर्था प्रकाशोऽज्ञानं ३ अज्ञाननिवर्तकमेव व्यवहारहेतुर्न तु व्यवहारहेतुरन्य एव अज्ञाननिवर्तकमन्यदेवेवा अनेन अंतःकरणवृत्तिरूपज्ञानस्यैवाऽज्ञाननिवर्तकत्वात्
देवव्यवहारहे ३ अत एव अज्ञानं शुद्धब्रह्मज्ञानविरोधित्वेन प्रतीतमस्ति अतोऽत्र अज्ञानांतरमेवावृत्तिज्ञानविरोधित्वानुभवाभावात् २

यथा कुन्त कं तमस्य व्यतिरिक्तं तमः शैत्यालोकसमसत्ताकं सौरप्रकाशविरोधि । एवमत्र चैतन्यप्रकाशविरुद्धं अन्यदज्ञानं चैतन्यप्रकाशसमसत्ताकं नास्त्येवेति द्रमेवैकमज्ञानं चैतन्याविरोधि अंगीकार्यं तस्य तद्व्रैतं
न्यसामानाधिकरण्यं पर्यवस्यतीति १ चितोः ज्ञानाश्रयत्वसिद्धौ अहमज्ञ इति ज्ञानस्य भ्रांतिसिद्धिः भ्रांतिसिद्धौ अन्यस्याश्रयस्याभावात् भ्रांतिकमज्ञानं चैतन्यस्वरूपप्रकाशेनास्ति किंतु व्यावहारिक
मस्तीति चेत् २ यथा देहेनाहंकारस्येवाध्यासात् ... त्वाद्यो देहधर्मा अहंकारे प्रतीयंते एवं चैतन्येनाप्यहंकारे तेवाध्यासात् चैतन्यनिष्ठमज्ञानं अहंकारे भासते । यथा वा लोहस्याग्निसंबंधात्संयोगात्
अग्निनिष्ठं दग्धृत्वं लोहे भासते । एवं अज्ञानाहंकारयोराश्रये भ्रांतिः अज्ञानं अहंकार इति वा भ्रांतिरेवेयं न त्वज्ञानमहमर्थनिष्ठं ३ ज्ञानस्य अहमर्थनिष्ठत्वप्रतीतिर्भ्रमः इति ४

ज्ञानस्य अहंमर्थनिष्ठत्वप्रतीतिर्भ्रमः इति ३

त्वान्याप्यविरोधादाश्रयाश्रयितेति । यथा व्योम्नि सौरप्रकाशविरुद्धसमसत्ताकतमोंतरस्येव चैतन्यप्रकाशविरुद्धतत्समसत्ताकाज्ञानांतरस्याभा
वेनार्तविकाज्ञानविरोधस्येव वाच्यत्वात् । अन्यथा तात्विकस्वरूपस्यात्मनो व्यावहारिकदुःखरूपता स्यात् । किंवाहमज्ञ इति धर्मिग्रा
हकसाक्षिवाधः । न चात्मनि ज्ञानाश्रयदेहे व्याध्यादहं स्थूल इतिवदहंकारे अज्ञानाश्रयं विदे व्याध्यासाद्वाद ग्धृत्वायसोरेकाग्निसंबं
धात्त्वयो दहतीतिवत् अज्ञानाहंकारयोरेक चिदध्यासाद्वा अहमज्ञ इति धीर्भ्रांतिरितिवाच्यं । अघ विचितो ज्ञानाश्रयत्वासिद्धौ अन्ये
न्याश्रयात् । होषाज्ञन्यस्याहमज्ञ इति साक्षिज्ञानस्य भ्रांतित्वायोगाद्बाधकाभिमतस्येव धर्मिग्राहकेत द्वाधितत्वेनैतद्वाधकाभावाच्च ।
मिथ्यात्वेऽप्येतस्य संबंधवद ध्यस्ताज्ञानसंबंधस्यापित द्ग्राहकेणैव ग्राह्यत्वाच्च । अज्ञानाश्रयत्वधीवत्ताद्रूप्येऽहमर्थः कल्पितो वा विद्यायामनुप
पत्तिरलंकारो वा स्तु । किं च निरंजनिष्ठो निरुपविघः शोकं मोहमत्येतीति नित्यमुक्तः इत्यादिश्रुतिविरोधः । नहि मोक्षं नदोषः । नापि वंधकाज्ञा
नाश्रयो मुक्तः । न वतात्विकाविद्यादेरेव निषेधः । तन्मते तस्याप्रसक्तेः । जीवेऽपि तदभावेन जीवब्रह्मतोः सावद्यत्व निरवद्यत्वाद्विभव
त्वाश्रुतिविरोधाच्च । मुक्तेऽपि त्वविनिविन्मात्रे जीवद्वशोकस्य तात्विकस्याभावेऽपि मोहव [illegible] व्यावहारिकस्यायाताच्च । न च श्रुतौ मोह
शब्दस्तत्कार्यपरः । मुख्यार्थहानेः । तत्कार्यस्य शोकादेः पृथगुक्तेश्चानचेयं श्रुतिर्व्यवस्थानीयब्रह्मपरा जीवेऽप्यज्ञानाभावे नज्ञातादीशा
नी शा वित्यादि श्रुति जीवे ज्ञानी शत्वो क्त्ययोगात् । यन्मात्रा वा युक्तिः स्तद्धि न्मात्रे सावद्यमन्यन्निरवद्यमित्यस्य विरोधाच्च । न व जीवस्येव शु

ज्ञानेवाऽज्ञान १

इदं रूप्यमत्रयेन न रूप्यं गृहीतं तेनैव यथा रूप्य [illegible] इदं पंशयोः संबंधोऽपि गृह्यते । एवं येनाज्ञानं गृहीतं तेनैव तद्भिन्नस्याहमर्थस्य संबंधोऽपि गृहीतः ६ अविद्यायुक्ता यथा चेत शोकादिकमपि तद्वशद्यग्रमेवास्तु
। शोकाद्याश्रयत्वे नित्यमुक्तश्रुतिविरोधः । ५ तिज्ञानस्य [illegible] सवीत्यर्थः ४ तत्वतो जीवे पिशोकाद्यभावेन ४ यथा जीवे वस्तुतः शोकमोहादिकं
नास्ति व्यावहारिकं स्वीक्रियते एवं एवं चिन्मात्रे पि तात्विक शोकाद्यभावे पि व्यावहारिक शोकादिकमस्तु ३ मोहस्य पृथगुक्तिः तत्कार्यशोकादेः पृथगुक्तिः मोहशब्दः मोहकार्यपर श्चेत् पृथगुक्तिः किमर्थाः २
शोकमोहमत्येतीत्यादिः २ वास्तवं शोकादिकं चिन्मात्रे [illegible]

भ्रांतौ वाधकं तत्वे
नियामकं अ
हमज्ञ अज्ञवा
धकं न दृश्यते
वाधकं चेत्त्व
येव कल्पितं तदा
साक्षिग्राह्यस्या
हमज्ञ इति ज्ञा
नस्य प्रमाण्यं
प्र साक्षिग्राह्यत्वेन
वेत्यवज्ञात अनेनैव
दोधकाभिमतं वाधनं
तस्य अहमज्ञ इते
व साक्षिवाधः ५

यथा बुद्धिस्थकर्तृत्वं चैतन्ये ध्यस्तं बुद्धिस्थभोक्तृत्वमपि तद्वेवाध्यस्थं तथा बुद्धिस्थं ज्ञातृत्वं यथा चैतन्ये ज्ञातृत्वमपि तत्रैवाध्यस्तं एवं बुद्धिस्थं अंशैव प्रमातृ चैतन्ये ध्यस्तमस्तु नंतु शुद्धे ४
शुद्धे एवं ज्ञातृत्वं चेत् यत्र ज्ञातृत्वं तत्रैवाज्ञानमिति नियमात् ज्ञातृत्वं जीवे तत्रैवाज्ञानमस्त्विति जीवाज्ञानमतं ६ यत्र विशेष्यविशिष्टभावोस्ति तत्रैव विशेष्यस्थं वस्तु न विशिष्टे स्वकार्य हेतुर्भवतीति नियमात् ७
विशेष्ये एव तत्त्वज्ञाने तेन विरुद्धं नाशः ८ ज्ञानमपि २

न्याय० ७९ इस्यात्त्वेष्कृत्याघस्ति। किं च शुद्धस्याज्ञानवन्न ज्ञातुरर्थप्रकाशत्वमिदमप्यज्ञानं स्वकार्यैर्भ्रांतिसंसारादिनास्वनिवर्त्तकेन तत्त्वज्ञाने
न स्वसमानयोगक्षेमेण ज्ञानप्रागभावेन च सामानाधिकरण्याय ज्ञात्रात्मनिष्ठं न तु ज्ञानमात्राश्रितं। उक्तं हि विवरणेपि। तदुक्तं स्वाज्ञाना।
श्रयत्वे भ्रांतिसम्यग्ज्ञानयोरपि तदाश्रयत्वप्रसंगादिति। चिन्मात्रेपि ज्ञातृत्वाध्यासोस्तीति चेत् न। तस्याविद्याधीनत्वेनान्योन्याश्रयात्।
चैतन्ये बुद्धिस्थकर्तृत्वाध्यासेन तस्य भोक्तृत्वाध्यासवन्न बुद्धिस्थज्ञातृत्वाध्यासेन च तस्याज्ञानाध्यासाय ज्ञातुर्बुद्धेरेवाज्ञानाश्रयत्वा
पाताच्च। देहादावपि ज्ञातृत्वाध्यासस्संभवाद्वा बुद्ध्यवच्छिन्न एव तद्धर्माणां ज्ञातृत्वकर्तृत्वभोक्तृत्वानामध्यासेन चिन्मात्रे तदभावाद्याते
षां चिन्मात्र एवाध्यासे तु ज्ञातृत्वादिमत्येवाज्ञानांगीकारे तज्जीवाज्ञानमतं स्यात्। न च शुद्धस्याज्ञानमपि शुद्धस्य वच्छिन्नचैतन्यस्यमेवाऽहं
जानामीच्छामीतिवत् न जानामीति ज्ञानस्य त्वानुभवात्। न च विशेष्यविशिष्टभावस्येव तंत्रत्वाद्विशेष्यस्थमज्ञानं विशिष्टे जीवे संसा
रहेतुः विशिष्टे तत्त्वधीविरुद्धं चेति वाच्यं। विशिष्टे ब्रह्मण्यपि संसारापातात्। देहं प्रति विशेष्याहंकारस्य कर्तृत्वेन देहे विशिष्टे भोक्तृ
त्वापातात्। विशेष्यस्तु शुद्धे विशिष्टस्य संसारविरोधापातीथ। एतेन विशेष्यविशिष्टयोरध्यस्तमेकत्वं तत्रमिति निरस्तं। न चोपाधेः प्रति
बिंबपक्षपातित्वस्वाभाव्याज्जीवे संसार इति वाच्यं। अत्यादिविशेषे साम्ये अर्धजरतीयायोगेन चिन्मात्र एवाज्ञानस्येव संसारस्याप्युपगी राम
कापीत्वात्। प्रतिबिंबस्य ह्युपाध्यादिवहत्वं तस्वाद्वा। अवाक्पस्य चैतन्यस्य गंधरसादिवत्प्रतिबिंबनानर्हत्वाच्च। प्रतिबिंबत्वे जीवस्यहा ७९
देहे मते देहंत्य क्रागतस्य विशेष्यरूपाहंकारस्य तद्देहविशिष्टत्वेन भोगो न दृश्यते ४ तद्देवं विशिष्टे संसारहेतुत्वेनिरासमकं ३ यत्र विशेष्यविशिष्टभावोस्ति तत्रैव शुक्त्यायथा संसारे तेनिषिध्यते तद्दत्तान
मपिनिषिध्यते अथचाज्ञानं तत्रस्थी क्वचित् ... संसारोपि स्वीकार्य एव ३

व्यापकत्वात् सर्वत्रैवास्ति सदैव २ अविद्या सर्वत्र चेतन्यवद्व्याप्ता न तु चितः सन्मुखे एकदेशे ३ सर्वा व्यवि द्याघटपटादिरूपेण परिणतानतु तत्प्रतिबिंबस्य विनाशोऽस्तु २ सुषुप्त एव ५
तच्छिन्नत्वं ब्रह्मणि तथा तस्य जीवेपि ह यत्राधिकरणता अज्ञानस्य चिन्मात्रे नास्ति तत्रापि चित्वमस्तीति तेन तत् तदधिकरणतावच्छेदकं इत्येकनिष्ठासाधारणो धर्मः अधिकरणतावच्छेदकं कोऽपि नास्ति तु साधा
रणः। नहि [illegible] यद्वत्त्वं गंधाधिकरणतावच्छेदकं पीत्वा इत्यतस्मज्जलेपि हेतित्वात् ६

किंसुषुप्ति १

दित्वायाताच्च। सूर्यस्य जलइवमरीचिकाजलेषु अप्रतिफलनेन विदसमसत्त्वाकस्याज्ञानस्य वितं प्रत्युपाधित्वायोगाच्च। अस्वच्छद्रव्यस्या
ज्ञानस्य प्रतिबिंबनोपाधित्वायोगाच्च। अविद्यायांश्चिन्मात्राभिमुख्यभावो ह्यागपार्थरज्ञानस्याकाशात्मना परिणामे प्रतिबिंबोपायापातात्ताच्च। सु
खप्रतिमुखं ह्यनुगतसुखत्वातिरिक्तसुखमात्ररूपव्यक्त्यंतरस्य जीवब्रह्मानुगतचित्त्वातिरिक्तचिन्मात्ररूपस्याज्ञानाश्रयत्वयोग्यव्यक्त्यंतरस्य
चाभावाच्च। अनादिभावो नर्निवर्त्तत इति सामान्यव्याप्तेरज्ञानं ज्ञाननिवर्त्यमिति विशेषव्याप्त्यैवोपाधिप्रतिबिंबपक्षपातीतिसामान्यव्याप्ते
रज्ञानस्याश्रय एव भ्रांत्यादिहेतुरिति विशेषव्याप्त्या बाधाद्यौ वंधुस्य चिन्मात्राश्रितमोक्षसामानाधिकरण्याच्च। नच व्यक्त्यंतराभावेपि जीवाश्रि
तमेवाज्ञानं। चिदाश्रयत्वोक्तिस्तु चित्त्वस्याधिकरणतावच्छेदकत्वादिति वक्तं। अन्योन्याश्रयादेर्वक्ष्यमाणत्वात्। ब्रह्मण्यपि तद्भेसक्तस्य चित्त्वस्या
धिकरणतानवच्छेदकत्वाच्च विशिष्टरूपविशेष्यमात्राज्ञानेन विशिष्टे संसार इति निरस्तं। किंचोपाधेः प्रतिबिंबपक्षपातित्वं किं तत्र स्वधर्म
प्रतिभासकत्वं स्वकार्यप्रतिभासकत्वं वा स्वकार्यनिष्ठधर्मप्रतिभासकत्वं वा प्रतिबिंबे प्रतिस्वविषयाह्लादकत्वं वा। नाद्यः। मालिन्यादेर्दर्प
णादिति षष्ठत्ववैतत्त्वदुष्पर्यनुहन्तस्याविद्यारूपस्य वा अविद्याच्छिन्नत्वरूपस्य वा तत्प्रतिबिंबितत्वरूपस्य वा सुषुप्त्याद्यनुवृत्तस्य कर्तृत्वप्र
मातृत्वादिरूपस्य वा संसारस्याज्ञानविषयत्वाभावात्। ज्ञानक्रियासंस्काराणां च तत्त्वन्यते उज्ञानस्य त्वेपि नित्यातींद्रियाणां तेषामनुम
त निकटाप्यप्रतीतेः अविद्यास्तमयो मोक्षः सा संसारदशा हि इति तु न्यतेपि त्यविद्यावंधिकावंधो वा न तु वद्धा। न द्वितीयः। विदेहादेरूपा

हित्वा संसारादि स्वधर्मं चेतन्ये प्रतिभासयति तत्तु नास्ति ३ अविद्यावच्छिन्नावदा। विद्या भवेत् अविद्यां यदा विद्याप्रति
सुषुप्त्याद्यनुवृत्तस्याविद्यारूपत्वादि प्रकारसंसारः यदि अविद्यारूपो याधोस्यात्तदा सा ईदृक् संसारादिस्वधर्मं चेतन्ये संक्रामयेत्तत्तु नास्ति अविद्याया एव संसाररूपत्वात् ३ ज्ञानरूपायाक्रियासंस्कारास्तु तेषां २ उपाधिनास्वकार्यप्रतिबिंब एवा १
बिंबितास्यात्तदा तद्रूपकार्यसंसारं चेतन्ये संक्रामयेत्

धिकार्यस्य विंवे महाकाशेवदर्शनात्मुखस्येविंवतादेर्ब्रह्मस्य सार्वज्ञादेश्चानौपाधिकत्वापातात्। प्रतिमुखस्यौल्पादेरुपाधिकार्यत्वे पीह जी
वगतस्य संसरस्यानादित्वेनाकार्यत्वाच्च। नतृतीयवतुर्थौ दर्पणाद्युपादावदृष्टेः। एवं बुद्धिरूपोपाधिरपि न प्रतिविंवपक्षपातित्वं तस्य प्रतिविंवाप
क्रमपातिन्नपानुसमस्यानीयत्वेनपक्षपान्याद्दर्शस्यानीयत्वाभावात्। नर्वस्तु तर्हि विन्मात्रस्येवाज्ञानं संसारश्च। तदन्यस्य मिथ्यात्वेन मोक्षसमा
नाधिकरणं वंधायोगाच्च। नित्यमुक्तत्वश्रुतिस्तु विंवस्थानीयब्रह्मपरेतिवेत्। न। घटदर्पणोपाधिकयोः परिछिन्नत्वेनाभासितन्वयेरवछिन्ना
काशप्रतिविंवयोरिवाकाशमात्रमुखमात्रयोरदर्शनेन अवछेदपक्षे प्रतिविंवपक्षे वास्यायोगात्। विंवे ब्रह्मणीव प्रतिविंवेपि संसाराभावे
नजीवब्रह्मणोः सं[redacted]सारासंसाराव्यवस्थाश्रुत्युपयोगाच्च भवतां किंकादिमते आत्मनि दुःखाद्याश्रयतादेहादिने
वेहापि चिन्मात्रे संसाराश्रयताजीवंत्वेनावछिन्नात्तदभिप्रायावश्रुतिरिवार्थ्यं। तन्मते आत्मनश्चवात्रापि वितएवानर्थान्वयेन तन्म्हा
वरूपमुक्तेरपुमर्थत्वापातात्। नित्यमुक्तत्वश्रुतेर्निर्विषयत्वापाताच्च। नहि साकल्पितविशिष्टविषया। अथ जीवोनावछेदोनापिप्र
तिविंवः किंत्वविद्यया ब्रह्मणएव जीवत्वं राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्त्तते। यथैवमात्मनोज्ञस्य तत्त्वमस्यादिवाक्यात् इति वार्त्ति
केकं कश्चित्किलराजपुत्रोव्याधगृहे संवर्धितइति वृहदारण्यकभाष्ये चव्याधवर्धितराजपुत्रदृष्टांतोक्तावह्मेवस्याविद्यया संसार इति तिस्त्व
विद्यया चमुक्तमतइति स्वीकारात्। नित्यमुक्तत्वश्रुतिस्तु तैवतत्वतः कदापि संसाराभावाभिप्रायेति चेत्। न। यादृशां कल्पितोप्यनर्थ राम ८०

रूपोऽज्ञाने नो छेद्यो वेधः सदा तदभावस्यैव तदर्थत्वे मकल्पितेनापि संसारेणास्पृष्टचैतन्याभावे नित्यमुक्तत्वश्रुतेर्निर्विषयत्वापातात्।
अन्यथा मुक्तौ शोकाभावश्रुतिरपि शोकस्य तात्विकत्वनिषेधपरा स्यात् अत एव सर्वज्ञत्वादिनानुभवसिद्धाज्जीवादन्यस्य चेतनस्याभावेन स-
र्वज्ञत्वादिश्रुतेर्निर्विषयत्वापातात्। बहुजीववादे ब्रह्मभावरूपमुक्तेरपुमर्थत्वापातात्। एकजीववादे जीवब्रह्मणोः संसारासंसारित्व-
वस्याश्रुतिविरोधाच्च। तयोर्व्यावहारिकभेदस्याप्यभावेन त्वन्मतेऽपि तत्त्वमसिर्द्वा सुपर्णा य आत्मनि तिष्ठन्नित्यादिश्रुतिभिः। अन्यश्च परमो रा-
जन्न तथान्यः पंचविंशकः तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतपेत्यादिस्मृतिभिः शारीरश्चोभयेऽपि हि भेदेनैनमधीयते। भेदव्यपदेशाच्चान्य
इत्यादिसूत्रैः तस्माच्छारीरादन्य एवेश्वर आत्मा नो हितानुभौ वेतनो एकः कर्त्ता भोक्ता अन्यस्तद्विपरीतोऽपहतपाप्मत्वादिगुणत्वा-
दित्वश्राव्योऽस्तत्वज्ञानसंसरतोचावदाततत्वप्रामत्वादिवन्ने कत्रावतिष्ठेते इत्यादिविवरणादिग्रंथेष्वविरोधाच्च किंच चिन्मात्रस्याज्ञा-
नेस्वाभाविकं वेदानंदादिवन्न निवर्त्तेत। औपाधिकत्वे उपाधिः स एव चेदात्माश्रयः अन्यश्चेदन्योन्याश्रयश्चक्रकमनवस्थेति॥ ॥अज्ञान-
स्याविवरणोक्तचिन्मात्राश्रितत्वभंगः॥ ॥किंच त्वन्मते शुद्धब्रह्मणश्चिन्मात्रत्वेऽपि श्रुत्यादौ तस्य सर्वज्ञत्वात्कथमज्ञाने। सर्वं हि यो विजा-
नीते तस्य कुत्रापि नाज्ञानानं हि यो यद्विजानीते स तत्राज्ञानवान् भवेत्। सविशेषमेव ब्रह्म सर्वज्ञतामिति चेन्न। नातुरीयं न तत्सर्वदृक् सदेति
श्रुद्धैतस्क्तेः। एतेन सर्वज्ञत्वं भ्रांत्या प्रमाणतो वास्तवरूपत्वया वाते धाप्यविद्यासिद्धिः भ्रांतेः प्रमा[illegible]त्वादेश्चाविद्यामूलत्वात्। अप्रसंगस्त्व

पक्षप्रेक्षाविद्यां विनाविषयासंगतेः। उक्तं हि स्वरूपतः प्रमातो वा सर्वज्ञत्वे द्विधास्थिते। तद्वीभयं विनाविद्यासंबंधं नैव सिध्यतीति निरस्तं। अवि
द्यारहिते तुरीये पि सार्वज्ञ्यश्रुतेः। एकाश्रयैकविषयकज्ञानाज्ञानयोर्विरोधस्यानुद्धाराच्च। स्वरूपज्ञप्तेः स्वतः कानाद्यसंबंधे असत्त्वापातेन स्व
तः सर्वसंबंधाभावे असर्वगतत्वापातेन चाविद्ययैव स्वत एवान्येनाविसंबंधोपपत्तेः। असंगश्रुतेस्तु गतिरुक्ता। एतेन ब्रह्मणो ज्ञान
त्वमुपेत्याज्ञानं वदंतो निरस्ताः। तदुक्तं अज्ञानाखिलसंवेत्तुर्यदृते न तु तत्स्वनेति॥ ॥सर्वज्ञस्याज्ञानाश्रयत्वभंगः॥ ॥एतेन माभूद्ब्रह्म
णो विद्यामायातु स्यात् तस्या लीलोपकरणत्वेनादोषत्वादिति निरस्तं तथाहि। सा किमज्ञानविशेषः। किं वा देवासुरसंग्रामादौ देवादे
र्वांत्यसाधनमनयेस्यैव वह्निजलादिविचित्रसत्यवस्तुसर्जनशक्तिविशेषः। यद्वैंद्रजालिकस्यैवाविद्यमानप्रदर्शनशक्तिः। नाद्यः।
उक्तरीत्या सामान्याभावे विशेषायोगात्। अज्ञानस्य लीलोपकरणत्वादर्शनाच्च। तस्मिन्मायाशब्दाप्रयोगाच्च। न त्वैंद्रजालिकोपि कस्य
चिदज्ञाने नैंद्रजालं दर्शयति। किंतु मणिमंत्रादिनैव। न द्वितीयः। दृष्टापत्तेः। न तृतीयः। व्यामोहनीयजीवादर्शने व्यामोहनायोगात्।
कल्पिततद्दर्शनस्य च भ्रांतिं विनायोगात्। कल्पितत्वेन तद्दर्शने च तद्व्यामोहनायोगात्। तस्यापि द्वितीयवद्दर्शनस्यैवाविद्यां विना
योगाच्च। किं च तस्याः शक्तेः सत्त्वेऽद्वैतहानिः। जीवकल्पितत्वे तद्व्यामोहकत्वायोगः। ब्रह्मकल्पितत्वे तु तस्याज्ञानावश्यंभावः। परोक्तब्रह्म
मायावित्वभंगः॥ ॥यच्चोक्तं वाचस्पतिनाजीवाश्रिताविद्येति॥ ॥तत्र। जीवशब्देन बिंबमात्रविवक्षायामुक्तदोषात्। अविद्यावच्छि

यकवुद्ध्यादिनावावच्छिन्नस्य तत्प्रतिबिंबितस्य वा कल्पितत्वे दस्योक्तावन्योन्याश्रयापातान्न बीजांकुरन्यायेनासौ न दोषः। तद्वदिह व्यक्तिभेदा
भावात्। संतानिव्यतिरेके ऽत्र च तत्र संतानयोरन्योन्याश्रयेण भावात्। नव यथा निरंशोप्याकाशो घटस्तटद्व एवं तमुपलक्ष्यैकदेशं संपाद्यते नं
संबध्यते तद्वद् विद्याप्रितत्स्वैव विम्नत्रमुपलक्ष्यैकदेशरूपं जीवं संपादयत्यत्रावतिष्ठत इति नेतरेतराश्रयः। स्वैन वकल्पितैप्यशेषो नियद्द
कादिकं। तथा जीवाश्रयां विद्यामभ्युपैते ज्ञानकौ विदारन्तुक्तेरिति वाच्यं। निराश्रयाविद्यायोगेन जीवसिद्धावविद्यासिद्धिस्तत्सिद्धौ तु तय
त्वस्थितजीवसिद्धिरित्यन्योन्याश्रयात्। तन्मते गगनस्याप्यनिस्पष्टत्वेन स्वतः एवांशसंभवात्। न वजीवाज्ञानयोरनादित्वेनोत्पत्तिरित्यस्य
प्रतिबंधाद्यमदोषः। यतः अविद्याजीवयोर्यत्रनत्ये स्यात्तत्रितो धकः। अन्योन्यसंश्रयो नो चेदन्योन्याधीनताहतिः। अज्ञानजीवयोर्हि
कुत्रापि विषयेन्योन्यापेक्षा न वेन्नान्योन्याधीनतां व्याहतिः। नहि सर्वथा तदनपेक्षं तदधीनं अथानादित्वेपि द्रव्यत्वगुणत्ववत्वादिजा
तिव्यंजकयोरिव प्रवृत्त्यादावपेक्षातत्त्वान्योन्याश्रयपक्षस्यैव प्रतिबंधकः। स्वतत्त्वादोषं ग्यमेव व्यंजकप्रयुक्तेन तद्व्यंजकं व्यंग्यप्रयु
क्तांदहत्र जीवब्रह्मविभागस्याविद्याकृतत्वादविद्यायाश्च जीवाश्रितत्वान्जीवत्वाज्ञानेन्योन्यप्रयुक्तेरितिप्रयुक्तेरेव प्रतिबंधकः। यथा
त्पत्तितत्प्रमात्र प्रतिबंधेन दोषता न तर्हि स्याद्वैवमेवादेरन्योन्यारोहणादिकं। न च प्रमेयत्वाभिधेयत्वादौ अन्योन्याहंत्रिवदिहान्योन्या
पत्ताप्रमिता। अन्यथाऽन्योन्याश्रयादिकाल्पदोषो न स्यान्नजीवत्वप्रयोजकमज्ञानांतरं चेन्नवक्ष्यमानवस्थाद्वाज्ञानवेयं परंपरा। किंच

न्या॰प॰ यथा। अहमज्ञ इति प्रतीतेरसत्यमेदे नैवोपपत्तेः। किंच जीवेश्वरयोर्जीवे मुख्यत्वात्कल्पितत्वेनान्याश्रयान्। ब्रह्मणो जीवकल्पितत्वे
८२ न्योन्याश्रयान् तत्कल्पकस्य शुद्धस्य ब्रह्मणोऽज्ञानमावश्यकं। न चाविद्याया दोर्घघं भूषणमिति वाच्यं। तत्र प्रमाणानुक्तेरयोगात्
अविद्याया निराश्रयत्वे निर्विषयात्मस्वरूपत्वापाताच्च। प्रतीत्यनुसारेणाश्रयाद्यंगीकारे वयमहं न जानामीति प्रतीत्याहमर्थाश्रि
तत्वजडविषयत्वादिप्रसंगाच्च। अनादित्वादिनानुपपत्तिपरिहारायोगाच्च। उत्तरास्फुरणोप्रकृतिसंबन्धाद्दोर्घघमिति स्वच्छत्वे
न संव्यवहृतिमन्तनिराशायोगाच्च। उक्तं हि दुर्घटत्वं भूषणं। चेत्तस्मादविद्यात्वमात्मनः। अध्यंतमोपलंकारे नित्यदुःखं शिरोम
णिरिति। यतेन प्रश्नविश्रांतिहेतुत्वाद्बोधं तमसि नोचितं। न बुद्धिमंतः प्रष्टुं ति न जानामीति वादिनमिति निरस्तं। नत्यज्ञ प्रत्यप्रश्रो
ज्ञानस्य दोषत्वात्। ज्ञानमेवाज्ञानमित्यायुक्तावपि विरोधाद्यनुपपत्तावनापातात्। किंतु ज्ञातुरेव वक्तृत्वात्। अज्ञानस्यावाच्यस्यान्तु
क्तजीवाश्रितत्वभंगः। अविद्याविषयोऽपि दुर्वचः। यदत्रोक्तं विवरणे। अज्ञानस्य चिन्मात्रमेव विषयः। तस्याकल्पितत्वेनान्योन्याश्र
यादिदोषाभावात्। स्वप्रकाशत्वेन प्रकाशत्वेनं प्रसक्तप्रकाशे तस्मिन्नावरणकृत्यसंभवाच्च। नान्यत्। तस्याज्ञानकल्पितत्वा
ज्जडत्वेन स्वयमेवप्रकाशहीने आवरणकृत्याभावाच्चेति। अत्र ब्रूमः। चिन्मात्रे व्यावरणकृत्यं न तावत्सिद्धप्रकाशलोपो ऽसि
द्धप्रकाशानुत्पत्तिर्वा स्वरूपप्रकाशस्य नित्यसिद्धत्वात्। आवरणकृत्यस्यानर्थस्य च स्वप्रकाशे तस्मिन्नयेच्छितत्वात्। नापि ८२

ज्ञोपि प्रकाशस्य विषयासंबंधः। विज्ञानस्य विषयसंबंधस्वभावत्वात्। स्वयंज्ञानरूपत्वेन त्वन्मते संबंधानपेक्षणाच्च। न पि प्राकट्याख्यकार्यप्रति
बंधः। त्वन्मतेपि चैतन्यातिरिक्तस्य तस्याभावात्। नापि नास्ति न प्रकाशत इत्यादिव्यवहारो ऽभिज्ञाभिलपनं वा न्यायः। नास्तीत्यादिभ्रांतेरा
वरणसाध्यत्वेनावावरणत्वायोगात्। अतएव वनौ त्वपः। तस्यो भ्रांतिसाध्यत्वेन भ्रांतिहेत्वावरणत्वायोगात्। सुषुप्तौ व्यवहाराभावेनानाव
रणापातात्। नापि प्रकाशत इत्यादिव्यवहाराभावः। व्यवहारस्याभिज्ञात्वे स्वरूपाभिज्ञाया इदानीमपि सत्वात्। हृत्ते स्वमो द्वेष्यसत्वात्। अ
भिलपनत्वे मोक्षेप्यावरणापातात्। नापि नास्तीत्यादिव्यवहारयोग्यत्वं। अस्तीत्यादिव्यवहारायोग्यत्वं वा तयोरप्यारोपितत्वेनावरणत्वा
विनायोगात्। अद्वितीयत्वादिविशिष्टे तथा व्यवहारेपि अवस्थात्रयेप्यसंदिग्धाविपर्यस्तत्वेन प्रकाशमानात्मरूपे ध्यासाधिष्ठाने सु
खज्ञानादिरूपे चिन्मात्रे तदभावेन तत्कल्प्ययोर्योग्यत्वायोग्यत्वयोरभावाच्च। तयोर[illegible]वेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वरूपस्वप्रका
शत्वविरुद्धत्वेनेदानीमप्यभावाच्च। नेचाज्ञानावछिन्नत्वेनापरोक्षव्यवहारयोग्यत्वे स्वरूपेण तु तदयोग्यत्वमित्यविरोधः। स्वरूप
स्यास्वप्रकाशत्वापातात्। नित्यातीद्रियस्याप्यज्ञानावछेदेनापरोक्षव्यवहारयोग्यत्वे न स्वप्रकाशत्वापाताच्च। घटाद्यवछिन्नप्रकाश
इवाज्ञानावछिन्नप्रकाशेपि विशेष्यस्यापि प्रकाशेन घटादिवदेवाज्ञानस्याप्यावरणत्वायोगाच्च। सुखादेरज्ञानावछिन्नचित्प्रकाश्यत्वे
सुखादिकं न प्रकाशत इत्यनुभवापातेन सुखादिकं प्रकाशत इत्यनुभवार्थं वित्तौ ज्ञानानवछेदेन प्रकाशस्यांगीकार्यत्वाच्च। एतेनास्ता

न्याया० नाविशेषितापरोक्षव्यवहारायोग्यत्वमावरणकृत्यमितिनिरस्तं।नचोक्तयोग्यत्वायोग्यत्वरूपयोःप्रकाशाप्रकाशयोःसत्यत्वमिथ्यात्वाभ्या
८३ मविरोधइतिवाच्यं।सुखादिस्फुरणंनप्रकाशतइत्यननुभवेनसुखादिसाक्षिणिचैतन्येआरोपितस्याप्यप्रकाशस्याभावात।वन्हावन्हित्वा
रोपेवन्हिकार्यस्येवस्वप्रकाशेअप्रकाशारोपेपिप्रकाशकार्यस्यभ्रांत्याद्यभावस्यापाताच्च।मतःशुक्तित्वस्यारोपितेनाशुक्तित्वेनाविरोधे
पिसतोधिष्ठानप्रकाशस्यारोपितेतरेणोवाप्रकाशारोपेणापिविरोधाच्च।अन्यथातन्निवृत्तिर्नस्यात।नचावेद्यत्वेसत्यपरोक्षव्यवहारयो
ग्यतात्यंताभावानधिकरणत्वंस्वप्रकाशत्वं।उक्तयोग्यताप्रागभावस्यावरणमित्यविरोधः।स्वरूपप्रकाशप्रकाशप्रयुक्तयोग्यतायाअ
नादित्वात।इदानींयोग्यतारूपप्रकाशस्यप्रागभावः।मोक्षेतुध्वंसइतिमोक्षेप्यप्रकाशत्वापाताच्च।भवतिहिदीपात्पूर्वमिवपश्चाद
पिअप्रकाशः।एवंचस्वप्रभत्वेनापरोक्षव्यवहारार्हआत्मनि।तद्योग्यत्वाभावरूपमविद्यावरणंकथं।किंचदीपावरकघटवच्चैत
न्यावरकाविद्याचैतन्यस्यान्यसंबंधंप्रतिबध्नातुअन्यंचप्रतिचैतन्यमाच्छादयतु।नतुचैतन्यंप्रत्येवचैतन्येउक्तयोग्यत्वरूपप्रकाशः
विरोधिनी।नहिदीपोघटावृतोपिस्वयंनप्रकाशते।तत्संबंधापातात।नतुकल्पितभेदंजीवचैतन्यंप्रतिचैतन्यमाच्छादयतीतिचेत।ना
आवरणंविनाभेदकल्पनायोगात।योमोक्षेभावीचिन्मात्रस्यैवचिन्मात्रंप्रतिप्रकाश।तदभावस्यैवेदानीमज्ञानेनसाधनीयत्वा
च्च।नचदीपप्रकाशआवृतोपिस्वविषयत्वात्प्रकाशतेवअप्रकाशस्तुनतद्द्योतितिनप्रकाशतइतिवाच्यं।मोक्षेप्यप्रकाशापातात। ८३

अज्ञानवैयर्थ्यान्न अनुभूयते। साक्षिणि प्रकाशमानेप्यज्ञानंस्फुरंतस्यतत्स्फोरकत्वेन तद्विरोधित्वात्। तादृश्यपेतेहि त्वदुक्तमर्थं न जानामी
ति प्रकाशमान एवाज्ञाने। अज्ञानावच्छेदकस्य विषयस्याज्ञाने तदवच्छिन्नाज्ञानज्ञानायोगात्। न च सामान्येनज्ञानेपि विशेषेणाज्ञा
नमिति वाच्यं। सामान्यस्याज्ञातत्वादेवाज्ञानानवच्छेदकत्वात् तदवच्छेदकस्य विशेषस्यैवाज्ञातत्वात्। अविद्यानिवृत्तिस्त्वात्ममात्रावि
षयकाद्वृत्तिविशेषादेव। एकविषयत्वेपि हि वृत्तितोरज्ञानविरोधित्वाविरोधित्वे घटविषयकयोः सौरालोकज्ञानयोः सौरचाक्षुषप्र
काशयोर्वा तमो विरोधित्वाविरोधित्ववत्। शंखे श्वेतत्वप्रत्यक्षानुमित्योः पीतत्वभ्रमविरोधित्वाविरोधित्ववच्च युक्तो। एवं च प्रकाशमाने आ
वरणाकृत्याभावेप्यज्ञानमविरुद्धमिति ममसिद्धांतरहस्यमिति। उच्यते। त्वयाप्यनवच्छिन्नब्रह्माभेदाप्रकाशार्थमेवाज्ञानस्य कल्पितत्
त्वेन कथं प्रकाशमानेऽज्ञाने। अपि च त्वदुक्तार्थान प्रकाशतदित्यनुभावात्। अस्मत्तत्रभासमानेऽज्ञाने न चेह सुखादिस्फुरणे न प्रका
श तदित्यनुभवोस्ति येन भासमाने तत्स्यात्। किंतु न तत्रापि भासमानेऽज्ञाने गुहास्थं तमः छन्नमिति वत् त्वदुक्तं न जानामीत्यनावृत
सामान्यावच्छेदेनैवाज्ञानानुभवात्। नहि परचिन्नस्याज्ञाने बुभुक्षापिपासादिवत् प्रातिस्विकरूपेणानुभूयते। एवं च तद्विशे
षसंशयं प्रति तत्सामान्यनिश्चयस्त्वत्तद्विशेषावच्छिन्नाज्ञानज्ञानं प्रति तत्सामान्यज्ञानमेव हेतुता। यादर्शनात्। न हि विशेषज्ञाते तत्
दज्ञानाधीरिष्टा अवच्छेदकज्ञानस्यावच्छिन्नज्ञानहेतुतायादर्शनादेव कल्प्या सामान्यविशेषाभाव एव च नियामक इति नाविशे

न्याय० गाः।पुत्रंचद्वेषस्येष्टत्वेपिद्विष्टस्येष्टत्वाभावतईश्वरस्यास्मदादिभ्रांतिविषयविषयकज्ञानाप्रसंगाः।पुत्रंचद्वेषस्येष्टत्वावेपिभ्रांति
८४ विषयकज्ञानवदस्मदादीनांसर्वज्ञानाभावेपीश्वरसार्वज्ञ्यानवच्छ्राः।अज्ञातज्ञानाभावेप्यज्ञानज्ञानेः।अन्यथाप्रोहमानार्थमज्ञानज्ञान
यदिवकल्पते।अज्ञातेमोहहानिश्रुतदर्थंकिंनकल्प्यते।तथाहि।संयोगाद्यवच्छेदकस्यघटादेरज्ञानावच्छेदकतयाज्ञानेविघ
टाद्यज्ञाननिवृत्तिंविनावच्छिन्नसंयोगादिज्ञानादर्शनेनप्रकृतेपिविषयावच्छिन्नाज्ञानज्ञानार्थंतदवच्छेदकविषयावरकाज्ञा
ननिवृत्तेरपिवक्तव्यत्वेनाज्ञानाविरोधिज्ञानवदज्ञानाविरोधिन्यज्ञाननिवर्त्तिरपिस्वीकार्यास्यात्।अथयथान्यत्रावच्छिन्नस
त्वस्यावच्छेदकसत्वसापेक्षत्वेपिआरोपितावच्छिन्नाभावसत्वस्यनारोपितसत्वसापेक्षत्वंविरोधात्।तथाविषयावच्छिन्नाज्ञानज्ञा
नस्यनविषयाज्ञाननिवृत्तिसापेक्षत्वंविरोधादितिचेत्।नहिंततएवतस्यनविषयज्ञानसापेक्षत्वमपिकिंचाज्ञानस्यज्ञानांतरवि
रोधित्वेपिस्वस्यविरोधित्ववदन्यत्रावच्छेदकज्ञानाभावस्यावच्छिन्नज्ञानविरोधित्वेप्यज्ञानावच्छेदकज्ञानाभावस्यावच्छिन्नाज्ञा
नज्ञानाविरोधः किंनस्यात्।तथाचविशेषेअज्ञाततएवाज्ञानंज्ञापतेअज्ञानस्यविषयविशेषावच्छेदसिद्धिस्तुतमसइवविशेषज्ञा
नानंतरमेतावंतंकालममुमर्थमित्थंनाज्ञासिषमित्यनुभवांतरादितिज्ञेयं।यद्योक्तं।सात्वज्ञानस्फोरकत्वात्तदविरोधीवृत्तिरेवतत्त राम
द्धितेऽधीनीति।तत्र।वृत्तिर्द्वैतन्योपरागार्थेतिमतेतस्याअज्ञानानिवर्त्तकत्वात्।अज्ञानस्यस्वविरोधिज्ञानाभावव्यापकत्वेनमोक्ष ८४

त्मनायातात्वा। न जानामीत्यज्ञानस्य ज्ञानसामान्यविरोधित्वेनानुभवाद्वा। न जानामीति ज्ञानस्यापि विरोधित्वस्यैवानुभवाद्वा। तत्पक्षे चैतन्यस्ये च
सित्वात्। चैतन्याज्ञानयोरविरोधे ज्ञानत्वायोगस्योक्तत्वाद्वा। वृत्तेरप्यर्थप्रकाशकत्वं विना ज्ञातिविशेषेणैवाज्ञानतत्कार्यनिवर्त्तकत्वेर
छादिनिवर्त्त्यै घटेषादिवत्सत्वाय त्यापुत्त्वादिज्ञानवदर्थप्रकाशकत्वे न तन्निवर्त्तकत्वे वक्तव्ये चैतन्यस्यापि तत्त्वे तत्तन्निवर्त्तकत्वावश्य
भावाद्वा। तन्यते नित्यांतीद्रियेपरोक्षवृत्तौ सत्यामप्यज्ञानानिवृत्त्या सुखादावपरोक्षवृत्त्यभावेपि स्फुरणामात्रेणाज्ञानादर्शनेन चा
न्वयव्यतिरेकाभ्यां स्फुरणस्यैवाज्ञानविरोधित्वाद्वा। स्वसत्तायामप्रकाशाविधुरत्वे नात्मनः स्वप्रकाशत्वसाधनायोगाद्वा। वृत्तिवि
नौर्वैषम्योक्तिश्च युक्ता। वृत्तिवत्साक्षिणोपि समानविषयकाज्ञानविरोधित्वानुभवात्। अनुभूयते ह्यज्ञानविषयकानुमित्यादिरूपवृ
त्तिवदज्ञानविषयकसाक्षिणोप्यज्ञानविषयकाज्ञानविरोधित्वं साक्षिवद्वाज्ञानविषयकवृत्तेरप्यज्ञानविषयकाज्ञानविरोधित्वं
च। अन्यथा साक्षिवेद्ये चैत्रेच्छासुखदुःखादौ मैत्रस्येव चैत्रस्याप्यज्ञानं स्यात्। एवं चासाक्षी स्वविषयेऽज्ञानविरोधी न भवेद्यदि तद्वेद्येसु
खदुःखादावज्ञानं केन वार्यते। इच्छादेः सदाप्रकाशादज्ञानप्रसक्तिरेव नेति चेत्। तर्ह्यात्मन्यपि तत एव तदप्रसक्तिः स्यात्। न च साक्षि
वेद्यत्वेन तदप्रसक्तौ न तत्रं आत्मा तु न तद्वेद्यः। किंतु स्वविद्रूपत्वात्प्रकाशत एवेति युक्तं। प्रकाशरूपे दीपे अंधकारस्येवात्मन्यप्यज्ञानाप्रसक्तेर्या
प्यत्वात्। अन्यथाद्यनादिरालोकमिवात्मापि स्वव्यवहारे ज्ञानांतरमपेक्षेत। न च सुखाद्यपि वृत्तिप्रतिबिंबितसाक्षिणैव वेद्यं न तु केवले

नेतिकेवलोनाज्ञानविरोधीतिवाच्यं । असतः साधकत्वभंगेकेवलसाक्षिवेद्यत्वोपपादनात् । अंतःकरणवृत्तेरिंद्रियव्यापारेप्र
घावृत्तेश्चदोषंविनायोगाद्वा । अन्यथात्मापिवृत्तिप्रतिबिंबितेनैवतेनसदाप्रकाशतेनतुकेवलेनेतिस्यात् । एतेनसौरालोकादिप्रतिबिंदीति
रस्ता । एतेनैवसर्वज्ञाततया अज्ञाततयावासाक्षिविषयइतिरस्तं । अंधकारावृतवत्ज्ञानाभावावच्छेदकविषयवद्वाज्ञानावच्छेदक
स्यापिप्रकाशेनसाक्षिवेद्यत्वायोगात् । अस्तुवावृत्तिरेवाज्ञानविरोधिनीतथाप्यात्मविषयांसइदानीमप्यस्तीतिकथंतत्राज्ञानं । वि
वरणेजीवाकाराहंवृत्तिपरिणतांतःकरणेनजीवोभिव्यज्यते अन्यथासुषुप्तेरित्युक्तेः । अयंघटइत्याद्यपरोक्षवृत्तेरपित्वन्मतेघ
टावच्छिन्नचिद्विषयत्वाद्वा । अन्यथाप्यटावरकाज्ञानाभावेनायंघटइतिवृत्तेरज्ञानाभिभावकत्वंनस्यात् । नचविशिष्टचैतन्यस्य
जीवविषयावाघटावच्छिन्नचैतन्यविषयावावृत्तिरज्ञानविषयीभूतचिद्विषयावानदज्ञानाविरोधिनीचेतियुक्तं । दंडीचेत्रइतिवृ
त्याचैत्राज्ञानानभिभवापातात् । आकाशस्येवघटावच्छिन्नस्यघटाकाशत्वेघटाकाशेहष्टे आकाशगतमहत्वादर्शनेपिआका
शमात्रंदृष्टमेव । आकाशांशस्यघटाकाशत्वेतुघटाकाशदर्शनेपिमहाकाशादर्शनंयुक्तं । नचश्रवणादिजन्यावृत्तिरज्ञानविरोधि
नीतियुक्तं । अमकालीनापरोक्षज्ञानानधिकविषयज्ञानेनकारणांतरजन्येनाप्यविद्यानिवृत्त्यापत्तिप्रसंगात् । अनधिकविषयत्वेश्रव
णादिवैयर्थ्यापत्तेः । सत्यत्वापातात् । तस्मान्नचिन्मात्रमज्ञानस्यविषयः । नापिदेहादिभेदोवामोक्षत्वाद्यभावोवाब्रह्माभेदोवाद्वितीयमात्मा

भावोवातद्विशिष्टात्मावातद्विषयः।तेषामात्ममात्रत्वे उक्तदोषाच्चाश्रितत्वेसत्वेऽद्वैतहानेः।अविषयकत्वेत्वन्योन्याश्रयादेः।नचब्रह्मा
द्यादेः प्रकाशमानात्ममात्रत्वेपिकल्पितेनभेदेनाज्ञातत्वं।अधिष्ठानावरणं विनाभेदकल्पनायोगादित्यादेरुक्तत्वात्।नचमिथ्याभूतेनापि
भेदाभावेनद्वितीयाभावेनवोपलक्षितआत्माअज्ञानविषयः।तस्यसमानविषयकज्ञाननिवर्त्यत्वेनवेदांतानामप्युपलक्षणतारूपप्रद
र्शकत्वपरत्वेनाखंडार्थहानेः।अकाकेकाकवदितिवाक्यवत्प्रमाणतापाताच्च।प्रकाशमानस्यात्मनोज्ञानविषयत्वे अप्रकाशमान
स्यद्वितीयाद्यभावस्योपलक्षणत्वेनतदविषयत्वेवदृष्टहानादृष्टकल्पनापाताच्च।तस्मादात्मनः प्रकाशमानत्वादन्यस्यवाविषयकत्वा
न्नाविद्याविषयत्वं।नतूक्तं।निर्विशेषस्वयंभातेकिमज्ञानावृतंभवेत।मिथ्याविशेषोप्यज्ञानसिद्धमेवतत्कथंसत इति।एवंत्वन्यून
पा अविद्याविषयसंबंधिन्याः कथमधिकब्रह्मावरणं।न्यूनायागुप्तिरविषयसंबंधित्वादधिकस्यपर्याच्छादिका।तस्मादनिर्व
च्याविद्यायादुर्निरूपत्वादहंकारादिकंनतत्कार्यं।अविद्याविषयभंगः॥ ॥यदप्युच्यते अहमर्थोनात्मायस्मात्परामर्शान्यथानु
पपत्त्यासुषुप्तोस्वतःप्रकाशमानस्यात्मनःसद्भावेप्यनेवंविधस्याहमर्थस्याभावात्।अथातोहंकारादेश अथात आत्मादेश इतिश्रु
तोपदेशाच्च।महाभूतान्यहंकारइतिस्मृतोअहंकारस्यक्षेत्रत्वात्स्यार्थकोनक्षेत्रत्वोक्तेः।ध्रुवतस्मादहमनुभवामीत्यात्मानुवेध्य
नुभवस्यअहंकर्तृत्वेनात्मानुवेधिकर्तृत्वादेश्चाश्रयोहंकारश्चिदचित्संवलनात्मकत्वाद्ध्यस्तः।यदिवसुषुप्तावहमर्थःप्रकाशेतत

न्याय० हिं स्मर्यते त्यस्तनरवाहंकारः। अनुभूते स्मरणा नियमाभावे विस्मर्यमाणा त्ममात्रत्वादिति। छ। तत्र तत्तावत्स्वप्रकाशत्वस्वप्रकाशत्वा
८६ भ्यां सुषुप्तावात्माहमर्थयोः प्रकाशाप्रकाशौ। अरुमर्थः। स्वप्रकाशात्मान्यत्स्वस्पाघाव्यसिद्धान्योन्याश्रयात्। नापि परामर्शापराम
र्शाभ्यां। अहमस्वाप्ने न किंचिदहमवेदिषमित्यहमर्थस्यैव परामर्शात। अहमर्थे परामर्शो नवेत्सकथमात्मनि। अहं तां नात्रात्मन्ग्री
त्मपरामर्शो हि दृश्यते। अस्वाप्समित्यत्रापि उत्तमपुरुषप्रयोगयोग्याहमर्थस्यैव स्फुरणात। उक्तं च विवरणे। अंतःकरण विशिष्ट
एवात्मनि प्रत्यभिज्ञानं चू मोन विष्टत्वके। तितस्यमो ह्यावस्थापिनः शाह्वैक समधिगम्यत्वादिति। यदि चेदमर्थव्यावृत्तोहमर्थो
नपारामृस्येत। तर्हि तावंतं कालं सुप्तोहं वान्यो वेति संशयादिः स्यात। न त्वहमेवेति निश्चयः। ननु परामृश्यमाणात्मनयवप्रत्यक्त्वो
त्रत्यानिश्चयइतिचेत प्रत्यक्त्वं नतावद्बुद्धिनिर्भासप्रतिद्वंद्विवित्वं। अन्यत्वप्रतिद्वंद्विस्वत्वं वा विदस्वपीदितिवा स्वयमस्वपीदितिवा
परामर्शापाते नाहमितिपरामर्शयोगात। घटादिः स्वस्मात्प्रिन्नो मत्वादिप्रतीत्यात्मनीवघटादावपि स्वत्वस्य सत्वाच्च। नापि बुध्य
दर्थरूपपराग्व्यावृत्तत्वं। अहमर्थस्यैव तद्यावृत्तेः नहित्वन्मते आत्मनः पराग्व्यावृत्तिः। विवरणे आत्मनः सर्वात्मकत्वात्पर
राग्व्यावृत्ति अहंसुपरागादेव व्यावृत्त्यवभासरत्यक्तेः। तस्मादहमर्थत्वमेव प्रत्यक्त्वं वाच्यमितिघटकुदीप्रभातद्वृत्तांतः। ननु नाह रा
मंशे परामर्शः किंतु परामृश्यमानआत्मा इदानीं ज्ञातेनांतःकरणेनावच्छेदादहंत्वेप्राप्रस्तत्यानुभयतइति चेत। न न किंचिदहम ८६

वेदिषमित्यादावज्ञानाद्यंशे व्यपरामर्शत्वापातात्। न त्वज्ञानादिकं [illegible]ता अपमन्याश्रयं वा परामृश्यते किं तु अहमर्थाश्रयं। एतावंतं का
लमहं स्वप्नं यश्चपश्यं त्वा संज्ञाग्रदासमित्यत्रैवाहमस्वाप्समित्यत्राप्यहमंशे परामर्शत्वानुभवाद्वा। अन्यथा यः पूर्वमहं दुःखी सोऽधुनासु
खीजात इतिवत् यः पूर्वं मदन्यः सुप्तः सोऽधुनाहं जात इति धीः स्यात् ननु अहंकारे परामृश्यमानात्मैक्यारोपात् तदानीं परामर्शत्वाभि
न इति चेत् न। अपरामर्शे परामर्शत्वारोपायोगात्। सिद्धे हि अहमर्थस्यात्मान्यत्वे परामृश्यमानात्मैक्यारोपः। सिद्धे च तस्मिन् न तु सुषुप्ताव
प्रकाशेनाहमर्थस्यात्मान्यत्वमितीतरेतराश्रयापत्तेः। अहमित्यतोऽन्य आहत्य परामर्शो न तु क्तत्वेन रहस्यहानादृष्टकल्पनापाताच्चाप
ते न सुषुप्तावहमर्थप्रकाशेऽस्यैतत्प्रयुक्तत्वेन स्वाहंकार इ निरस्तं। अहं शब्दोल्लेखि परामर्शापादने सुषुप्तौ तदुल्लेखाख्यानुभवाभावादे
व तदभावोपपत्तेः। तावन्मात्रेणाप्रयुक्तत्वेनैव स्यात्। अहमर्थविशेष्यकस्याहंत्वप्रकारकस्य च परामर्शस्यापादने इष्टापत्तेः। अस्म
र्यते हि यदा वै तत्काले सुखमहमस्वाप्समिति सुषुप्तिकाली न सुखावच्छिन्नोऽहमर्थः। अन्यथा स्मास्मर्यते तत्प्रयुक्तत्वेन स्वात्मेति चेन्मैवं निह
त्वं स्यात्। ननु तथाप्येतावंतं कालमहमित्यभिमन्यमानः अस्वाप्समिति परामर्शः स्यादिति चेत्। कर्तोपरिषेकर्तृं वाल्यपक्षि अहमर्थप्रद
काशेन तदभिमानपरामर्शापादनस्य व्यधिकरणत्वात्। अन्यथा तदा व्याप्त्यत्यभिमन्यमान आसमिति परामर्शस्यात्। तस्मात्सुषुप्ता
वहमर्थः प्रकाशत एव। न किंचिदहमवेदिषमित्यत्रान परामर्शस्य तु आत्माद्यज्ञानादन्यदिवाहमर्थाद्यज्ञानादन्यदेवाज्ञानं विष

पत्तेः। अन्यथा विरोधात् यत्तु न विज्ञानात्ययमहमस्मीति सुषुप्तिविषया स्मृतिः। सापि नात्मानं न परं चेति सुषुप्तावात्माज्ञानस्मृतिवि
शेषाज्ञानपरा। किं च सौषुप्तिकाज्ञानस्मर्तृत्वे किमनहमर्थस्याविद्यावच्छिन्नचैतन्यस्यांतःकरणावच्छिन्नस्याहमर्थस्य वा। नाद्यः। ये
हमकार्षं सोहं सौषुप्तिकाज्ञानादि स्मरामीत्यबाधितानुभवात्। अंत्ये त्वहमर्थस्यैव तदनुभवितृत्वं वाच्यं। स्मृतिसंस्कारानुभवा
नामेकाधिकरणानामेव कार्यकारणभावात्। योहमन्वभवं सोहं स्मरामीति प्रत्यभिज्ञानाच्चेति सुषुप्तावप्यहमर्थसिद्धिः। यद्यपि
चैत्रमैत्रसाधारणचैतन्यमेकं जीवत्वोपाध्यविद्यैक्यात् जीवश्चैकस्तथापि तयोरस्मर्तृत्वात्। स्मर्तुश्चाहमर्थस्याविद्यावच्छिन्ना
दनुभवितृचैतन्याद्भिन्नत्वेन नानुभवितृस्मर्त्रोरैक्यं। यद्यप्यविद्या चैतन्यं प्रत्येवावच्छेदिका अंतःकरणं तु अविद्यावच्छिन्नचै
तन्यं प्रत्येवावच्छेदकं न तु स्वातंत्र्येण तथाप्यविद्यांतःकरणरूपोपाधिभेदे शुद्धचैतन्याविद्यावच्छिन्नचैतन्यरूपोपधेयभे
देवसतिमठाकाशतदंतर्गतघटाकाशयोरिव स्वतरां सुयहितभेदे न प्रत्यभिज्ञाविरोधोऽवसरः। किं च सुषुप्तावहमर्थस्याभा
वेहं निर्दुःखः स्वाप्समितीच्छया सुषुप्तौ प्रवृत्त्ययोगः। योहं सुप्तः सोहं जागर्मीति प्रत्यभिज्ञानबाधश्च। योहं पूर्वं घटमकार्षं सोहमद्य
करोमीति प्रत्यभिज्ञानानुपपत्तिश्च। अहंकारव्यक्तिभेदात्। कृतहानाकृताभ्यागमप्रसंगश्च। कर्तुर्भोक्तुश्चाहमर्थस्याभिन्नत्वा राम
त्। अभिन्नचैतन्ये कर्तृत्वाद्यभावात्। कर्तृत्वाद्यारोपस्य च देहेंद्रियादावपि समत्वात्। अहं करोमीत्येवप्रतीत्या अहमर्थान्यानि ८७

कर्तृत्वारोपस्याप्यभावात्। किंचाहंकार एव क्रियाशक्त्या प्राणः॥ विज्ञा[illegible]शक्त्या च मन इति गीयत इति त्वन्मते। तथा च सुषुप्तावहंकार[illegible]
ये प्राणकार्यश्वासादि न स्यात्। ननु प्राणस्याहंकाराद्भेदपक्षे अहंकारस्य लयोपपत्तेः॥ अभेदपक्षेऽपि प्राणांशे विलयाभावविशिष्टस्य ल-
यः कल्प्यत इति चेत् न। प्राणस्याहमर्थत्वाभावे कर्तृत्वस्य प्राणोपाधिकत्वेनाहंकर्तेति बुध्ययोगात्। अहमर्थत्वे तु सुषुप्तावप्यहमुल्ले-
खापातात्। किंच न सुषुप्तावंतःकरणस्य लयः। अथ हैतत्पुरुषः स्वपितीत्यारभ्य गृहीतं वाक् गृहीतं श्रोत्रं गृहीतं मन इत्यादिश्रु-
तौ मनआदीनामुपरमस्यैवोक्तेः। अथात आत्मादेश इति श्रुतौ वात्मनस्त्वन्मते स एवाधस्तादित्युपदिष्टेन भूम्नैवाहंकारेणैक्ये कोऽपि
पृथगुपदेशोपपत्तेः। ननु भूमात्मनोर्भिन्नत्वेन प्रत्यक्षसिद्धयोः पृथगुपदेशयेक्षार्थः। द्वयोः सार्वात्म्यायोगात्। अहंकारस्य त्वात्मैक्य-
त्वेन प्रत्यक्षसिद्धस्य पृथगुपदेशोऽभेदार्थ इति चेत् न। अहमर्थादन्यस्यात्मनो भूम्नश्च ब्रह्माभिन्नत्वेन प्रत्यक्षासिद्धत्वान्न तयोरूपदेशो भे-
दार्थः। अहमर्थस्य तु ब्रह्माभिन्नत्वेन प्रत्यक्षसिद्धत्वात्तयोरूपदेशोऽपेक्षार्थ इति वैपरीत्यापत्तेः। त्वत्पक्षे तूक्तानां भूमाहंकारात्मनो
बिंबप्रतिबिंबस्वच्छाभीयाविद्योपाधिकब्रह्मजीववच्चिन्मात्र[illegible]त्वसंभवेनाहंकारस्य जीवात्मार्थकासिद्धेश्च। स एवेदं सर्वं अहमेवेदं सर्वं
आत्मैवेदं सर्वमित्युपसंहाराणां स एवाधस्तात्। आत्मैवाधस्तादित्युपक्रमैः। सर्वं समाप्नोषि ततोऽसि सर्व इत्यादिस्मृतिभिश्च सर्वगतत्व-
परत्वेन सार्वात्म्योपदेशाभावाच्च। सर्वगतत्वस्य चानेकेष्व[illegible]संभवात्। भूमात्मोपदेशाभ्यामेव ब्रह्मात्मैकसिद्ध्या मध्येऽहंकारोपदेशवैयर्थ्या

द्यानत्तुपरोक्षस्यब्रह्मणःआपरोक्ष्यापच्छुलाधंतीत्यायेनाहंकारेक्वोक्तिरितिचेन्नात्वस्यप्रत्यगर्थरूपस्यात्मनएवापरोक्षैकरसत्वे
नतद्वैक्योक्तेर्वापरोक्ष्यसिद्धाहंकारेअविद्यमानसाधर्म्यात्मोक्तायोगात्।आत्मनआपरोक्ष्याभावेचात्मब्रह्मभेदस्यप्रत्यक्षत्वोक्तायोगात्।
अपरोक्षाहंकारेक्वोपदेशलब्धापरोक्ष्यस्यपरोक्ष्यात्मकोपदेशेनहान्यायातात्।श्रुत्यर्थस्तुभूमानारायणाख्यःस्यात्सएवाहंकृतिं
स्मृतः।जीवस्यस्वनिरूढ्योपःसोहंकारइतीरितः।अणुरूपोपिभगवान्वासुदेवःपरोविभुः।आत्मेत्युक्तःसर्वव्यापीत्यादिवाक्योक्तेप
भाष्योदाहृतस्मृत्यावगंतव्यः।मोक्षधर्मेचाअनिरुद्धोहिलोकेषुमहानात्मायरात्परः।योसौव्यक्तत्वमापन्नोनिर्ममेचपितामहं।सो
हंकारइतिप्रोक्तःसर्वतेजोमयोहिसइति।सर्वत्रचसैवहिसत्यादपरति।अन्यथाहंकारस्यव्याप्तत्वायोगात्।अहंकारश्चाहंकर्त्रंबु
चेतिश्रुतौमहाभूतान्यहंकारइतिस्मृतौचमहत्तत्त्वकार्यमनआदिकारणंवैकारिकादिभेदेनत्रिविधंचतत्त्वमुच्यतेनत्वहमर्थः।म
हत्तत्त्वाद्धिकुर्वाणाद्भगवद्वीर्यचोदितात्।क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत।वैकारिकस्तैजसश्चतामसश्चयतोभवः।मन
सश्चेन्द्रियाणांचभूतानांमहतामपीत्यादिस्मृतेः।अन्यथासंविद्धावितोबुद्धिशब्दस्यबुद्धिरव्यक्तमेवचेतिद्वेत्रेप्रयोगात्संविदयिद्धें
त्रंस्यात्।अहंकारशब्दस्यदंभाहंकारसंयुक्ताइत्यादौदेहेहंबुद्धौ।गर्वेचप्रयोगेरागद्वेषाभिमानोहंकारइत्यभिमानेचप्रयोगेनेहम म
र्थवाचित्वनियमाभावाद्।अहमर्थेहंशब्दप्रयोगेप्यहंकारशब्दस्याप्रयोगाच्च।आत्मवाचिनोहंशब्दस्यदकारांतस्यब्रह्मत्वेनाहंका

रवाचिनष्टुमकारांतात्ययत्वेन भेदस्यास्पष्टत्वाच्च। अहमर्थे आत्मानः धर्मदर्शनं त्वसिद्धं। कर्तृत्वादेरात्मधर्मत्वस्यैव समाणात्वात्। अं
ःकरणधर्मत्वेपि गौरोहमित्यारोपे देहस्यैवाहंकर्तृत्वत्रापि अंतःकरणस्याहमर्थानंतर्भावेपि धर्मारोपसंभवाच्च। पात्तु परकीयाहमर्थे
यमितिधीः सा अहमर्थस्यैव प्रतिसंबंधिभेदे तेदमर्थत्वान्नत्वहमर्थेनात्मांशसम्भवात्। अन्यथा परात्मन्ययमिति धीर्नस्यात्। न च स्वां
तेदरूप आत्मा अहं ज्ञानाम्यहं सुखीत्यहमर्थानभेदेन भातीति प्रुक्तं। अहमर्थाश्रितत्वेन प्रतीयमानयोरनयोरात्मत्वायोगात्। अस्याप्रती
तेश्रांतित्वे च विरोधात्। न वात्मा सर्वात्मकः। अहमर्थस्त्विदमर्थव्यावृत्त इति वाच्यं। सर्वात्मकेहमर्थे आत्मनीवेदमर्थव्यावृत्तिधियो भ्रां
तित्वोपपत्तेः। यत्तु अहमर्थो नात्मा अहंप्रत्ययविषयत्वाच्छरीरवदिति। तन्न। आत्मन्यपि अहमर्थांतर्गताधिष्ठानभूतचितोपितत्प्रत्ययविषय
त्वात्। किंच त्वयाप्यात्मनो गौरोहमित्यनात्मारोपाधिष्ठानत्वेमानभूतं भूयासमित्यादिनापरमप्रेमास्पदत्वे अहमर्थस्य स्वसत्तायां प्रका
शव्यतिरेकवैधुर्यतात्मनः स्वप्रकाशत्वे चोक्तं तत्सर्वमहमर्थस्यानात्मत्वे न युक्तं। न च प्रेमास्पदात्मैकारोपादहमर्थे न तदुक्तिः। अन्योन्याश्र
यात्। अहमर्थप्रेमगोम्यस्यात्मप्रेम्णोननुभवाच्च। अहितेहिततु ध्यात्प्रेमोत्पत्त्रावपि अप्रेमास्पदे प्रेमास्पदत्वारोपस्यादर्शनाच्च। वाच
स्पतिना। समारोप्यस्य रूपेण विषयो रूपवान् भवेत्। विषयस्य तु रूपेण समारोप्यं न रूपवदित्युक्तत्वेनाध्यस्तांतःकरणगतप्रे
मास्पदत्वस्यैवात्मनि प्रतीत्यापत्तेश्च। त्वदीत्या सुखानुभवरूपस्यात्मनः अहं सुखमनुभवामीति सुखानुभवाभेदेनैव प्रतीतेश्च।

न्या व० किंच मोक्षे हमर्थाभावे आत्मनाशो मोक्ष इति वा त्वमताप्ततिः। प्रेमास्पदं स्याहमर्थस्यत्वन्मते विनाशात्। तदन्यस्य प्रेमास्पदत्वान्म
८९ तेप्यनाशात्। अपि चैवमहं मुक्तः स्यामितीच्छा न स्यात्। तत्त्वात्मतयैव मुक्तिरिष्यते अहंकारे तु तदभेदारोपान्मुक्तः स्यामितीच्छाप
था शरीरस्यैव पुरुषत्वेच्छा या यथात्मनि तद्देक्यारोपादहं पुरुषः स्यामितीच्छा यथा वा आत्मन एव सुखेच्छायामपि तद्देक्यारोपाच्छ
रीरं सुखी स्यादिति इच्छेति चेन्न। अन्योन्याश्रयत्वोक्तेः। तत्र मामम त्वं कुक्षिज्योतिरहं विरक्ता विपाप्मा अक्षया स्यामित्यादिश्रुतिवि
रोधात्। तत्र शरीरं पुष्टं स्यादित्यपीच्छा वन्न। अहं सुखी स्यामित्यपीच्छावद्देहविन्मात्रे मुक्तः स्यादितीच्छायाः कदाप्यदर्शनेन
मुक्ते रतिपृत्त्वापातात्। न्यायं कश्चिदात्मा मुक्तः स्यादितीच्छया च न मुमुक्षुप्रवृत्तिः। ममात्मा मुक्तः स्यादितीच्छा त्वहमर्थस्यैव मुक्तौ
इच्छा न च स्वतः पुरुषार्थेच्छा इति यत्तु शक्यावोद्धतार्किकादिप्रियमिते यात्मनाशस्य स्वनाशादेरपि पुमर्थत्वापातात्। किं
चाहमर्थोतःकरणागर्भितश्चेत्ममसन इति धीर्न स्यात् तत्तदवच्छिन्नस्य पुनस्तदनन्वयात्। किं चैवं मन स्फुरति मनोस्मीति ज्ञाना
दहमिति ज्ञानस्य वैषम्यानुभवो न स्यान्। चिदविरुद्धं वत्वन विषयत्वाविशेषात् किं च सर्वापि अंतिह्यंशविषया अन्यथानि
रधिष्ठानभ्रमापातात्। तान्नवाहमिति बुद्धेर्ह्यंशत्वमनुभूयते। यदि कल्प्यते तदात्मेति बुद्धेरपि ह्यंशत्वं कल्प्यतां। न तु रूप्यं स्फुर न्याय
ति रूप्यमस्तीत्यत्रेवाहं स्फुरामि अहमस्मीति ह्यंशता भाति रूप्यं इमे विदमंशावच्छिन्नं स्फुरत्तामधिष्ठानमितीदं रूप्यमिति धीः ८९

रहं तु स्फुरणमात्रमधिष्ठानमिति स्फुरामीत्येव धीरिति चेन्न। त्वन्मते अनात्मानस्याप्यध्यस्तत्वे नाधिष्ठानत्वायोगात्। अहमिच्छामीति वदहं स्फुरा
मीत्यहमर्थस्थितत्वेन भासमानस्य स्फुरणस्य तदेकारोपाधिष्ठानत्वायोगात्। बाधकेन बाधिष्यमानस्याध्यस्तधर्मत्वेन भासमानस्य चास्तित्वस्याधि
ष्ठानत्वायोगाच्च। तदभिप्रेतस्याहमित्यत्रैव शब्दप्रमित्यस्यासिद्धेश्च। तस्मान्नाहमर्थस्यात्मत्वमाने। आत्मत्वे तु प्रत्यक्षेतावत्। अत्र मानानि च।
अहमर्थो मोक्षान्वयीत तत्साधनकृत्याश्रयत्वात्संमतवत्। अहमर्थो नर्थनिवृत्त्याश्रयः अनर्थाश्रयत्वात्संमतवत्। न चासिद्धिः। अहमतः अ
हं सुखमनुभवामीत्यबाधितानुभवात्। अनात्मत्वेनाहमर्थनिषेधे आत्ममात्रहन्तृत्वात् परत्ववदित्यादीति। श्रुतयश्च। कस्मिन्न्वहमुत्क्रान्ते उ
त्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत। हंताहमिमास्तिस्रो देवता इत्यादौ जगत्कारणोक्तिः प्राणमनःसृष्टेः प्रा
गेवाहंत्वोक्तेः। तदात्मानमेवावेदहं ब्रह्मास्मीत्यत्र चावधारणेन शुद्धात्मनो हंत्वोक्तेः। अनविद्यस्य च ब्रह्मणोऽहमुल्लेखोक्तेः। अहमिवे
वयो वेद्यः स जीवरति कीर्तितः। स दुःखी स सुखी चैव स पात्रं बंधमोक्षयोरिति श्रुतौ मोक्षान्वयोक्तेश्च। स्मृतयश्च। मामेव ये प्रपद्यन्ते मायामेतां
तरंति ते। तरति। स्वप्रपत्त्या मायानिरसनशक्तस्येश्वरस्याहमुल्लेखोक्तेः। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेत्यत्राहमर्थस्य मनआदि
सर्वकारणत्वोक्तेः। न चैव न भविष्यामः सर्वे वयमतः परमित्यत्रानित्यत्वोक्तेः। वेदैश्च सर्वैरहमेव वेद्य इत्यत्र सर्ववेदवेद्यत्वोक्तेः। ततो मां त
त्त्वतो ज्ञात्वा विशते तदनन्तरमित्यत्र मुक्तप्राप्यत्वोक्तेः। अहमात्मा गुडाकेश इत्यादावात्मत्वाद्युक्तेः। एवं चाहं ब्रह्मास्मीति यो हं सोसावित्यादौ

परेणापि तत्त्वेरणानाश्रयणीयात्। तस्मात्। अज्ञोहमित्याद्यध्यक्षान्त्रदात्मानमिति श्रुते। अहमात्मेति च स्वत्वाहंत्वं शुद्धात्मनस्थितं।। ।।
अहमर्थस्यानात्मत्वभंगः।। ।।यद्वोच्यते। जपाकुसुमस्य लौहित्यं स्फटिके एवमनःस्थकर्तृत्वमात्मन्यध्यस्तं न तु तात्विकं। आत्मनो निर्विका
रत्वात्। सुषुप्तौ बुद्ध्यभावेनाकर्तृत्वदर्शनात्। श्रुतिविरोधाच्चेति। तत्र ब्रूमः। प्रत्येकं स्फटिके पुष्पेपि वेद्यते त्वं तु द्वित्।। चितिबुद्धौ च कर्तृत्वं
साक्षात्कारः कदाचन। भवितं यहि बुद्धिस्थकर्तृत्वस्यात्मन्यारोपेरक्तं कुसुमपि तिवत् कदाचिन्मनः कर्त्रीति प्रत्यक्षप्रमया रक्तः। स्फटिकर
ति वक्कदाचिद्वेतन्यं कर्त्रीति प्रमेणा चान हि बुद्धिस्थं कर्तृत्वमप्रत्यक्षं। ननु मनस्येव तन्यात्मनाध्यस्तं कुसुमे तु न स्फुरिकात्मनेति वैषम्यमिति चेन्न।
अधिष्ठानात्मनानध्यस्तं जपाकुसुमादिस्थानीयमुपाधिं विनाभीषणात्वादिषु क्तः सर्वस्यारत्यात्मनेव कर्तृत्वादिषु क्त बुद्धेश्चिदात्मनाध्या
सेरज्ञो भीषणात्वांतरस्येवात्मनि कर्तृत्वांतरस्यानध्यासे च तदध्यासस्य सोपाधिकत्वायोगात्। मनो न स्फुरणं किं तु स्फुरतीति तयोर्भेद
धीरशायामपि प्रत्येकं कदापि कर्तृत्वाप्रतीतेश्च। इदंमर्थयोः शरीरात्मनोश्चाभेदग्रहणादशायामप्ययं भीषणः सर्पो भीषणः अहं गौरः श
रीरं गौरमिति वत मनश्चितोरभेदग्रहदशायामविस्फुरणं कर्तृ मनः कर्त्रीति धीप्रसंगाच्च। न चोपाधेरधिष्ठानात्मनाध्यासे पुपाधेस्तद्धर्मस्य
चाधिष्ठानसमसत्ताकत्वं वाऽध्यस्यमानादधिकसत्ताकत्वं वा सोपाधिकत्वे तंत्रमिति वाच्यं। आद्ये त्वन्मते बुद्धेस्तत्कर्तृत्वस्य वा चित्समस
त्ताकत्वाभावेन सोपाधिककर्तृत्वायोगात्। द्वितीये बुद्धिगतकर्तृत्वस्य पारमार्थिकताया वा आत्मस्थकर्तृत्वस्य प्रातिभासिकताया वा प्रसंगा

तात् ३ मयत्रापि नीरे क्षीरत्वाध्यासस्यापि सोपाधिकत्वायाताच्च । एतेन कर्तृत्वं बुद्धिगतमहमर्थे हमर्थगतं वात्मन्यध्यस्यते ततश्चैतन्यं क
र्तृ मनः कर्त्रिति प्रतीत्यभावो बुद्ध्यहं कर्त्रिति निरस्तं । आद्ये आत्मन्यारोपितस्यापि अनर्थस्याभावेन बुद्धेरेवाहमर्थस्यैव वा बंधमोक्षायाता
त् । द्वितीये हमर्थस्यैव नानध्यस्तकर्तृत्वेनैवाहं कर्त्रीति प्रतीत्युपपत्तावनितदध्यासासिद्धेः । किंच मनसः कर्तृत्वे तत्करणत्वप्रसिद्धि
विरोधः । अपि च कर्ता शास्त्रार्थवत्त्वादित्यधिकरणोक्तन्यायापि संसारी स्यात् बुद्धेः कर्तृत्वे प्राप्ते ज्ञो वस्येति सिद्धांतितत्वे न तद्विरोधः । बु
ध्यात्मनोरविवेकस्य सांख्यमतेपि सत्वात् । किंच बंधस्य तदपायेन हृते स्तत्फलभाक्त्वयोः सामानाधिकरण्याच्च न बुद्धेः कर्तृता
मता । तथा हि । कर्तृत्वभोक्तृत्वाद्यनर्थरूपो बंधो बुद्धिगतश्चेत्तर्हि मोक्षोपि तद्गतः स्यात् । बंधमोक्षयोः सामानाधिकरण्यात् । अस
न्नपि हि दुःखादिभोगद्रष्टा खो अनर्थः । न च बुद्धिगतं संभोक्तृत्वादिकं नानर्थः किं तु तदुपाधिकं मिथ्या भोक्तृत्वादिकमिति वाच्यं । प
तत्कल्पनायां कर्तृत्वाध्यासासिद्धिः । न त्वेनान्यो न्याश्रयात् । मोक्षस्य सत्यस्यैव पुरुषार्थत्ववत् भोक्तृत्वादिरूपबंधस्यापि सत्य
स्यैवानर्थत्वाच्चात् तु क्तं वार्त्तिके वोढुं प्रति । न हि स्वप्रस्तुत्वा घटं पुमान्वं च्छित्स्र वर्तते । पारार्थिकत्वात्स्वप्रस्यतच्छीमास्येत पंडि
ते रिति । स्थूलः कृशो भिक्षुर्लोमशं जरत्यादि प्रतीत्या देहस्याप्यनर्थत्वापाताच्च । नापि तु प्र्यहं तदुपाधिकमात्मस्थं भोक्तृत्वादिकम
नर्थः । न तु देहस्थमिति वाच्यं । अनर्थाश्रयस्यात्मनोनर्थकोटित्वायोगात् । अमकात्ते हं भोक्तेति प्रमाकाले तु बुद्धिर्यो क्रीत्येद

न्या प० प्रतीत्यासुखहेत्वनिकाशायितरप्रतीतेश्च। अपि च मतस्याध्यवसायादिकर्तृत्वे तत्फलं मोक्षोपि तस्यैव स्यात्। शास्त्रफलं प्रयोक्तरीति
न्यायेन यस्मिन् साधनकृतिस्तस्यैव फलभाक्त्वात्। अन्यथा कृतहानाकृताभ्यागमापातात्। ज्ञातेष्टाववि पवित्रार्थं तु त्र्यगतं एतत्त्वादि
९१ कं तद् दुःखाद्दुःपितुरेव फलं ते न तदुद्देशात्। तच्चेहात्मनः करणार्थः। चेन्नात्मगतो मोक्षो मनस उद्देश्यः स्यात्। आदिश्यादेतद्वि
दद्धिसो वफलं तान्चारोपितमेव वा आत्मारोपितमेव पाककर्तृत्वे फलान्वये तं च मिति चेन्न निरस्तत्वात्। सत्य कर्तृत्वे च स्यादुद्देशः सं
सारिकफलाभोक्तृत्वापाताद्वा न चोभयं तेत्र मनननुगमात्। अपि च कृतिकर्मत्वकरणत्वादीनां मनसि स्फुरितः दुःख्याभावेपि कर्तृत्वस्फुरते
र्हुर्ईने कर्तृता। अयते हि तन्मनो कुरुते त्यादौ मनसः कृतिकर्मत्वं। तथा एवं च तः श्रोत्रेण विद्धो सो मनसेत्यादिस्फुरतो शरीरवाक्यमनो
भिर्यत्कर्म प्रारभते नर इत्यादिस्मृतौ च करणत्वात्। यथा मन उद्दत्काम मीलितस्ववाच्छुव्यिव ज्ञास्ते चेत्यादौ मन उक्रमणो आत्मनः कर्तृत्वे
त्यथा परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षन् क्रीडन् रममाण इत्यादौ स्वरूपाविर्भावरूपपरमपुरुषाव
पिकर्तृत्वं। अपि च। अहं करोमीत्यध्यासात् तत्प्रात्यादिलिंगतः॥ स आत्मेत्यादिवाक्यात्तु क्षितकर्तृत्वमात्मनः। न चाहं करोमीत्यादिप्र राम
त्यक्षेण। आत्मा मोक्षसाधनविषयकृतिमान् तत्फलान्वयित्वात् संमतवत्। अत्र ज्ञानं ज्ञानसमानाधिकरणं ज्ञानं निवर्त्यत्वान् ज्ञान ९१
प्रागभाववत् दुःखादिभोगो मोक्षसमानाधिकरणः वंधत्वात् संमतवदित्याद्यनुमानैः। कर्ता विज्ञानात्मा यो वेदेदं जिघ्राणीति स

आत्मा आनंदभुक्तया प्रातरत्यादिश्रुतिभिस्सिद्धे आत्मनः कर्तृत्वादौ बाधकमस्ति। न च श्रुतिरनुवादः। अहमर्थान्यात्मस्वकर्तृत्व
स्य नामरूपे व्याकरोत्। स हि सर्वस्य कर्तेत्यादिश्रुत्युक्तेश्वरस्य कर्तृत्वस्य च प्रत्यक्षेण प्राप्तेः। न च निर्धर्मकत्वं बाधकं। निर्धर्मकत्व
रूपधर्मभावाभावाभ्यां व्याघातात्। ज्ञानत्ववत्सौषुप्तिकाज्ञानादिसाक्षित्ववत्। बुद्धिं प्रति तु ध्यविशिष्टस्यज्ञातत्ववद्वसत्यस्यासत्यस्य वा
ज्ञातत्वादेरप्यात्मन्येव संभवाच्च। नापि निष्क्रियत्वं बाधकं। क्रियाया धात्वर्थत्वे आत्मन्यप्यस्त्यादिधात्वर्थसत्तादेः सत्वेनासिद्धेः। परिस्पंद
त्वे ज्ञानादीनामपरिस्पंदत्वेनाप्रयोजकत्वात्। नापि निर्विकारत्वं बाधकं। आकाशस्य संयोगाद्याश्रयत्ववदात्मन अज्ञानतत्ध्वंसाद्या
श्रयत्ववच्च ज्ञानरूपगुणाश्रयत्वेपि द्रव्यांतरत्वापत्तिरूपविकारानापातात्। न च सुषुप्तौ मनसोऽभावे कर्तृत्वाद्यदर्शनं बाधकं त
दापुश्वासादिकर्तृत्वदर्शनात्। सुप्तौ भ्रर्भूरित्येव प्रश्वसितीत्यादिश्रुतेश्च। देहादिवन्मनसो निमित्तत्वेनापि तदुपपत्तेश्च। नापि
श्रुतिर्बोधिका। विज्ञानं यज्ञं तनुत इति श्रुतेः। विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत
इत्यादिवाक्यशेषेण ब्रह्मपरत्वात्। कामः संकल्प इत्यारभ्य एतत्सर्वं मन एवेति श्रुतेर्मनसा वा अग्रे संकल्पयतीत्यादिश्रुते
मनः करणकत्वपरत्वात्। आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति श्रुतेरात्मनो भोक्तृत्वे देहादिवन्मनः सहकारीत्येवंप
रत्वात्। ध्यायतीव लेलायतीवेत्यादिश्रुताविवशब्दस्य परतंत्रप्रभोऽप्रभुरिवेति वर्तत्रीवत्स्वकर्तृत्वस्येश्वरतंत्रत्वपरत्वात्। अ

न्याय० ९१

हंकारविमूढात्माकर्ताहमितिमन्यतइतिस्मृतेरपिजीवेस्वातंत्र्यनिवारकत्वात्।तत्रैवंसतिकर्त्तारमात्मानंकेवलंतुयः।पश्यत्य
कृतबुद्धित्वान्नसपश्यतीत्यादिवाक्यशेषात्।अन्यथोक्तश्रुत्यादिविरोधात्।नचकर्तृत्वस्यक्लेशसंबंधात्तश्रुतिस्तत्परादर्शपूर्ण
मासादावपिश्रुतात्पर्यापातात्।लीलादेरुक्तप्रासादेष्वाकरणापवत्क्लेशदर्शनाच्च।यदावैकरोत्यथनिस्तिष्ठतीतिश्रुत्यैवकर्तृत्व
फलसंबंधोक्तेश्च॥ ॥कर्तृत्वाध्यासभंगः॥ ॥यद्वोच्यते।आत्मनिदेहेंद्रियाद्येकांतधर्माद्याध्यस्यंते।तत्रचाहंब्राह्मणोहंका
णइत्यादिप्रत्यक्षंब्राह्मणोपनेतेत्यादिश्रुतिःदेहाद्यैकाध्यासाभावेस्तुत्रोप्रमाणत्वाद्यदर्शनात्रदन्यथानुपपत्तिश्चमान
मितितत्र।त्वन्मतेहमर्थस्यानात्मनाहंब्राह्मणइत्यादेर्देहात्मैक्याविषयत्वात्।देहात्मैक्यस्यप्रत्यक्षत्वेतद्विरोध्यनुमाना
घप्रामाण्यस्योक्तत्वेनतभ्देदासिध्यापत्तेश्चापरस्परंभिन्नत्वेननिश्चितानांदेहेंद्रियादीनांयुगपदेकात्मैक्याध्यासायोगा
च्चत्वन्मतेदेहात्मनोर्भेदस्याध्यस्तत्वेनजीवब्रह्मणोरिवतन्नाभेदाध्यासायोगाच्च।मिथ्यात्वेत्वधिष्ठानसत्तानावाध्यात्यंताभा
वप्रतियोगित्वंतद्बाध्यात्यंताभावप्रतियोगित्वस्यसत्वेपिसंभवात्।अभेदश्चभेदात्यंताभावइतिकथंभेदमिथ्यात्वेअभेदः
सत्योनस्यात्।नचदेहस्यस्वरूपेणौवाध्यस्तत्वाद्देहात्मनोर्नभेदोनाप्यभेदइतिवाच्यं।अध्यस्तादविरूप्याबुक्तेः।स्वत्तानावाध्य राम
अस्ति कश्चिद्वंद्रशब्दस्यार्थ इत्यत्रानितत्रधर्मिता न सा ध्यायां तु भक्तायां संदेहस्य चानुपपत्तेः चंद्रशब्दस्य प्रातिपदिकत्वान्नियुपेन १०८

स्विभक्तिप्रयोगाद्योगाद्वा चंद्र इत्यन्वयक इति प्रश्नायोगाद्वा नस्यतात्तमनुवादार्हं। असंकीर्णं चंद्रस्वरूपं न ज्ञातमिति चेत्। न। चंद्रस्वरूप
ज्ञानाभावात्। तदेव स्वरूपमसंकीर्णत्वेन न ज्ञातमिति चेत्। न। असंकीर्णत्वस्य व्यावर्तकवैशिष्ट्यव्याप्तिवैशिष्ट्ययोरन्यतररूपत्वेन प्रश्न
स्य विशिष्टपरत्वापातात्। एवं सामान्यतोऽपि न ज्ञातो धर्मी चंद्रोऽपदार्थतद्वा। न तु भूतमानसंदेहो नानुवादश्चपुद्यते। तस्माच्चंद्रस्येतरस्माद्भेद
को धर्म एव हि पृष्टस्तस्मात्प्रकृष्टप्रकाशादिवाक्यं नाकांक्षगोचरं। एवं प्रतिवचनस्य प्रकृष्टत्वादिविशिष्टे तात्पर्याभावे तात्पर्यतोऽपि कश्चिच्चंद्र इत्येव
बोधनात्। अत्र तात्पर्यविषयस्य च प्रतीतस्यान्यत्वात् त्वसत्त्वेऽपि यस्य कस्यापि चंद्रत्वं स्यात्। तात्पर्यविषये सर्वेऽयं चंद्र इति लक्षणात्त्वे स
रूपयोरेस्य विशेषयविभागाभावेन तात्पर्यतायत्किंचिदित्येव बोधनात्। तेन चंद्रत्वभुत्सानिवृत्त्यभावात्। कश्चंद्र इति प्रश्नस्योत्तरं वचनस्या
तासदेषामपिलक्षणावाक्यतात्पर्यजन्यज्ञानाभावस्तु गत्वा परस्परमित्र तत्तत्प्रा... कार्थविषयत्वेऽपि प्रकारभेदाभावेन तेन तेन
भिन्नभिन्नप्राकारकतत्तत्संदेहनिवृत्तिश्च न स्यात् प्रकृष्टादिपदवैयर्थ्यं च स्यात्। यावदर्थभेदेन सार्थक्यमिति तु निरसिष्यते। एतेन प्रश्नोत्तरे
तावच्चंद्रप्रातिपदिकार्थमात्रविषये प्रकृष्टादिविशेषणानुपभूतावासाधारणी विशेष्यव्युत्पत्तिः चंद्रप्रातिपदिकार्थः। न तु तद्विशिष्टप्रकृष्ट
प्रकाशश्चंद्र इति सह प्रयोगाद्ययोगात्। विशेष्यव्यक्तिश्चाखंडेति अखंडार्थपरे प्रश्नोत्तरे इति निरस्तं। अस्याप्यवासाधारणाप्रकृतेऽर्थवि
त्रैकादिवैशिष्ट्यरूपेणासाधारणेनाज्ञानेऽपि चंद्रप्रातिपदिकार्थत्वादिरूपेण प्रागेव ज्ञातत्वात्। एवं च गामानयेत्यादौ गोत्वस्यानयने
नेच प्रकृष्टत्वादेर्विधेयेन चंद्रप्रातिपदिकार्थत्वेनान्वये पुद्देश्यतावच्छेदकत्वेन विवक्षितत्वात्तद्वदेव विशिष्टार्थत्वं द्वयोः। अस्तिच

न्याया० पृथिवीत्ववती। पृथिवीत्यादौ पृथिवीत्वस्य विधेयेन पृथिवीशब्दार्थत्वेनान्वयः। न हि पृथिवीत्वं न पृथिवीप्रातिपदिकार्थः। सहप्रयोगस्य
१०९ पृथिवीशब्दस्य तद्बुद्धेन व्यवहर्त्तव्यतापरत्वात्। तस्माद्धर्मिताऽवच्छेदकस्य सामान्यतोऽनन्द्रत्वादिव्यावर्त्तकव्यासाद्यव्यावृत्तिरूपधर्मस्य च प्रश्नादौ
प्रागेव ज्ञातत्वात् विशिष्टविषये एव प्रश्नोत्तरे। तत्र यदि प्रष्टा व्यावृत्तिवैशिष्ट्यमेव साज्ञातं बुभुत्सितं तदा वक्ता व्यावृत्तेः। तस्माद्वृत्तेरिति सा ज्ञा
त्वम्यशतेनापि दुर्बोधत्वात् धूमेऽनुक्तेऽग्निमिव व्यावर्त्तकेऽनुक्ते व्यावृत्तिज्ञानस्येतीति भावेन व्यावर्त्तकवैशिष्ट्यमेव तात्पर्यतः प्रतिपादयति।
न ह्यग्निबोधनार्थस्य धूमोऽस्तीति वाक्यस्य न धूमे तात्पर्यं येन वाऽयोगान्वेयकस्य पद[illegible]ऽयादिवाक्यस्य न तद्व्यवदेवतासंबंधे। यदि तु प्रष्टैव व्या
वृत्तिप्रतियोगिनामानं त्वात्ता ज्ञातुं बुभुत्सुं वक्तुं चाशक्नोति ज्ञात्वा कश्चंद्र इत्यनया वा चोभंग्या कं विशेषणे विष्ट इति पर्यंतदा सुतरां प्रश्नोत्तरे
व्यावर्त्तकवैशिष्ट्यपरे इति न चंद्रपदस्य लक्ष्यार्थत्वं। असाधारणधर्मरूपलक्षणप्रश्नोऽस्ति। किंलक्षणकश्चंद्र इत्यसाधारणधर्मविषयस्य
कतमश्चंद्र इति जातिविषयस्य अनयोः कतरश्चंद्र इति गुणक्रियाजातिभिः पृथक्करणरूपनिर्धारणविषयस्य च प्रश्नस्योत्तरस्यात्राविप्र
तिवचनेऽल्लक्षणे नैः प्रश्ने विप्रकृष्टो वा प्रकाशो वेत्यादि धर्मविषयविकल्पसूचककिंशब्दप्रयोगाद्वा। एतेन प्रश्ने धर्मवाचि पदं नेति
निरस्तं। तथात्वे चंद्रधर्मस्यैव लक्षणीयत्वापत्त्या तस्यानपेक्षितत्वात्। चंद्रप्रातिपदिकार्थस्य सामान्यतो ज्ञातत्वेन तद्बुभुत्सायोगात्। ताल्लक्ष
णया वा प्रश्नस्थचंद्रपदस्यैव चंद्रासाधारणधर्मपरत्वस्य कल्पयत्वाद्वा। पद्मालक्षणावाक्यं अनुमानत्वे न वा प्रवाक्यत्वे न वा चंद्रव्यवहा राम
रकर्त्तव्यतावैशिष्ट्यपरमस्तु। चंद्रस्वरूपस्य प्रत्यक्षेणैव ज्ञातत्वात् चंद्रव्यवहारशब्देन च चंद्रशब्दविशेषितो व्यवहारो विवक्ष्यते न तु चंद्रः १०९

पार्थविशेषितः।येनतद्ज्ञानेवाक्यवैयर्थ्यंतदज्ञानेतुतस्यकर्त्तव्यताबोधनमशक्यमितिशंक्येत।नचैवंतद्व्यवहारादेवव्युत्पत्तिसंभवात्त्व
त्त्वावाक्यवैयर्थ्यं।शृंगग्राहिकतयोपदेशवदस्यव्युत्पत्त्यनुपायांतरत्वात्।एतेनमानांतरसिद्धेविशिष्यमखंडचंद्रसिद्धौउपायमात्रमितिकल्पतरूक्तं
निरस्तं।मानांतरेणाचंद्रप्रातिपदिकार्थःप्रकृष्टत्वादिविशिष्टस्यज्ञानात्।अस्मिन्ज्योतिर्मंडलेकश्चंद्रइतिपृष्टताचंद्रस्वरूपमप्रत्ययेता
स्तुतदंज्ञातत्वाच्च।तस्मात्साध्यवैकल्यंदुःपरिहरमित्यार्थनुमानमयुक्तं।तथाद्वितीयमपि।अप्रसिद्धविशेषणत्वबाधसत्प्रतिपक्षत्वदृष्टांतसा
ध्यवैकल्यादिदोषात्।प्रकृष्टादिवाक्येपकृष्टेत्यासत्यादिवाक्येपिबुभुत्सायदनुपपत्त्याब्रह्मस्वरूपमात्रप्रश्नोत्तरत्वस्यासिद्धेश्च।इहचकश्चं
द्रइतिवत्तत्क्रमस्यप्रश्नस्याभावात्।किंत्वस्यचतत्प्रोत्तरानुसारेणाधर्मविषयकस्यैववक्तव्यत्वाच्च।किंतमप्रात्मेत्यत्रकतरःसप्रात्मेत्यत्रचतत्पदा
र्थप्रश्नेप्राबद्धनांनानातिपरिप्रश्नेडतमपदद्वयोरेकस्यनिर्धारणेउत्तरवदतिसूत्रात्प्रयोगात्प्राग्नर्थकतमादिशब्दप्रयोगेनतत्प्रतिवचनेयोग्यविशे
नमपरत्वाद्यैयत्वेनत्वदभिमतेहेतोरसिद्धेश्च।किंचसर्वस्याप्युत्तरस्यप्रष्टुर्निर्धारितेऽप्रधर्मिविषयविद्धारितैकप्रकारपरत्वाद्धिरुद्धोहेतुः।यदि
वोत्तरजन्यज्ञानंनिष्प्रकारकंस्यात्तेतसप्रकारकसंदेहनिवृत्तिर्नस्यात्।यदिवोत्तरेप्रश्नादधिकविषयंनस्यात्तर्हुत्तरमेवनस्यात्।अन्यथाड
प्रपवोत्तरंस्यात्।किंचरोनिविकमानेपमित्यादिप्रश्नोत्तरेष्वध्यापनंकरोतिगामानयेत्यादिषुव्यभिचाराच्च।नहितान्यप्यध्यापनादिगोत्वादिना
गेनत्वत्त्वापाकर्मादिमात्रपराणि।एतेनसत्यादिवाक्यार्थःब्रह्मप्रातिपदिकार्थमात्रंतन्मात्रप्रश्नोत्तरवाक्यार्थत्वादितित्यायदीयावनु
मानव्यतिरेकानुमानेनिरस्तं।किंचैकप्रातिपदिकार्थप्रश्नोत्तरत्वेनकथमखंडार्थत्वं।त्वावोद्धव्यंतथाहिलिंगसंख्याकर्मादयोपिचा।नामार्थपदं

न्याया० कंप्राहुरणंत्रिकमथापरेइतिवैयाकरणमतेत्वदेकदेशिभिर्मयाप्राभाकरैश्चस्वीकृतान्विताभिधानमतेअभिहितान्वयमतेपिजाति
११० विशिष्टायांव्यक्तौशक्तिरितितार्किकमतेचप्रातिपदिकार्थस्यैवविशिष्टत्वात्।तातावेवशक्तिर्व्यक्तिस्तुलक्ष्येतिभाट्टानांतवचमतेब्रह्मप्रा
तिपदिकस्ययोगिकत्वेनतदर्थस्यविशिष्टत्वात्।तत्रचप्रातिपदिकार्थएवैतदेकदेशोक्तिर्युक्ता।किंचाप्रयोजकाहेतवः।तथाहि।विपक्षेबा
धकंकिंब्रह्मस्वरूपमात्रस्यैवबुभुत्सितत्वे।एकधैवानुद्रष्टव्यमित्यायभेदविधायकवाक्यैःअउदरमंतरंकुरुतइतिभेदनिषेधकवाक्यैर्वा
केवलोनिर्गुणश्चेत्यादिगुणनिषेधकवाक्यैर्वाएकमेवाद्वितीयद्वितीयमात्रनिषे कवाक्यैर्वासर्वतोनवच्छिन्नवस्तुपरानंतब्रह्मशब्दैर्वाऽन्य
यः।निरस्तत्वात्।सत्यादिवाक्येसत्सुविशेषणेषुसत्स्वितिकविधिवाक्येप्राशस्त्यस्वरसत्वप्रत्यायनाकांक्षायाउत्थापनीयत्वाच्च।उक्तंहि।आकां
क्षाप्रतिपाद्याभावनिमित्तेसाकांक्षाभावइति।निष्प्रकारकज्ञानस्याद्याप्यसिद्धेःसप्रकारकज्ञानस्यैवमोक्षहेतुतायाब्रह्मविदाप्नोतिपरमित्यने
नप्रतीत्यातमेवंविद्वानमृतइहभवतीत्यादिश्रुत्यायोवेदनिहितंगुहायामित्युत्तरवाक्येनचैःक्षाचमुमुक्षोःप्रकारयवधर्मिज्ञानसाध्य
बुभुत्सोविंत्याद्यानिर्गुणवाक्यवत्सगुणवाक्यस्यापिब्रह्मबुभुत्सायांकर्मकांडस्यचकर्मबुभुत्सायांवैद्यादिशास्त्रस्याप्योषधादिबुभुत्सायां
प्रवृत्ततयालक्षणयासगुणवाक्यमप्यखंडब्रह्मपरंकर्मकांडमप्यखंडकर्मपरंवैद्यादिशास्त्रमप्यखंडौषधादिपरमित्यापातात्।अस्तिच
धर्मत्वब्रह्मणःपापप्रलक्षणरूपंवाक्यंनमध्यमाः।तेषांवैक्यभेदाभावादिविशिष्टार्थपरत्वेवेदांतमात्रस्याखंडार्थतासिद्धेः।सत्यमुक्ताप्यमि राम
प्याविशिष्टार्थपरत्वेप्रामाण्ययोगाच्च।तेषामेवलक्षणयाखंडार्थतासत्यादिवाक्यस्यतुसत्यत्वादिविशिष्टार्थपरतेतिवैपरीत्यापातात्।३ ११०

र्मयोरपिमुमुक्षूक्तेयद्ब्रह्मपदत्वाविशेषात्। नचास्यांदशायांब्रह्मण्यभावरूपएवधर्मोमुमुक्षुलक्षणज्ञेयः। नतुभावरूपइतिसिद्धं तेनोपलक्षणताव
खंडार्थत्वेतुनतद्विरोधेनविशिष्टार्थस्यसत्यादिवाक्यस्यमुख्यार्थत्यागः। विशेष्यमात्रस्यविशिष्टपरेणाविरोधात्। नन्वेवमादेर्दूरत्वेनोपादानाद्वि
रोधइतिचेत्। न। दूरीभूतस्यब्रह्मान्यस्यसादेर्मिथ्यात्वेसत्यत्वादिधर्मपारमार्थ्याविरोधात्। सत्यत्वेचाप्यसिद्धान्तात्। दूरत्वानुपपत्तेर्वस्तुमात्र
त्वाच्च। अत्रापिसत्यत्वादेर्दूरत्वेनोपादानेनतेषामेवैतद्विरोधापातात्। नोत्पत्तेः। त्वन्मतेअनंतब्रह्मशब्दयोरपिलक्षणयाविशेष्यमात्रपरत्वेनावि
रोधित्वात्। अथयत्किंचिद्दुःख्यतेब्रह्मेतिवृहंतोस्मिन्गुणाइत्यादिश्रुत्यामहत्त्वाद्गमनेनतमाहुरित्यादिस्मृत्याचतात्पर्यस्यगुणत्वस्यैवसिद्धे
स्तावत्प्रतिकूलतर्कपराहतिर्ग्रातत्याहि। द्विविधमपिवेदान्तवाक्यंतत्त्वमस्यादितदृष्टांतीभूतंप्रकृष्टप्रकाशादिवाक्यंसोयमित्यादिवाक्यंचयदिसंसृष्टार्थंनस्यात्। वा
क्यमेवनस्यात्। आकांक्षासंनिधियोग्यतानामभावात्। आकांक्षायाअपिधानापर्यवसाने। प्रत्ययेनविनाततत्त्वार्थान्वयानुभावकत्वेतदेवचत
स्यापर्यवसानं। संनिधिस्तुअव्यवधानेनान्वयप्रतियोग्युपस्थितिः। योग्यताचेतरपदार्थसंसर्गेअपरपदार्थनिष्ठात्यंताभावप्रतियोगितावच्छेदक
धर्मशून्यत्वं। प्रमाणाबाधोयोग्यतेतिचेत्। न। पदार्थमात्राबाधस्यवाक्याभासेपिसत्त्वात्। संसर्गोवाधस्यचेहाप्यभावात्। तात्पर्यविषयाबाधो
योग्यतेतिचेत्। नायदार्थमात्रेवातात्पर्यायोगात्। नचयत्रपदार्थप्रमितस्तत्रसर्गेतरपदार्थविशिष्टप्रतीयायः। यत्रत्वज्ञातस्तत्रसंसर्गान्येःशक्ये
विशेषमितिसमेवप्रतिपाद्यः। प्रमितेचतस्मिन्वाक्यसमाप्तेनविशिष्टपरत्वमितिचेत्। न। उक्तरीत्याचंद्रब्रह्मादिप्रातिपदिकार्थानांसामान्यतोमा
नत्वेनेतरव्यावृत्यर्थप्रकृष्टत्वसत्यत्वादिनाविशिष्टैवबोध्यत्वात्। वेदान्तानांनिर्विषयत्वंचस्यात्। अखंडवाक्यार्थस्यस्वप्रकाशस्यचिन्मात्रस्याप्यवि

न्याया० घाघध्यासाधिष्ठानत्वेन तत्साक्षित्वेन च नित्यसिद्धत्वात्। निर्विमित्रः सर्ववेदांतानां मुख्यार्थत्यागश्च स्यात्। एकरसत्वादिश्रुतीनामपि विशे-
१११ ष्यमात्रपरत्वेन मुख्यार्थबाधकाभावात्। वेदांतजन्यज्ञानं च निष्प्रकारकं चेत्। ज्ञानमेव न स्यात्। ज्ञानस्येच्छादेरिव सविषयकत्ववत्सप्रकारक-
त्वस्यापि नियतत्वात्। किंचित्प्रकारं विना वस्तुनो वुद्ध्यवनारोहात्। इदमित्थमिति धीः। वेदांतानामवुभुक्षितार्थत्वं च स्यात्। श्रुतितात्पर्याधर्मिज्ञा-
नाधीनत्वात्। श्रोतव्यो मंतव्य इति विचारविधिश्चानुक्तः स्यात्। तत्स्यापाततदर्शनजन्यसंशयनिवर्तकसप्रकारनिश्चयार्थत्वात्। मुमुक्षु-
क्षुविचारकाणामाद्याध्यापत्तीयपादीयाधिकरणानामनारंभश्च स्यात्। विषयादिपंचकाभावात्। विशिष्य ज्ञातो हि विषयः। साधारण-
धर्मधीजन्यश्च संशयः। मिथ्यासत्यैकप्रकारावलंबिनौ च पूर्वपक्षसिद्धांतौ। एकतरप्रकारकनिर्णयाधीनं च प्रयोजनं। तच्च पंचकं
निर्विशेषे कथं स्यात्। ब्रह्मविदाप्नोति परमिति पूर्ववा[illegible]त्र ब्रह्मणः सामान्येन ज्ञाततया सत्यादिवाक्यवैयर्थ्यं च स्यात्। सत्यादिवाक्यस्य सत्य-
त्वादिविशिष्टे तात्पर्याभावे तात्पर्यतो यत्किंचिद्रूप[illegible]वबोधनाय स्वकस्य चिद्रूपत्वं च स्यात्। तात्पर्यविषयस्याखंडार्थत्वेनेदं ब्रह्मेति ल-
क्ष्यलक्षणारूपोद्देश्यविधेयविभागाभावेन तात्पर्यतो यत्किंचिदित्येवबोधनात्। तेन च ब्रह्मबुभुत्सानिवृत्त्यभावात् किं ब्रह्मेति प्रश्नो-
त्तरं च न स्यात्। न चोद्देश्यविधेयभावे सत्यपि श्रुत्या प्राप्तविधेयमात्रपरत्वादखंडार्थत्वाहानिः। विधेयस्यापि स्वरूपतोवज्ञातत्वेनोद्देश्य-
संसृष्टतयैवबोधनीयत्वात्। वाक्यांतरवत्सखंडार्थत्वापातात्। उक्तं हि किंचिद्विधीयते नू घ वाक्येनेति सतां स्थितिः। सत्यज्ञानादिवाक्येन वे- राम
द्यतां किं विधीयते। अज्ञातं [illegible]ध्यते किंचिद्वाक्येनेति सतां स्थितिः। सत्यज्ञानादिशब्दैस्तु किमज्ञातं प्रबोध्यत इति सत्यज्ञानादियदानंत्य- १११

लक्षणापि च न स्यात्। अत्र शक्यासंबन्धान्वयप्रतियोग्युपस्थितिर्लक्षणेति पक्षे लक्षणाया एवासंभवात्। शक्यसंबंधो लक्षणेति पक्षे त्वयाप्युपपत्तिरु
पलक्षणादीनामभावात्। सत्यादिपदानां पर्यायत्वं च स्यात्। न च कुंभाद्यनुगतसत्तापरजातिः अंतःकरणवृत्त्युपधानलब्धभेदचिदानंदवि
शेषानुगतेत्यानत्वानंदत्वे चापरजातीयवं च सत्यज्ञानानंदशब्दानां तत्त्वार्थाभेदे विकल्पे गोत्वजातिवाचित्वात्पर्यायतेति कल्पतरूक्तेर्दु
ष्टेः। कुंभाद्यनुगतसत्तापा ब्रह्मलक्षणत्वायोगात्। मिथ्यासत्यनुगतसत्तासामान्याभावाद्धानयानतातव्याहतत्वासिद्धेश्च। कालत्रयाबाध्यत्वरूपं
पारमार्थिकं सत्त्वं ब्रह्मणि श्रौतमिति त्वन्मतभंगापत्तेः। धर्मिसमसत्ताकभेदं विभोर्याधिकभेदमात्रेणाकाशत्वादेरिव सत्तानत्वादेरपि जातित्वायोगा
द्। योगे वा ज्ञानत्वादेर्धर्मिसमसत्ताकभेदवदुपहितवृत्तित्वे च शुद्धलक्षणत्वायोगात्। तावता न सत्त्वादिविशिष्टशबलब्रह्मवाचिनां सत्यादिशब्दानां
शुद्धब्रह्मणि लक्षणेति न पर्यायत्वमिति निरस्तं। अनंतात्स्वप्रकाशपरिच्छिन्नरूपे शबले[illegible]त्वादेरयोगेन। योगे वा तस्यैवानंतादिव्यावृत्तिः स्या
न्न तु शुद्धवैशिष्ट्ये तेस्यात्। तस्मात् सत्यत्वादीनां शुद्धार्थान्यत्रासंभवात् सत्यादिवाक्यस्य[illegible]लक्षणयाखंडार्थत्वे वस्तुद्वैतदसिद्धेः पर्यायत्वं दुर्वारं। पदां
तरवैयर्थ्यं च स्यात्। न च प्रातिपदिकप्रथमयोरिवैकार्थ्येपि पदांतरावैयर्थ्यमिति वाच्यं। तन्नु महाभाष्य एव किंतु न रत्र प्रथमयेति वैयर्थ्यमा
शंक्य ग्रामं गच्छेस्तं ग्रामं गच्छेत्सत्वमित्यत्र सर्वासां प्रथमायाः स्येव विधिर्यथास्यादित्यर्थवत्त्वोक्तेः। न च प्रतिपदमारोपितासत्यत्वादिव्यावृत्ति
रूपफलभेदादवैयर्थ्यमेवावर्तिकस्य सत्यत्वादेतात्पर्यतो नर्थतोव्याहत्यसिद्धेः। न च सत्यत्वादेरतात्पर्यविषयत्वेपि लक्षणातः प्राग्भिधाकाले
प्रतीतिमात्रेणातत्सिद्धिः। नद्यां घोष इत्यत्र तीरस्य नदीतः यजमानः प्रस्तर इत्यत्र प्रस्तरस्य यजमानाद्व्यावृत्त्यापातात्। न चातात्पर्यविशेषस्य

न्याया० त्यत्वादिकं व्यावहारिकं यज्ञमानत्वादिकं तु प्रातिभासिकमित्युक्तं। न चौपनिषदे ब्रह्मणि सत्यत्वादिकं प्रत्यक्षादिप्राप्तं येन व्यावहारिकं स्यात्
न च तत्वपरश्रुतीतं व्यावहारिकं व्यावहारिकपरा तु श्रुतीतं प्रातिभासिकमिति व्यवस्था। असद्वा इदमग्र आसीदिति तत्वपरेण प्रतीतस्य मूलकारण
११२ सत्वस्य व्यावहारिकत्वापाताच्च सत्यत्वादिकं तत्वावेदकबाधितत्वात् व्यावहारिकं यज्ञमानत्वादिकं तु व्यावहारिकबाधितत्वात् प्रातिभासिकमि
त्युक्तं। तत्वावेदकस्य विशेष्यमात्रपरत्वे न सत्यत्वाद्यबाधकत्वात्। व्यावहारिकबाधितस्याद्वैतवत्पारमार्थिकत्वोपपत्तेश्च। न च लक्षणा बीजेषु
व्यार्थबाधके तुल्येपि सत्यादिपदस्य वाच्यार्थे वांतरतात्पर्ये यज्ञमानपदस्य तु तन्नेत्यत्र हेतुरस्ति। येनोक्तव्यवस्था स्यात्। किं च व्यावृत्तयः
सत्या मिथ्या वा। आद्ये व्यावर्त्तकानामपि सत्यत्वं स्यात्। व्यावहारिकैर्व्यावर्त्तकैः पारमार्थिकव्यावृत्त्यसिद्धेः। किं च तासां ब्रह्माभेदे ब्रह्मपदेनैव
न सिद्धेरितरवैयर्थ्यं। व्यावर्त्तकधर्माणामपि सत्वे ब्रह्माभिन्नत्वं च स्यात्। अविशेषात्। एवं व्यावृत्तीनाममन्योन्यमभेदे सत्यपदेनैवाज्ञा
नादिव्यावृत्तिसिद्धेर्ज्ञानादिपदवैयर्थ्यं। तासां ब्रह्मणा परस्परं भेदे चाद्वैतहानिः। अभाववद्वैतस्य निरासात्। नांत्यः। शुक्ते शुक्तिताव्यावृत्ते
र्मिथ्यात्वे शुक्तित्वस्य शुक्तिसमसत्ताकत्ववदनृतव्यावृत्तेर्मिथ्यात्वेन तत्वस्य ब्रह्मसमसत्ताकत्वापातात्। तत्वजिज्ञासुं मुमुक्षुं प्रति मिथ्या
वोधनायोगाच्च। न चानृतत्वादिभ्रांतिनिवृत्त्यर्थं तद्बोधनं। अधिष्ठानब्रह्मतत्वज्ञानेनैव तन्निवृत्तिसंभवे भ्रांत्यंतरोत्पादायोगात्। न हि व
ल्मीके स्थाणुत्वभ्रांतिः पुंस्त्वस्योपदेशेन निवर्त्यते किं तु वल्मीकत्वस्य। न चात्मनि कल्पितेनापि ब्राह्मण्येन मिथ्याशंकिता ब्राह्मण्यस्येव व्या राम
वहारिकव्यावृत्त्या प्रातिभासिकानृतत्वभ्रांतिनिवृत्तिरिति वाच्यं। ब्राह्मण्यस्य देहविशेषसंबंधत्वे आत्मनि ब्राह्मण्यस्य जातिविशेषत्वे च व्या ११२

स्वरूपस्यासत्यत्वेनद्वयोः कल्पितत्वायोगात्। अस्थाद्वृत्तेर्व्यावहारिकत्वेऽनयोरितप्रामाण्येनअसद्वा इदमग्र आसीदितिवाक्येनासत्वस्या
रमार्थिकत्वापत्तेश्च। ननु मीमांसकमतेऽनन्तस्याप्यर्थवादार्थस्यासत्येप्राशस्त्यरूपविषयाभूतानामपि व्यावृत्तीनांसत्येब्रह्मणि द्वारत्वेन बोध
नेपुक्षंः। उक्तेहि सत्यादिशब्दाः असत्यादिव्यावृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यन्तीति चेन्न। न। ब्रह्मस्वरूपमात्रस्य श्रुतिं विना प्रामेवाविद्याध्य
ध्यासाधिष्ठानत्वादिनाज्ञातस्य पुनरपि ब्रह्मविदाप्नोतीति पूर्ववाक्येन सामान्यतोऽवगतस्यादिशब्दैः सत्यत्वादिविशिष्टतया व्यावृत्तिविशिष्टत
याचज्ञातत्वेन तद्ज्ञानस्य व्यावृत्तिज्ञानासाध्यत्वात् व्यावृत्तिज्ञानस्यैव च धर्मिज्ञानसाध्यत्वेन वैपरीत्यापाताच्च। शाब्दे अर्थे आर्थिकार्थस्य द्वा
रत्वानुपपत्तेश्च। नीलमुत्पलमित्यादेरपि अनीलव्यावृत्तिद्वारा स्वरूपमात्रपरत्वमित्यःपाताच्च। नच प्रागज्ञातो व्यावृत्त्याज्ञातो विशेषस्त
न्मतेऽस्ति। नच प्राक् ब्रह्मणोज्ञानेऽप्यन्याविषयकं तत्ज्ञानमसिद्धमिति वाच्यं। व्यावृत्तिज्ञानस्यान्याज्ञाने द्वारत्वापत्त्या ब्रह्मज्ञाने द्वारत्वायो
गात्। व्यावर्त्यज्ञाने व्यावृत्तिज्ञाने द्वारमिति वैपरीत्यापाताच्च। प्राचीने ब्रह्मज्ञानविवर्तके ब्रह्मापरोक्षज्ञाने तद्ज्ञानकार्यस्यान्यस्यभा
नायोगाच्च। ब्रह्मप्रातिपदिकार्थे तु भुत्सापामेतद्वाक्यं प्रवृत्तमिति स्वप्रक्रियाविरोधाच्च। किंच सत्यशब्देनाप्रख्यावृत्तिद्वारापद्बोधितं त
देव ज्ञानादिपदेनाज्ञानादिव्यावृत्तिद्वारा बोध्यतेऽन्यद्वा। आद्ये ज्ञानादिपदवैयर्थ्यं। द्वितीये सविशेषत्वान्नच द्वारविकल्पः। सत्यादिश
ब्दानां नित्यवद्भुमात्। एकस्मिन्प्रयोगे व्रीहियवयोरिवैकस्मिन्वाक्ये सत्याद्यनेकपदोपादानायोगाच्च। अनन्तत्वादिश्रुतिनिवृत्तिरूपद
ष्टकार्यत्वं भिन्नत्वे न व्रीहियवादिवद्विकल्पप्रयोजकस्यैककार्यत्वस्याभावाच्च। नापि समुच्चित्य द्वारत्वं। विज्ञानमानंदं ब्रह्मेत्यादौ अनन्तत्व

न्याया० वृत्तेरबोधनेपि ब्रह्मप्रतीतेः॥ आनंदादयः प्रधानस्येति सूत्रे तत्त्वमस्याद्युक्त्यायेनोपासनायां शाखांतरोक्तगुणोपसंहारेपि ब्रह्मप्रमितौ वाक्य
११३ स्य शाखांतरानपेक्षत्वाच्च। सत्यादिपदानां प्रत्येकं लक्षकत्वेन प्रत्येकं लक्ष्यबोधकत्वाच्च। सत्यत्वादेः प्रत्येकं लक्षणत्वाच्च न हि प्रकृष्टत्वा
दिकमिव सत्यत्वादिकं प्रत्येकमतिव्याप्तं। तस्मात्त्रयावृत्तिर्दुर्वारा। पत्ते न चैवं शाखैव ब्रह्मव्यावृत्तिद्वारेण तथा बोधयतीति निरस्तं। पत्ते नस
त्यत्वादिकं व्यावृत्तिद्वारा ब्रह्मबोधने उपलक्षणतया ग्रहीयत इति निरस्तं। काकवत् गृहमित्यादिवत् सखंडार्थत्वापत्तेः॥ उपलक्षणस्या
गेव ब्रह्मणो ज्ञातत्वेनोपलक्षणत्वायोगाच्च। तदुक्तं। सत्यज्ञानादिकेष्वेवं न व्यावृत्त्या प्रयोजनं व्यावृत्तिरस्य विशेषत्वे तदखंडं च खंडितमिति।
व्यावृत्त्या द्वारभूतयेत्यर्थः॥ टीकायां तु व्यावृत्तिः किं ब्रह्मविशेषणत्वेन बोध्या स्वतंत्रतया वा। आद्ये सखंडत्वं। अंत्ये ब्रह्मजिज्ञासैव प्रतितिष्ठेदुपदे
शासंगत इति व्याख्यातं। न चात्र व्यावृत्तिर्विशिष्यार्थिकत्वेन शब्दार्थस्य न सखंडत्वे पश्चार्थादर्थो न सचोदनार्थ इति न्यायात् मानां
तरादयोग्यस्तन शाब्दस्येन समस्तत्त्व इति हुरेपुरोक्त श्रुतिवाच्यां। आर्थिकेनापि विशेषेण ब्रह्मणोऽखंडत्वहानेः॥ अनंतशब्दे नांतव
छ्याहत्रेः सा सा उक्तेष्वा। शब्दस्य व्यावर्तकत्वे विशिष्टतात्पर्ये आर्थिकव्यावृत्त्यसिद्धेरुक्तत्वाच्च। यतेन लक्ष्यार्थभेदाभावेपि व्यवच्छेद्य
स्य भेदतः विज्ञानानंदपदयोः पर्यायत्वं र्थं तत्कुतः तस्यानंदबोधीक्रमयस्ते। नदीनाम गंभीरायां नद्यां घोषः इत्यत्र गंभीरनघोरम्यो
न्यमन्वयबोधानंतरं गंभीरनदीपदयोरिव समुदितानां सत्यादिपदानां लक्षकत्वात्त्रैवंप्रयोक्ताः त आष्ये केकस्य लक्षकत्वे शाक्यसं राम
बंधिनो गंभीरनदीतीरस्य प्रतीतिप्रसंगादित्याहुः॥ तत्र। तत्र गंभीरनघोरिवेह सत्यज्ञानयोरन्योन्यमन्वयाबोधनात्। सत्यं ज्ञानं तेविता ११३

नमानेदंबुद्धेसेत्यादावन्यानपेक्षाणामेव सत्त्वादिपदानां शुद्धलक्षकत्वदर्शनाच्च। गंभीरपदेन गंभीरसंबन्धितीरस्यैवेह पदांतरेणाधिक
र्थलाभाच्च। तत्रापि गंभीरनद्योरन्वयबोधानंतरं गंभीरान्वितनदीबोधके नदीपद एव लक्षणापासर्वापपत्तौ पदद्वय एव कस्माल्लक्षणा
याबाल्लक्षणाद्वयस्यवाऽकल्प्यत्वाच्च। लक्षणापि हि पदवृत्तिरिति त्वाद्बुद्धिवत्। एवमन्यत्रापि संगच्छते गच्छमिवेत्कोतेतत्रतदु
न्मनाम त्यनुमितिः प्रियामतिहेतुत्वाच्च गमनेन कर्त्तव्यमित्यनुमिता नुमितिरेव न तु वाक्ये लक्षणा। अनन्यलभ्यो हि शब्दार्थः। विधि
धुं स्वेत्यादावपि प्रकृताद्द्रतुगृहभोजनाद्विषभक्षणस्येष्टसाधनतोत्कटा भोजनस्यानिष्टसाधनताक्षिप्यते। न तु वाक्ये न भोजनाकर्त्तव्यतालक्ष्य
ते। यद्वा तत्र विषशब्दे नानिष्टसाधने विधिप्रत्ययेन च निषेधे लक्षिते विषभोजनेऽनुमितिधात्वर्थस्यापवेति न सर्वपदानामेकार्थलक्षकता। व
स्तुतस्तु अयमिदं नो मस्यं कुरु। आप्तत्वे सति प्रमाणविरुद्धकर्त्तव्यताभिधायित्वात्। क्रोधप्राप्तसन्निहितभोजनादेव गृहे तु त्यागेनादृष्टस्
स्यनायोगात्। अतो मयेदं न कर्त्तव्यमित्यनुमितिरेवात्र न लक्षणा। अर्धमेतगर्ह मध्ये वहिर्गर्ह मित्यत्रापि धूमेनाग्निरिवार्धस्यांतस्त्वे सत्यर्धस्य
वहिस्त्वे न वाक्यार्थेनांतरालप्रदेश आक्षिप्यते न तु समुदाये लक्षणा। अनन्यलभ्यत्वाभावात्। एवमर्धमंतर्वेदि अर्धं वहिर्वेदीति वैदिको दा
हरणमपि नेयं। तत्राप्यंततो लिङादेरभिधायकत्वाच्च। वायुर्वै क्षेपिष्ठेत्याद्यर्थवादिकपदसंघस्य वायव्यं कर्मेति क्षिप्रदेवताप्रसादहे
तुत्वरूपतत्पदार्थसंसर्गबोधकत्वमेव न तु तदन्यप्राशस्त्यलक्षकत्वे। किं च तत्र लिङाद्यभिधेयकार्यान्वयानुपपत्तिरिवेह सर्वपदाना
मपि लक्षकत्वात्राभिधेयान्वयानुपपत्तिरूपं लक्षणावीजमस्ति। अपि च सर्वपदानां लक्षकत्वे लक्षकपदान्यननुभावकानीति यत्नेसत्या

दिवाक्यस्यानुभावकत्वेनस्यात्।यदिचलक्षणयापरंब्रह्मपदंवाचकंतर्हियौगिकंतदेवसखंडार्थंस्यात्।ब्रह्मपदस्यपदांतरार्थान्वयार्थमेवलक्ष
णाश्रयतोनपदांतरार्थान्वितस्वार्थपरत्वस्यान्नानवयष्टीःप्रवेशयेत्यादाविवतात्पर्यानुपपत्त्यैवलक्षणानत्वन्वयानुपपत्त्येतिवाच्यंत
त्रापिभोजनादिकर्तृत्वेनप्रकृतानांप्रवेशनान्वयानुपपत्तेरेवतद्बीजत्वात्।इहप्राप्तेपदार्थमात्रेतात्पर्ययोगादितुक्रत्वाद्य।एतेनवा
क्यप्रामाण्यानुपपत्तिर्लक्षणाबीजमितिनिरस्तं।वाक्यस्यान्वयालक्षकतातुनसंमता।अन्विताभिधानांगीकारात्।अभिहितान्वयवादिभि
स्तार्किकैरप्यन्वयेलक्षणानंगीकाराच्च।अन्वयोलक्ष्यतइतिपक्षेपिपदांतरैःप्रतियोग्युपस्थितौप्रधानस्यैकपदस्यान्वयलक्षकत्वोपप
त्तेश्चगामानयेत्यस्यानगामानयशुक्लांदंडेनेतिवाक्यस्येवेहपदांतरयुक्तस्याधिकलक्षकत्वाभावाच्च।अस्तुवान्यत्रपदसंघेलक्षणा
इहतुनतथाहि।यदिकृत्स्नसत्यादिवाक्यंलक्षकंतर्हितस्यविशिष्टार्थत्वे:नेतद्ब्रह्मशब्दविशेषोक्तिःसत्यादिपदैनंतादिध्यवत्वे
दोक्तिःविज्ञानमानंदंब्रह्मसत्यंज्ञानमित्यादिश्रुतिःब्रह्मणोविज्ञानाद्यात्मकत्वप्रमाणमितियुक्तिःएकमेवाद्वितीयमित्यादौसजातीयविजा
तीयस्वगतनानात्वनिषेधोक्तिरित्याद्ययुक्तंस्यात्।सत्याद्युद्देशेनब्रह्मत्वाविधानात्ब्रह्मवृत्तानिवृत्तिश्चनस्यात्।सगुणस्यप्रपंचवाक्या
रपिलक्षणयाखंडार्थपरत्वसंभवेनसगुणनिर्गुणादिविद्याविभागःनिर्गुणादिवाक्यैःसगुणादिवाक्यानांबाधइत्यादिचासंगतंस्यात्।
तदैक्षतःसच्चबोधनतरत्वादीनामपिवाक्यलक्षणयाखंडपरत्वेनेक्षणादौतात्पर्याभावेनेक्षणानेतत्वादिलिंगैःप्रधानाकाशादिनि राम
रासकेसूत्राद्यधिकरणानारंभश्चस्यात्।इतरस्यब्रह्मकांडस्यवाक्यलक्षणयाखंडार्थपरत्वेकृत्स्नस्यचकर्मकांडस्यचैतन्यवेदनादिप ११४

रत्वेनिर्विशेषधर्मपरत्वेवास्यादित्यत्र।तस्मादखंडार्थत्वेपदांतरवैयर्थ्यंदुर्वारं।अपिचसत्यानंदादिपदलक्ष्यत्वेब्रह्मणोनदीपदलक्ष्यस्यतीरस्यान
दीत्ववदसत्यत्वानानंदत्वादिकंस्यादितिभ्रमवादायत्तिः।मुक्तिश्चापुमर्थःस्यात।आनंदानुभवाभावात।ननुनदीशब्देननदीत्ववाविनातदाश्र
यव्यक्तेर्नलक्षणा।किंतुतदाश्रयव्यक्तिसंबंधिनस्तीरस्येतितस्मान्नदीत्वस्येहतुसन्घटइत्यादाविवसत्ताजातिवाचिभिःसत्यादिशब्दैस्तदाश्रयव्य
क्तेरेवलक्षणा।एवंचसत्वसंबंधस्याशाब्दत्वेपितीरस्यनद्येवब्रह्मणोपिघटस्येवसत्तायासंबंधःसिध्यति।अखंडार्थासंबंधेलक्षणायोगात।
जातिव्यक्त्योश्चतादात्म्यसंबंधात।उक्तंहि।सत्वादीनांहिजातीनांव्यक्तितादात्म्यदर्शनात।लक्ष्यव्यक्तिरपिब्रह्मसत्वादिनजहातीतिचेत।न।
व्यक्तिशब्दार्थइतिमतेसद्व्यक्तितोन्यस्यैवलक्षणीयत्वेनब्रह्मणः।सत्वासिद्धेः।ननुगंगाशब्देजहल्लक्षणा।आनंदादिशब्देषुतुजात्यंशमा
त्रेपिव्यक्त्यंशात्यागात्तजहदजहल्लक्षणेतिकथमनानंदत्वापत्तिरितिचेत।न।तत्रानंदत्वजातेरसत्वे तत्तद्व्यक्तेरानंदव्यक्तित्वासिद्धेः।तत्सत्व
स्यचौपनिषदेब्रह्मण्यशब्देनासिद्धेः।जातिशब्दार्थइतिमतेपिसन्घटइत्यादावपिशब्देनसत्तावैशिष्ट्याप्रतीतेर्लक्षणाहेतुत्वेनप्रतीतेश्चहापि
सत्वेनतद्विशिष्टार्थमिदंत्वखंडार्थमितिविभागायोगेनविभागार्थंसन्घटइत्यादितोविशेषेणसत्यादिशब्दानांलक्षकत्वार्थंचनघटादेष
इत्यादाविवजात्याश्रयव्यक्तिसंबंधित्वेनैवब्रह्मणोलक्षणीयत्वेनसत्वाद्यसिद्धेः।एतेनयथाशोणिमगुणवाचिनःशोणशब्दस्यगुणविशिष्टा
श्वव्यक्तिर्लक्ष्ययथावातहुणसंबंधिनबहुव्रीहौकर्णादिवाचिनःकर्णादिशब्दस्यतद्विशिष्टोन्यपदार्थोलक्ष्यः।तथासत्वादिवाचिनोसत्या
दिशब्दानांसत्तादिविशिष्टोलक्ष्यइतिसत्तासंबंधःशाब्दएवेतिनिरस्तं।लक्ष्यस्यतात्पर्यविषयस्यविशिष्टत्वापातात।नचसन्घटइत्यादौवि

न्या या० शिष्टं लक्ष्यं इह तु व्यक्तिमात्रं तेनेह शब्दस्याखंडार्थत्वं लक्षणाहेतुत्वेन ब्रह्मणः सत्त्वसिद्धिश्चेति वाच्यं लक्षणाया अप्यजहदादिवातात्त्विकस्यैव
११५ संबंधेनाप्युपपत्तेः । श्रुतेरेव वाच्ये सत्त्वेऽपि तात्पर्यं तु सखंडार्थत्वं । न चानुगतसत्त्वैव ब्रह्मेति सत्तासंबंधाभावेऽपि सत्त्वादिवाच्यो वा व्यतिरिक्तं
लक्ष्याभावापातात् । ब्रह्मणः परं तत्त्वादिरूपजातित्वायोगाद्बोधे न ब्रह्मस्वरूपातिरिक्ता सत्ता हीनमपि सत्तावत्सत्त्वभावमिति निरस्तं । स
ब्रह्मस्य तत्त्वलाक्षणिकत्वात् सत्तायामिव च मानांतराप्रवृत्तेर्ब्रह्मणः सत्त्वभावत्वे मानाभावात् । कथं च परमार्थसति मुख्यस्य सत्त्वं ण
ब्रह्मजातिबाधिता । तद्भिन्नेरेकत्वात् । येन सतद्वं कुंभ इति पदानि तत्र जाति द्वारा एकां कुंभव्यक्तिमिव सत्यादिपदान्यपि सत्तादिजाति
द्वाराएकामेव वानेदव्यक्तिं लक्षयंतीति कल्पतरूक्तं निरस्तं । तद्धि देवातात्त्विकसत्तादिविशिष्टार्थत्वापातात् । एवं चासोगतोक्तस्वामिम
तप्रपतासिद्धये परैः । सत्यज्ञानादिवाक्यानां लक्षणोक्तापराम्नि । तस्मात् सत्यज्ञानादिवाक्यानां नाखंडार्थत्वं ॥ ॥ सत्यज्ञानादिवाक्याना
मखंडार्थत्वानुमानभंगः । तत्त्वमस्यादिवाक्यस्याखंडार्थत्वानुमाने अप्ययुक्तं । उक्ताप्रसिद्धविशेषणत्वबाधप्रतिरोधाप्रयोजकत्व
प्रतिकूलतर्कपराहत्यादिदोषात् । उक्तरीत्या अंत्यहेतोरसिद्धेश्च । उभयत्रापि दृष्टांतस्य साध्यवैकल्याच्च । न तु सोऽयमित्यत्र किं तद्देशका
लादिविशिष्टस्यैतद्देशकालादिवैशिष्ट्यं बोध्यते तद्देशकालादिविशिष्टस्यैतद्देशकालादिवैशिष्ट्यं वा विशिष्टद्वयैक्यं वा नाद्य एतत्कालादि
विशिष्टस्य प्रत्यक्षत्वेनानुपदेश्यत्वात् । तत्कालादेरपीदानीं सत्त्वापत्तेश्च । न द्वितीयः । एतत्कालादेस्तदा सत्त्वापातात् । न तृतीयः । विशेषण राम
भेदेन विशिष्टाभेदायोगात् । विशिष्टं हि यदि विशेषणविशेष्यसंबंधरूपं तदा विशेषणभेदेन । यदि तु पदार्थांतरं तदापि विशेष्यभेदेनैव ११

विशिषणाभेदेनान्वितस्येदस्यावश्यकः। तस्मात्सोयमित्यादिवाक्यं लक्षणयाखंडार्थमिति चेत्। उच्यते। अस्तु तावदनुभवकालसंबंधपवतत्रा
तथापि वाच्ययोर्वा तयोरविरुध्यमानरूपयोरिव च तदेतद्देशकालसंबंधरूपयोस्तत्तेदंतयोः परस्परमनन्वयेपि पयकविशेषणविशिष्टेतर
स्यावृत्तावपि पकविशेष्यवर्त्तित्वं तावदस्ति कालद्वयासंबंधिपदार्थो नेत्तत्तीकत्वापातात्। तद्देशद्वयसंबंधस्यापि कालभेदेनाद्भवात्। सोय
मितिपदद्वयं च तत्तेदंतयोरेकवर्त्तित्वबोधने शक्तं समानाधिकरणत्वात्। भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिर्हि सामानाधिकरण्यं। नच
विशेष्यस्य तत्तेदंतान्वयपरमपीदं वाक्यं विशिष्टस्य तदन्वयपरं नेत्येतावता खंडार्थं। नीलमुत्पलमित्यादेरपि अखंडार्थत्वापातात्। एवं चाका
लद्वयेन योगस्य क्रमेणास्यापि वस्तुनि नित्यरक्तत्ववत्सत्वान्न तदुक्तौ काविरुद्धता। विशेष्ये धर्मसंसर्गपरं वापि विशेषिते तत्परं नेत्यखंडा
र्थस्याद्वैतं सर्वतया भवेत्। एतेन विशेष्यस्य कालद्वयसंबंधेनैवत्तत्तीकत्वानायत्तेर्विशिष्टस्य तत्संबंधो नापेक्षित इति निरस्तं। मयापि विशे
ष्य एव कालद्वयसंबंधोत्र देवदत्तस्वरूपमात्रे बुभुत्सितमिति तु निरसिष्यते। न च तत्ताया अतीतत्वमात्रेण तत्पदस्य लक्षणा। घटेन
ष्टत्वादाविवातीततत्ताद्रूपस्वार्थात्यागात्। अन्यथा तत्तादेरतात्पर्यविषयत्वेन सोयमित्यनेन देवदत्तस्य कालद्वयसंबंधो न सिध्येत्।
तस्मादेकविशेषणविशिष्टे विशेषणांतरान्वयावबोधकमपीदं वाक्यं विशेष्यस्य क्रमिकधर्मद्वयान्वयपरत्वात्सखंडार्थमेव। किं च त्वदु
पन्यस्ते पदत्रयेपि न दोषः। तत्तादेरतीतत्वेपि यदन्वितत्तयात्तात एव तात्पर्यविषयभूतेतरान्वयधीस्तत्वरूपस्य विशेषणत्वस्य संभवा
त्। न च विधेयान्वयेवविशेषणं। शंखो नित्यरत्नादौ शङ्खत्वादावव्याप्तेः। नापि विधेयान्वयकाले सदेव विशेषणं। दंडी भविष्यति दंड्यासी

न्या० दंडी नास्तीत्यादावव्याप्तेः। गुरुः। हनिष्टे काकादावतिव्याप्तेश्च। नापि विधेयान्वयप्रतियोगितावच्छेदकं वा स्वप्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकं
११८ वा विशेषणं। अवच्छेदकस्यान्यूनानधिकदेशकालत्वरूपत्वेन तस्य सास्नादिमान्गौरित्यादिषु लक्षणतावच्छेदकरूपविशेषणेषु सत्त्वे विशे
ष्यः शुक्लः इत्यादावव्याप्तेः। नहि गोत्वं शुक्लान्वयप्रतियोगित्वेनापि तद्व्यावृत्त्याधिकरणं वा। अन्यूनानधिकदेशं। अवच्छेदकत्वस्य च वृत्त्याप्तातत्प
र्यवपदन्वपधीसत्त्वरूपत्वे वेहाप्यवच्छेदकत्वस्य सत्त्वात्। नहि काकोपस्थापितसंस्थानवत्त्वं यावत्तात्पर्यवद्देवदत्तीयत्वधीवद्देवदत्तगृ
हे व्यावृत्तिधीरूपफलवृत्तत्वोपस्थापितधर्मितावच्छेद्यात्तात्पर्यवेदं त्वधीः। अपि दं व्यावृत्तिधीर्वा किंतु तत्तावत्त्वयाज्ञातपदवाच्यत्वाद्यापितत्वो
पस्थापितदेवदत्तसंस्थानविशेषवत्त्वयात्तात्पर्यवेदं त्वादिधीः। तत्रेदंतादिसंबंधस्य प्रत्यक्षत्वेनानुपदेश्यत्वात्। तस्माद्दतीतमपि पदन्वित
तयात्तात्पर्यवे त्याद्युक्तलक्षणं पुनः त्वेहि विशेषणमेव। नेदं पुनः त्वे हृदुक्तमानमप्यविशेषणमेव। अत एवाहुः। सदसद्व्यासमानाधिकरणं
विशेषणमिति। तस्मात्स्वत्रवेपि न दोषः। न चाद्ये वाक्ये वैयर्थ्यं। इदंतावैशिष्ट्यस्य प्रत्यक्षत्वे चित्रत्वाविशिष्टे तस्याप्रत्यक्षत्वात्। तत्वा
यद्दितीयपयोर्वृत्तिसितस्याभेदस्य साक्षाल्लाभः। पुरोवर्तितिनाद्यवैशिष्ट्यभ्रमनिरासार्थं सवाञ्च व्यत्यभिप्रायेणाकोपमितिप्रश्नेस
यमितुक्ते। अभेदश्रमेतिरसितव्योमभेदोक्तो वा भेदकोक्त्यापि साक्षाद्भेदभ्रमनिवृत्तेश्च। अभेदस्य तु वृत्तितत्वे वाक्यस्याभेदविशिष्टपरत्वे
नसत्त्वं उपार्थत्वापत्तेश्च। न तु तृतीये विशिष्टे को विशेषणे कस्यात्। न च धूमवदग्निमतो रेको विधूमाग्नेर्भेदो रहस्यरतिवा त्वं। तत्रापि वि राम
शेष्यस्यैवैक्यात्। न च तर्हि द्विपत्ताभावाद्विशिष्टे को न विशेषणे कायापादनायोगः। अग्निमतोऽग्निमतैकोऽग्रेरग्निनैकादर्शनात्। समुदायवि ११८

पविशेषणभेदेसमुदायेकास्याव्याहतत्वान्नेति चेत्‌। न। विशिष्टमपदार्थांतरमिति मते विशेष्यस्यैवैकाधिकरणत्वेपि धर्मयोरप्यदृश्यतावच्छेद
कत्वेन विशेषणत्वात्‌। तस्येव विशिष्टाभेदशब्दार्थत्वात्‌। पदार्थांतरत्वमित्यावयोर्मतेतु धर्माग्रोपंदेपि धर्मवानग्निमानित्यबाधितसामानाधि
करण्यधीबलेन विशिष्टयोरभेदस्यापि सत्वात्‌। अन्यथा इदंरूप्यमित्यत्रेपुरोवर्त्तिनिरूप्याभेदाप्रतीतेः। रूप्यार्थिनः पुरोवर्त्तिनि प्रवृत्तिर्न
स्यात्‌। तन्नेदंतोपलक्षितैकावोधनमिति त्वन्मतेवाच्यं स्यात्‌। तत्रेदंतोपलक्षितत्वरूपविशेषणभेदाद्विशिष्टभेदात्‌। अस्तु वा तन्नेदंतयोर्मध्ये
एकस्योपलक्षकत्वेन यथापीदंताविशिष्टस्योपलक्षणीभूतत्कालसंबंधो वा तत्रोपलक्षिताभेदो वा तत्राविशिष्टस्योपलक्षणीभूतेदंतासंबं
धो वा इदंतोपलक्षिताभेदो वा बोध्यतां न चैतावता वाक्यस्याखंडार्थत्वेउपलक्षणस्यकाकादेः स्वरूपं प्रकारत्वेन प्रकारांतरेण स्याप्येकत्वेन
च निष्प्रकारकत्वरूपाखंडार्थत्वविरोधित्वात्‌। एकस्योपलक्षणत्वेप्यन्यस्य विशेषणत्वाद्वा नाप्युपलक्षणत्वमात्रेणातं द्वाविशब्दानां ला
क्षणिकत्वं। वृत्तिविशेषरूपलक्षणाया व्यावृत्तैकविशेषरूपोपलक्षणस्यत्वभिन्नत्वात्‌। दृश्यते हि घटस्याभावः जपमिस्यापसहत्यादाव
भावादिकं प्रतिघटादेरुपलक्षणत्वेपि घटादिशब्दस्यालाक्षणिकत्वं। दृश्यते चेदं प्रभिप्रायेणाप्रयुक्तेदंडमानयेत्यत्र दंडशब्दस्य दंडिनि ला
क्षणिकत्वेपि दंडस्यानुपलक्षणत्वं। वरं चोभयपदेलक्षणातः एकपदलक्षणा न चेदंताविशिष्टस्यतत्तया तत्ताविशिष्टस्य चेदंतयाकदा
प्यसंबधान्नते प्रतितयोरुपलक्षणे तितिवाच्यं। तयोस्ताभ्यां विशेष्यद्वारा संबंधात्‌। परंपरासंबंधिनोप्युपलक्षणत्वात्‌। यद्वेदंतोपलक्षितस्य
तत्ताविशिष्ट्यं तत्ताविशिष्टाभेदो वा तत्तोपलक्षितस्येदंताविशिष्ट्यं वा इदंताविशिष्टाभेदो वा बोध्यतां। ननु यद्यपीदंतया तत्तया वोपलक्षितस्य

 तिशेष्यस्य तत्रावैशिष्ट्यं चारदं तावैशिष्ट्यं वा युक्तं ॥ विशेष्ये विषयतांतरान्वयात् । अभेदपक्षोऽत्र नयुक्तो । अनुपपन्नत्वात्तयोर्विशेष्यविशिष्टयोरभे
 दावोमात्ररतिचेत्तान । समवायस्थाने भेदाभेदाविस्यावयोर्मते व्याप्तत्वात्तुपपन्नयोरपि तयोः पर्वतो ग्निमानिति धीवालान्तातिव्याप्तो रिवमर्द्दूरयो
रिववाभेदस्याविसत्वात् । अतस्या पर्वतो ग्निमानिति लैंगिकधीरपि निर्विकल्पिका स्यात् । केवलाभेदस्य पतिरागमिनिदेवदत्तपिंडेपि नास्त्येव
यहूतत्रोपलक्षितस्येदं तावल्लक्षिते नवारदं तोपलक्षितस्य तत्रोपलक्षिते नवापेक्षावोध्यतां । नचैतावता खंडार्थत्वादिकमिद्धुक्तं । तदेतत्
दभिप्रेत्योक्तं । अनित्यदेशकालसंबंधस्य सत्वात्तु सोयं देवदत्त इत्याद्यपमाचेति । टीकायांतु तद्देशकालसंबंधमात्रं न तत्रां किंतु तत्ध्वंस
सवेदानीमस्ति । पूर्वं चयस्तेत्रयेपि नदोषइत्युक्तं । तद्धस्त्स्यिति प्रदर्शनार्थात्रेदं तयोर्न केवलं वास्त्योव नवनसामानाधिकरणमा
त्रं किंतु नीलत्वोत्पलत्ववत्समानकालत्वमपीति प्रदर्शनार्थं चानतु सखंडत्वार्थं उक्तरीत्यान्यथापि तत्सिद्धेः ॥ परेरगा तद्देशकालसंवंद्धं
एतद्देशकालसंवद्धइत्यस्मिन्नुदाहृते टीकोक्तप्रकारप्रसराद्भूपुरुक्तं वानुभवकालध्वंसएवतत्रेति । अन्यथा पूर्वकालविषयेऽनुभवेविस्मृ
तावित्तत्रोल्लेखः स्यात् । अस्यानुभवयोः संस्कारत्वान्यत्वान्यत्वाभ्यांभेदेपि अनुभवकाले सतः कालस्य स्मृतिकालेवस्तुगत्यातीतत्वेपि तद्विष
यक तवेल्लक्षणाभावात् । तत्रामात्रे चस्मृतेरननुभूतविषयत्वमिष्टमेव । नचातिप्रसंगः ॥ अनुभवबलेनानुभूतकालध्वंसत्वस्य तत्रत्वात् ।
पूर्वकालसंबंधस्तत्रेतिपितेविषयननुभूतापि भूततामातीतिवक्तव्यं । तत्रत्वं तदा तयासीदिति स्मृतावननुभूतस्य भूततत्वस्योल्लेखात् । ननु
पूर्वकालध्वंसविशिष्टोमध्येव्यक्तिरदेतो विशिष्टस्तामध्येनेतिकथं तयोरभेदः ॥ नचेदं तानेनतत्कालसंबंधः किंतु तत्प्रागभावः तद्विषु मध्ये प्र

सोतीति वाच्यं। पूर्वकालध्वंसविशिष्टस्येदानीमसत्त्वेप्येतत्कालप्रागभावविशिष्टस्येदानीमभावादिति चेत्। न। अत्र तत्त्वंपदार्थयोरभेदस्य वि
शेष्यमात्रस्यैवोचितत्वात् तदेवविशेषणत्वस्य समर्थितत्वात्। किं च तत्त्वमते सोयं देवदत्त इति वाक्यस्य किं देवदत्तस्वरूपमात्रे तात्पर्यं उत तत्त्वेदंतो
पलक्षिताभेदविशिष्टे वा। उत्क्राभेदोपलक्षिते वा। नाद्यः। तस्य प्रत्यक्षसिद्धत्वात्। अत एवाधार्यमानाभावे न तत्र तुल्यसाध्यवादभेदप्रमाद्य
योगात्। अभेदाबोधने भेदारोपनिवृत्त्ययोगाच्च। एकेनैव पदेन प्रतीतत्वे नपदांतरवैयर्थ्याच्च। न चान्यलक्षणायां सोयमितिपदद्वयं देवदत्त
पदेनैव प्रतीतत्वात्। स एव तु उत्क्रयं देवदत्त इत्यादौ सोयमितिपदद्वयेनैव लक्षणासिद्धौ पदांतरवैयर्थ्याच्च। न द्वितीयः। तत्त्वेदंतयोः समानविभक्ति
कपदद्वयेन प्रातिपदिकार्थयोरस्याभेदरूपसंसर्गस्य बोधनेऽखंडार्थत्वहानेः। न हि क्रियाकारकभावान्वय एव संसर्गः। नीलमुत्पलं
निर्घटं भूतलं घटः पटो नेत्यादेरप्यखंडार्थत्वापातात्। न च भावाभेदाभावमात्रेणाखंडार्थत्वमित्यानंदबोधोक्तं युक्तं। स्वोचितसंस
र्गान्यसंसर्गाबोधकत्वस्य सर्वत्र सत्त्वात्। उपलक्षणेनाभेदेनोपलक्षस्य देवदत्तस्य प्रागेव निश्चितत्वाल्लक्षणात्वायोगाच्च। देवदत्ते हि त
त्राभेदस्य प्रत्यक्षसिद्धत्वाच्च। तस्माद् भेदो न सिद्ध इति चेत्। तस्मादिति कोर्थः। किं तत्राविशिष्टादिति किं वा तत्रोपलक्षितादिति। यद्वा तत्त्वेदं
विवक्षितात्स्वरूपमात्रादिति। नाद्यद्वितीयौ। सखंडार्थत्वापातात्। उक्तरीत्या लक्ष्याकाराभावेनोपलक्षणात्वायोगाच्च। न ततीयः। दत्तोत्र स्वा
त्। एवं चाप्रत्यक्षत्वाद्देवदत्तस्वरूपं नैव बोध्यते। सोयमित्यादिवाक्येन किंत्वेकादिविशेषितं। अपि च सोयमिति प्रत्यक्षप्रत्यभिज्ञातावत्त्रा
खंडार्थविषया। तत्र शब्दवृत्तेर्लक्षणाया अयोगात्। तत्त्वेदंतादेरभेदस्य च प्रकारस्योल्लेखादनुभवात्। तद्वदुल्लेखे प्रत्यभिज्ञा अभिज्ञाते विशेषो

न्याया०
११८

नस्यात्। तथा च शास्त्रप्रत्यभिज्ञापितथा। स्वप्रत्यभिज्ञावगतस्यैव परं प्रति बोधनात् तस्मात्तदुःपरिहरं साध्यवैकल्यं। किंच तत्त्वमसीत्य
स्याभेदविशिष्टे तदुपलक्षिते वा तात्पर्यं चेदुक्तरीत्या अभेदरूपसंसर्गबोधनेन सखंडार्थत्वं। किंच चिन्मात्रस्य चिन्मात्रेणाभेदबोधने
इष्टापत्तिरप्रसक्तप्रतिषेधश्च। तत्पदादिवाच्यसार्वज्ञाद्युपलक्षिताभेदबोधने तु सखंडार्थत्वं। सार्वज्ञादेः प्रकारत्वेनानुप्रवेशात्। तच्चे
तन्मात्रपरत्वं चेत्तस्य स्वप्रकाशस्य नित्यसिद्धतयोपदेशवैयर्थ्यं। वाक्यात्प्राक् चैतन्याज्ञाने उक्तरीत्या तत्त्वबुभुत्सा च नस्यात्। तस्मा
धर्मिज्ञानसाध्यत्वात् भेदभ्रमश्च नस्यात्। अधिष्ठानज्ञानाभावात्। महावाक्ये न भेदभ्रान्तिनिवृत्तिर्नस्यात्। भ्रमकालज्ञाताधिष्ठा
नादधिकाबोधनात्। महावाक्यस्यावांतरवाक्येन गतार्थत्वं स्यात्। तत्पदार्थशोधकेन सत्यंज्ञानमित्यादिना त्वंपदार्थशोधकेन योयंवि
ज्ञानमयपरत्यादिना चावांतरवाक्येन लक्षणया शुद्धचैतन्यबोधनात्। महावाक्ये एवानेकपदवैयर्थ्यं च स्यात्। एकेनैव पदेन लक्ष
णार्थशुद्धबोधनात्। कथं तेन भेदभ्रमनिरास इति चेत्। अधिकार्थाबोधनेन वाक्येनाधिकधीः। न हि वाक्यमदृष्टद्वारा भ्रमनिवर्तकं। न च
तात्पर्याविषयेणाप्यभेदेन तन्निवृत्तिः। अतिप्रसंगात्। न चैकस्य पदस्य लाक्षणिकत्वापवादांतरं। तत्त्वमिति विरुद्धार्थवाचिपदद्वयसा
मानाधिकरण्याधीनत्वाल्लक्षणाया इति विवरणोक्तं युक्तं। चैतन्यपदेनैव विवक्षितसिद्धौ तत्त्वमिति लाक्षणिकपदद्वयेन तद्बोधने क्ले
शायोगात्। गंगायां घोष इत्यत्रापि घोषपदं गंगाशब्दस्य लाक्षणिकत्वाय न तु स्वार्थार्पणायेत्यायाताच्च। अभेदरूपान्वयबोधनेप राम
दद्वयसामानाधिकरण्यस्य लक्षणाकल्पकत्वायोगाच्च। सदेवेत्यादिपूर्ववाक्यलक्षितचिन्मात्रस्य प्रकृतत्वाविनात्तत्पदेन लक्षणां ११८

विनैव परामर्शसंभवात्॥ संभवा पक्षमहानसे अस्त्येतादि महावाक्ये लक्षणायाः स आत्मेति यदहं पसामानाधिकरण्येनैव सिध्याप दांतरवै
प्यर्थ्यात्॥ वाच्यार्थभेदग्राह्यतत्वावेदकप्रत्यक्षत्वबाधके ततत्वावेदकेनाहंत्ववाक्येन तयोरेव तात्विकाभेदबोधनसंभवेन लक्षणाया अन
पेक्षितत्वात्॥ एतेन वाक्यस्य पदस्येव लक्षकत्वादनेकपदोपादानमिति निरस्तं॥ अन्यथानुपपत्तिरूपलक्षणाबीजार्थमेव वाक्यस्वतु
स्यापेक्षितत्वात॥ त्वमसीत्युक्ते विवाक्यस्य लक्षत्वसिद्धेश्च॥ एतेन यदुक्तं विवरणे अभिज्ञातः प्रत्यक्षाणः शाब्दी वा प्रत्यभिज्ञायाः कार्यवत्त्रमेयतो
विशेषः॥ अभिज्ञया ज्ञातस्यैव देवदत्तेकस्य प्रत्यभिज्ञया पिग्रहणात॥ नहि देवदत्तस्य स्वेनैक्यमभिज्ञायां न भाति॥ न चानभिज्ञातं प्रत्य
भिज्ञयाज्ञेयं देवदत्तस्य स्वेनैक्यं तरमस्ति॥ एकस्य कालद्वयसंबंधः प्रत्यभिज्ञागोचर इति चेत न॥ एकस्य कालद्वयसंबंधस्य चाभिज्ञा
प्यामेव सिद्धेः॥ तस्मात्प्रमेयतो न विशेषः किंतु फलतः॥ कालद्वयसंबंधिपदार्थद्वयविषयत्वे द्वयोरविशिष्टेऽपि प्रत्यभिज्ञाया एवका
लद्वयपरामर्शित्वेन पदार्थभेदभ्रमनिवर्त्तकत्वात॥ तत एव च प्रामाण्यमपि॥ एवं चेत तत्त्वमसिवाक्यस्य सत्यता नाद्विवाक्यात्तत्पदाव्प्र
मेयतोः विशेषेपि धर्मद्वयपरामर्शित्वेन भेदभ्रमनिवर्त्तकत्वात प्रामाण्यं॥ उक्तं हि॥ सिद्धं तु तन्निवर्त्तकत्वादिति तन्निरस्तं॥ अभिज्ञाप्यां तदिद
एकस्मिन्कालद्वयसंबंधस्य देवदत्ते देवदत्ताभेदस्य च ग्रहणे विप्रत्यभिज्ञत्वे वेकस्मिन्कालद्वयसंबंध इति वा कालद्वयसंबंधाधार एकदे
तिवा अग्रहणे न प्रत्यभिज्ञाया प्रमेयत एव भेदात॥ न हीदमिति ज्ञानं वस्तुतः शुक्तौ शुक्त्यपेदग्राह्यपीयं शुक्तिरिति ज्ञानवदिदं शुक्तित्वाबाधा
रपकरस्याकारं॥ अन्यथा फलतो विविशेषो न स्यात॥ कालद्वयपरामर्शमात्रेणाभेदभ्रमनिवृत्तो भेदभ्रमकालेपि तस्य सत्वात तेन निवृत्तिः

न्यां या० स्यात।एवंतत्वमसीत्यत्रापीतिदिक्।एतेनऽयापास्तमेदभिन्नार्थयैनैकःप्रतिपाद्यते।तदपिस्यादखंडार्थमहतवंकुं।मखंयपश्चेतिकल्पतरू
११९ तौ।सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणि।अर्थेप्रमाणंमानत्वाच्चयनादिप्रमाणवदितिचित्सुखोक्तंवानुमानेनिरस्तं।अप्रसिद्धविशे
षणत्वादिदोषग्रस्तात्।एकत्वप्रतिपादकत्वरूपस्यापिहेतोःसखंडार्थत्वेनैवव्याप्ततयाविरुद्धत्वाच्च।आकाशेशशःस्वाभाविकइतिवत्स
माणत्वेनसाधनवैकल्याच्च।घटाकाशोमहाकाशइत्यत्राप्याकाशस्वरूपमात्रबोधनेभेदभ्रमनिरासायोगेनाधिकस्यबोध्यत्वेन
वैकल्याच्च।द्वितीयहेतोसंसर्गादन्यस्मिन्नंसार्गिण्यपिप्रामाण्यस्यममतेपिसत्वेनसिद्धसाधनाच्च।श्लोकस्यअग्निहोत्रादिगीरेतत्प
दार्थव्यतिरेकिणीत्यपिपठितुंशक्यत्वेनाभासमसाम्याच्च।तस्माद्दृष्टांतःसगुणब्रह्मपराइति।ब्रह्मानंतगुणमितितत्वमस्यादिवाक्यस्याखं
डार्थत्वानुमानभंगः।तथाहि।ब्रह्मणोधर्माःकिंसाधकाभावान्नसंतिउतबाधकसद्भावात्।नाद्यः।बृहंतोह्यस्मिन्गुणाःपरास्यशक्ति
र्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच।सत्यकामःसत्यसंकल्पइत्यादिश्रुतीनांब्रह्मेशानादिभिर्देवैःसमेत्ययद्गुणांशकाः।नाव
सायपितुंशक्तोव्यावृत्तात्मसर्वदा।मय्यनंतगुणेनंतेज्ञोवत्तेपूर्वमहावबोधसहीर्वशक्त्यादिगुणैकराशिः।परःपराणामित्यादि
स्मृतीनांअनंतस्तद्धर्मोयदेशात्।अनंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्।अदृश्यत्वादिगुणकोधर्मोक्तेः।सर्वधर्मोपपत्तेश्चेत्यादीनांनि
र्णायकसूत्राणां।ब्रह्मधर्मसत्तासमानसत्ताकधर्मवत्।उक्तसत्ताकभावरूपधर्मवद्वा।कवस्तुस्वरूपमनुवर्त्त्रमानधर्मवद्वा।उक्तवि राम
शेषणाबच्छिन्नभावरूपधर्मवद्वा।स्वज्ञानाबाध्यधर्मवद्वा।स्वज्ञानाबाध्याभावरूपधर्मवद्वा।धर्मैर्भविरूपैर्धर्मैर्वाहीनेनावतिष्ठते।पदार्थता ११९

त॰भावत्वात्। अभावविलक्षणत्वाद्वा घटवत्। ब्रह्मस्वज्ञानाबाध्यप्रकारवत्। स्वारोपितव्यावर्त्तकस्वज्ञानाबाध्यप्रकारवद्वा अधिष्ठानत्वा
च्छुक्तिवत्। ब्रह्मस्वज्ञानाबाध्यदुःखव्यावृत्तिमत्॰ स्वज्ञानाबाध्यदुःखव्यावर्त्तकधर्मवद्वा दुःखानात्मकत्वात्। घटवत् ब्रह्मस्वज्ञानाबाध्य
प्रकारकज्ञानविशेष्यं॰ संदिग्धत्वात्। विचार्यत्वात्॰ निर्णीततत्वात्वा व्याख्यातृपुवत्॰ ब्रह्मवेदांततात्पर्यगोचरप्रकारवत्॰ वेदांतविचारविष
यत्वात्॰ यदेवं तदेवं यथा कर्मकांडविचारविषयो धर्मः। ईश्वरः सदावाप्तसमस्तकल्याणः। गुणः सदा तत्प्रेप्सुत्वे सति तत्र शक्तत्वात्॰
यो यदा यत्प्रेप्सुत्वे सति यत्र शक्तः स तदा तद्वान् यथा चैत्रः। ईश्वरः सदा त्यक्तसमस्तदोषः सदा तज्जिहासुत्वे सति तत्यागे शक्तत्वात्॰ यो यदा
यज्जिहासुत्वे सति यत्यागे शक्तः स तदा त्यक्तदोषः यथा चैत्रः। तत्रासादिकं च प्रेक्षावत्वाद्दिनारम्भार्थीनो विवक्षेधिष्ठानत्वसंदिग्धत्वा
दिकं च साध्यादिसाधनानुकूलतर्कसनाथानुमानानां च समत्वात्। न चानवस्थानिरासाय कश्चिदुर्मो निर्धर्मकइति तत्राद्यहेतौ व्यभिचार
ः। साध्याभावरूपनिर्धर्मकत्वरूपस्य पदार्थत्वात्यकस्य हेतुरूपस्य च धर्मस्य भावाभावाभ्यां व्याघातात्। प्रमेयत्वाभिधेयत्वादीनामवा
धितानुभवबलेनत्वदभिमतमिथ्यात्वरूपत्वादिवत्तस्य वृत्तित्वाच्च। गोत्वादेरपि गोव्यक्तिरेव वा गोत्वगतेत्वा अपव्यक्तिप्रत्य
व्यावर्त्तकत्वं वा व्यावर्त्तकमिति निर्दुःखानात्मकत्वस्य तत्र व्यभिचारः। न च श्रुतिं सगुणब्रह्मपरानुतुपरब्रह्मपरेति वाच्यं। सगुणनिरि
क्तपरस्यापि द्विः। तत्वस्य हेतिता त्रिकगुणावच्छेत्तरा भावाच्च। परः परात्पराणामित्यादिस्मृतौ पराणां परत्वोक्तेश्च। अन्यथा सदेव सौम्येदम
सद्वा इदमग्र इति सदसत श्रुतौ अविपरीतपरब्रह्मविषये॰ ग्रहणं ग्रहणश्रुतौ अविपरीतपरयागविषयस्यातो। असन्नेव स भवति असद्ब्रह्मेति

न्या०या० वेदवेद्यमिति श्रुतिरपि नासत्त्वनिंदार्था किंतु अन्यतायतिरूपपरमभोग्यपरेति स्यात्। नचेदानीं सगुणं स्वरूपं त्तरे तु निर्गुणं तथा त्वविगुणा
१२० नामनित्यत्वमात्रायत्तात्वभिमतमिथ्यात्वासिद्धेः। ज्ञानं नित्यं क्रियानित्या बलं नित्यं परात्मनः। एष नित्यो महिमा ब्राह्मणस्येत्यादिश्रुतेश्च।
एष नित्य इति श्रुतिश्च ब्रह्मपरा पूर्वं तन्नावेदविन्मनुते तं बृहंतमिति ब्रह्मणः प्रकृतत्वात्। उत्तरत्र च न कर्मणा वर्धते नो कनीयान् तस्यैव
स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति ब्रह्मणो गात। बृहदारण्यके सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना क
र्मणा भूयान्नो एवासाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल इत्यादिना ब्रह्मोक्ता तत्र समतित्वेन तदेतदृचाभ्युक्त
मेष नित्य इत्यादि मंत्रस्योदाहृतत्वाच्च। अन्यथा ब्रह्मेदानीं सहशांतरेत्वमदिति स्यात्। न चौपाधिका धर्माः। औपाधिकत्वस्य सोपाधिका
ध्यस्तरूपत्वे श्रुत्यप्रामाण्यापातात्। वस्तुमात्रसत्यत्वश्रुतिविरोधाच्च उपाधिकृततत्वरूपत्वे तु उक्तनित्यत्वश्रुतिविरोधात्। अंतःकरणा
दिरूपोपाधिसंबंधः प्रागेव दूषितत्वादिश्रुतेश्च। स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतेश्च। न च योगोपलब्धयोगिधर्मादिवदस्या
त्रेण तदुक्तिः। संकोचकाभावेनोक्तनित्यत्वश्रुत्यनुसारेण स्वाभाविकज्ञानसमभिव्याहारेण चौपाधिमात्रनिषेधात्। अन्यथा ब्रह्म
णां सत्त्वमौपाधिकमसत्त्वे तु स्वाभाविकमिति स्यात्। न चातात्त्विका गुणाः श्रुत्या गुणमात्रेणातात्त्विकत्वावबोधेरिति वाच्यं। नित्यत्वोक्तिसा
मर्थ्यात्। विषयाबाधलक्षणप्रामाण्यस्यैवस्मार्तिकत्वात्। सत्यं सौम्य महिमेत्यादिश्रुतेश्च तत्सिद्धेः। अन्यथा समस्तानंतत्वमसीत्यादिश्रुतेस्तु राम
त्वब्रह्मसत्त्वे क्वाचित्कमपि तात्त्विकं न स्यात्। निर्गुणश्रुतिविरोधस्तु उद्धरिष्यते। किं च तद्विरोधे विश्रुतेर्नातात्त्विकविवक्षता युक्ता। उक्तं हि कौह १२

मीमांसकोक्तयाद्विरोधे शास्त्रयोर्विषयः॥ एकं प्रमाणमितरत्त्वप्रमाणं भवेदिति। तथाहि पूर्वतंत्रे प्राप्तबाधोऽप्राप्तबाधश्चेति द्विविधो बाधस्त-
क्तः॥ तत्र दाशमिके प्राप्तबाधे प्रकृतिवत्कुर्यादित्यादिरूपस्य प्राप्तस्य चोदकादेः कृष्णलादाववघातवर्जनमित्यादिरूपः संकोच एव पर्यवसिता
तोऽप्यप्राप्तबाधे गार्हपत्यमिति द्वितीयादिश्रुत्यनुसारेणेंद्रशब्दयुक्तमंत्रलिंगस्य गार्हपत्योपस्थानादिकत्वमेव। एवं व्याकरणेऽपि परेण
पूर्वस्यानित्येनानित्यस्यांतरंगेण बहिरंगस्य प्रतिपदोक्तेन लक्षणोक्तस्येत्यादि बाधस्तक्तः॥ तत्रापि संकोच एवं ब्रह्ममीमांसायामपि विकारस्य
ह्यान्नेति चेन्न प्राप्नुर्यान। उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्॥ गोऽल्पसंभवादित्यादौ शास्त्रयोर्विरोधे तात्त्विकार्थोऽन्तरपरत्वमेवो-
न्नत्वारोपितार्थत्वं। अन्यथेत्तत्त्वाद्यधिकरणेषु सिद्धांतसाधकानामीक्षणादीनां सांख्याद्यभिमतप्रधानादावारोपसंभवात्। क्वापि सिद्धांतान-
सिध्येदिति सर्वमपि शास्त्रं पुनर्मूले तस्मात्। किं च दशमे विकृतिभूत महापितृयज्ञप्रकरणस्थे नार्षेयं वृणीत इत्यादिवाक्ये प्रकृतिवत्कुर्यादि-
र्षेयवरणवर्जमिति महापितृयज्ञीयप्रकृतिवद्भावैकवाक्यतयापर्युदासार्थत्वमेवेत्युक्तं। अत्र प्रकृतिभूत दर्शपूर्णमासप्रकरणस्थाज्यभागवि-
धायकवाक्यसंनिहिते न तौ यज्ञे करोतीत्यादौ याजुषप्रकृतिवद्भावैकवाक्यत्वायोगेन नञः पर्युदासार्थत्वासंभवात्। प्रकृतिवत्कुर्यादित्याज्य-
गौ तु न कुर्यादिति वाक्यभेदेन प्रसज्यप्रतिषेधार्थत्वमेव युक्तं। तत्र यथाज्यभागयोरन्यत्राप्रसक्तेः शास्त्रप्रसक्तस्य च सर्वथा बाधायोगात् हिंकं
स्यारत्युक्तं। एवं च यदा प्रतिषेधो ज्ञातप्रसक्तेरपि न सर्वथा बाधः। तदा किमुवक्तव्यं प्रत्यक्षसगुणशास्त्रप्रसिद्धानां न सर्वथा बाध इति ननु निर्गु-
णवाक्येन निषेद्धुं सगुणवाक्यस्याध्यारोपापवादन्यायेनानुवादकत्वे संभवेद्वाक्यभेदे न गुणज्ञापकतानपुक्तेति चेतान्न। सत्यकामत्वादी-

न्याया०
१२१

नामन्यतोऽप्राप्तेः। श्रुतिप्राप्तस्य च श्रुत्या निषेधे अहिंसावाक्यमग्नीषोमीयहिंसायाः अग्रहणवाक्यं च षोडशिग्रहणस्य असङ्गेत्यादिवा
क्यं च ब्रह्मसत्त्वस्य भेदवाक्यैक्यवाक्यस्य निषेधकं स्यादित्युक्तत्वात्। किं च मत्उमदेत्यादिविधिर्नेक्षामेदिति निषेधस्येव सगुणवाक्यमेव निर्गु
णवाक्यस्य बाधकं किं न स्यात्। न च जगत्कर्तृत्वेनास्ति प्रसक्तस्य सार्वज्ञादेर्निषेधायानुवादः। अप्राप्तिप्रसक्तस्य तु नः अप्राप्त्या निषेधायोगात्। अन्यथा
श्रुतेन ज्ञाननिवर्त्यत्वेन जगदारोपाधिष्ठानत्वेन समवेदे सर्वमात्मैवेदं सर्वमिति श्रुतेन जीवब्रह्मणोः सार्वात्म्ये न चास्ति प्रविविक्तपि च[illegible]
ब्रह्मसत्त्वे जीवब्रह्मैक्यं च विष्णुसत्यमित्यनेन असद्वा इदमित्यनेन ह्यात्मस्तुपर्तेत्यनेन च निषेद्धुं नेह नानेत्यनेन सत्यं ज्ञानमित्यनेन तत्त्वमसीत्य
नेन वा नूद्यत इति स्यात्। किं च श्रुत्यास्ति प्रसक्तस्य सार्वज्ञादेः श्रुत्या निषेधे विप्रकृतस्य सर्वकर्तृत्वादेः कथं निषेधः। किं वाद्वैतश्रुतेर्निर्गुणश्रुत्य
तरस्य वा तात्पर्यापरिज्ञानप्राप्तनिर्गुणत्वमेव सगुणवाक्येन निषेद्धुं निर्गुणवाक्येनानूद्यत इति किं न स्यात्। वैगुण्यमेव पश्यति न गुणानित्ति
निर्गुंजत इति भारतोक्तेः। किं च निर्गुणवाक्यं पवसाक्षी चेतेत्यादि नाऽदृष्टत्वादिगुणविधानार्थं तेन तन्निषेध इति न तदर्थं सार्वज्ञादिवा
क्यमनुवादकं। अन्यथा सार्वज्ञादेर्व्यावहारिकमपि सत्वं न स्यात्। नहि निषिद्धं ब्राह्मणाहननादेव वांतरमवितान्यपि। न्वोपनिषद
स्य ब्रह्मणः सार्वज्ञादिकमनुमानादिसिद्धं। ननु सगुणवाक्यं वाचेवेनुमुपासीतेत्यादिवदुपासनार्थं उपासनावाः कर्तव्यत्वे गुणेषु च तात्प
र्यं वाक्यभेदादिति चेतन। उपासनायाः कार्यत्वे विशेषरान्मत एव च। उभयत्रापि तात्पर्यमात्मोपासनादिके विधा वितिस्पतिविरोधात्। यः सर्व
ज्ञ इत्यादावुपासनाविधेरश्रवणाद्युकल्पनस्य च निर्गुणवाक्यविशेषकत्वात्। किं च आत्मेत्येवोपासीतेत्यो न्यादेवतामुपास्त इत्यादावद्वैतस्या

राम
१२१

फयास्यत्वंश्रूयते।किंचत्वेपेवतृतीयस्यतृतीयेपादे आनंदादयइति सूत्रे आनंदं ब्रह्मेत्यादिश्रुतिसिद्धा आनंदादयः व्यतिहार इति
सूत्रेतत्त्वोहमितिश्रुत्युक्तं जीवस्येश्वरत्वमीश्वरस्य च जीवत्वमुपास्यमित्युक्तं।तथा।उत्तरस्मिंस्तापनीये शेषप्रश्नेथकोउके मंडूकादौ च
सर्वत्र निर्गुणोपास्तिरिति नेति नेति निर्गुणं ब्रह्मोपास्यमित्युक्तं।एवं चोपास्यत्वेप्यानंदादेरिवंपेवत्र स्येव निर्गुणब्रह्मणः स्वचसत्वकाम
त्वादेरपितन्निकृतास्तु।भाविते हि त्वयेवव्यतिहार इति सूत्रे यथा ध्यानार्थे विसत्यकामत्वाद्युपदेशो तद्गुणार्थश्च रः सिध्यति तद्देवाप्यिति भा
मत्सोचताद्। तत्स्वाद्वैतुभवन्नोपेत्तामहे सत्यकामादिगुणोपदेशिरवतद्गुणेश्वरसिद्धिमिति।वचानंदादिवाक्यसत्यकामादिवाक्ययोर्म
ध्ये तत्राविरोधे तदप्यात्रो उपासनाविधिश्रवणे निर्गुणश्रुतिविरोधे च तत्त्वेप्यानंदादेवोपास्तवाः सत्यकामादपस्तुवाक्येतुत्वादिवत्तु
नेत्राव्याख्यावहारिकावेति युक्तं।एवं चानंदादयः स्वरूपभूता इति न निर्गुणश्रुतिविरोधः।तर्हि ब्रह्मशक्त्यादयोपि तथैव।ज्ञानात्मको भागवा
न्वलात्मको भगवानित्यादिश्रुतेः।सम सत्कल्याणगुणाकरत्वादिस्मृतेश्च।नसु निर्गुणोपासने भ्रमोपि मतिप्रमायां मतित्वभ्रमस्त
वकल्पसंवादि।उक्तं हि।स्वयं भ्रमोपि संवादी यथा सम्यक्फलप्रदः।ब्रह्मतत्त्वोपासनापि तथा मुक्तिफलप्रदेति।न चैवं ब्रह्मासिद्धिः।उपास
नस्य भ्रमत्वेपि शब्दजन्यस्य ज्ञानस्य प्रमात्वादिति चेत न।प्रकृतेपि तथात्वोपपत्तेः।मतिप्रमायां मतित्वस्येव ब्रह्मणो मिथ्यात्वाभावे न ध्यान
स्यापि सत्यब्रह्मविषयत्वा ज्ञानं च ब्रह्मविषयं शब्दाधीनजन्यस्य तदपरो त्वधीनजनकस्य च ब्रह्मध्यानस्याब्रह्मविषयता युक्ता।ब्रह्मज्ञानं न हेतु
नां प्रवर्गाणां नामपि तथात्वापातात्।उर्द्ध्वं तु विकल्पेतिमन्त्रे ईद्दता ध्यानयोरेककार्यकारणभूतयोः।अर्थश्रोत्रस्मिकं तत्त्वविषयत्वं तत्र

न्तेरिति भामत्यां परात्परं पुरिशयं पुरुषमीक्षत इतीक्षणाकर्मणः परब्रह्मणापरब्रह्मणः पुरुषं समभिध्यायीतेति चेति ध्यातव्यत्वोक्तातद्धितोधा
त्वान नु ऐकाग्र्यासाने परोक्षप्रमाप्रवाहरूपेन तद्वा चैव ध्येनु सुपासीते त्यादावित्तान विज्ञातीयं प्रत्ययान्तरं बुद्धिपूर्वकारो यो वे तिचेत।
सम्प्रकृतेर्विना नचैकादिकं ध्येयं ज्ञेयं तु सार्वज्ञ्यादिकं तद्ध्येयमेवेति पुरुषं। तत्र तत्त्वमस्यादेरि वेहाप्यविभुविरूपस्य वस्तुतत्त्वनिश्चय
यः सर्वज्ञः इत्यादेः सत्वे न विशेषहेतुत्वभावात् ब्रह्मणो जगत्कर्तृत्वादिनारोप्यो पास्यत्वेनापि ब्रह्म वाच्यानापि च ब्रह्मणः पविकारणात्वा
च्यानां समन्वयस्यावकृत्यत्वे न सम्पन्न बाधापानारभायाता ह्यु। य आत्मापहतपाप्मेत्यारभ्य सत्यकामः सत्यसंकल्पः सोन्वेष्टव्यः
स विजिज्ञासितव्य इति सत्यकामत्वादीनामपहतपाप्मत्वादिभिः सहानिज्ञास्यत्वश्रवणाच्च। अपहतपाप्मत्वादीनामपुपास्यत्वेत
स्यभूताकाशेपि संभवेन दहराकाशस्य ब्रह्मत्वप्रतिपादकदहराधिकरणाविरोधः एष सर्वेश्वर एष भूताधिपतिरित्यादिधर्मानुक्ता
तेषां तमेते वेदानुवचनेन ब्राह्मणा विविदिषन्तीति मुमुक्षुत्वेन त्वात्तेश्च यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवीत्याद्युक्तातद्धितानेनप
तिपश्यंतीति धीरा इत्यपरोक्षप्रमाविषयत्वोक्तेश्च तदीयं तत्सर्वज्ञत्वादि तदीयसार्वज्ञश्रवणाच्च। सत्यः सोऽस्य महिमेत्यादेः सामान्यतस्त
त्वश्रुतेश्च। अत्र होममात्रानुवादे नाहवनीयस्य वसुरिति श्रुत्यन्तरमहिममात्रानुवादेन सत्यत्वस्य विधानात। सत्यः सोऽस्येत्यादेरिदं
सत्रस्य त्वपितत्वायामिस्तु वीर्यं तद्ब्रह्म पूर्वचित्त ये इति ब्रह्मश्रुत्यादेरिदं सर्वमसृजत यदिदं किं च इत्यादिविश्वानि भुवनानि येभिरेहत्यादि सर्वप्रका
शकत्वादिलिङ्गेभ्यश्च ज्योतिरधिकरणन्यायेन सत्रस्य परमेश्वरपरत्वात। तादृशं श्रुतिव्यावहारिकसत्यपराचेत। ब्रह्मत्वसत्यश्रुतिरपि

प्रातिभासिकसत्वपरास्तु। न चात्र मानांतरप्राप्तिरस्ति। अत्र निर्गुणवाक्यं बाधकं वेत्। तत्राप्यसद्वेत्यादिवाक्यं बाधकं। तदप्यन्यत्वाद्यभिप्रायं
चेदिदमपि त्रैगुण्यराहित्याद्यभिप्रायं। यदि च ब्रह्मस्य प्रमाधिष्ठात्वात्सत्रैर्हि ततयवसविशेषं। न च निर्गुणस्यारोपरूपोपासनाविषयत्वेतत्परा
नानुकूल्ययोगः। धर्मिज्ञानाधीनमंदेहसापेक्षवेदांतविचारसाध्यप्रकारकज्ञानस्यैव मोचकत्वोक्तेः। उपासनांतरंगणाप्रिवश्रुतिवत्तं
देवविचित्रफलत्वोपपत्तेश्च सगुणोपासनायाश्चाप घगात्मा तमित्यादिश्रुतिषु योमामशेषदोषाग्र गुणं सर्वसहहितं ज्ञानात्मेत्सप्रसं
त्रोहेदयां मुक्तिं न चान्यथा। ओंकारायज्ञतपसां सर्वभूतमहेश्वरं। सूद्रदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छतीत्यादिस्मृतिषु च सविशेषु
ता नो देव मोक्षोक्तेः। तस्मात्तथोपासनाकर्तव्यतापरत्वे सगुणोपसनाविधिशेषार्थवादत्वे वा निर्गुणज्ञानान्मुक्तिश्रुतिरपि तथा स्या
त्। एतेन एष नित्यो महिमा ब्राह्मणस्य। सत्यं सो अस्य महिम्ने त्यादेरपि तथोपासनापरत्वादिकं निरस्तं। अपते च निर्गुणज्ञानस्यापि
फलांतरं। स यो ह वै तत्परमं ब्रह्म वेद नास्याब्रह्मवित्कुले भवति। एवं वेदाहं ब्रह्मास्मीति तिनस्य ह न देवाश्च नाभूत्या ईशत इत्यादे
श्रुतिबलात्त्रिगुणज्ञानस्य संयोगपृथक्त्वन्यायेन मुक्तिरपि फलं चेत सगुणज्ञानस्यापि तथास्तु। न च सगुणज्ञानान्नातश्रुता मुक्तिः स्यात
रा। पुराणपयपे विधयेति सर्वकर्मनिवस्तुक्तेः। अन्यथा निर्गुणज्ञानानातश्रुताप्यवांतरे वा। परममुक्तिस्तु सत्त्वे वेति श्रुतफलाभ्रन्यतापत्तिरिति त
त। यतेन सगुणवाक्यं निष्प्रपंचप्रकरणस्थं चेतन्निषेधायानुवादकं उपासनाप्रकरणस्थं चेदुपासनार्थमिति निरस्तं। गुणविशेषवि
धि सन्निहितस्य सामान्यनिषेधकस्य निष्प्रपंचवाक्यस्य विहितगुणनिषेधकत्वात्। आप्रभाकेन सगुणवाक्यस्यानुवादकत्वाच्च। अन्यथात्र

न्या०पा० सद्रू अग्रे नैव किंचनासीदिति सर्वनिषेधप्रकरणस्थं रसो वै स इत्यादिकमपि निषेधयानुवादकं स्यात्। उपासनाप्रकरणस्थत्वमात्रेण वो-
१२३ पास्यत्वे उद्गीथोपासनाप्रकरणस्थस्य स एषो नंतर इति श्रुतानंतत्वादेरपि भूताकाशे उपासनामात्रमिति स्तुवचत्वेनाकाशाद्यधिकरणेऽव-
नंतत्वादिलिंगैर्ब्रह्मत्वोक्त्ययोगाच्च। अनुपास्तिप्रकरणे विसत्यकामत्वादेः श्रवणाच्च। परिच्छेद्याद्यर्थभेदादिति सूत्रे तत्त्वप्राख्यो भ्रमीत्याप्र-
पासर्वे प्रविध्येत्यादिमंत्राणामुपासनाप्रकरणादुत्कर्षः तथानंतादिवाक्यस्यापि यदि वानंतादिवाक्यस्योपास्यत्वेवस्तु तत्त्वेचतात्पर्यं
सगुणवाक्यस्यापि तथास्तु। तस्मान्नासदुपासनार्थगुणोक्तिः। अन्यथा सार्वज्ञादिकं वाग्धेनुत्वादिवत्प्रातीतिकमेव स्यात्। किंच नह्यस-
दुपासनाविधायकानि चुवंते वेदाध्यात्तु न वैदिकाः। न च रमेत पहो असदुपासनया तमह नइत्यादिस्मृतिभिः। यचेतनासत्योपगम्यानुपास्यान्य-
फलत्वविपर्ययाप्यामिति संकर्षणसूत्रेणाचतन्निषेधात्। वाचं धेनुमित्यत्रापि धेनुमिवाप्यतीमिति श्रुत्यैतदुहेनुशब्दो गौणः। योषितमग्निं ध्या-
यीतेत्यत्रापि रेतोन्तर्हुतीति श्रुते योषितोरेतोरूपाहुत्याधारत्वादग्निशब्दो गौणः। छांदोग्यभाष्यरीत्या यौगिको वा न त्वारोपः। नाम ब्रह्मेत्यु-
पासीतेत्यत्रापि नामाभिमानिनीचोपात्तस्यां ब्रह्महरिं स्मरेदित्यादिस्मृतेर्ब्रह्माधिष्ठानेन नामादेर्गौणो ब्रह्मशब्दः। नामेति प्रथमा वा वर्तं-
वसतिमाहृतइत्यादिवत् सप्तम्यर्थे ब्रह्मेति प्रथमा वा ब्राह्मणोऽस्य मुखमितिवत् पंचम्यर्थे वा। सुपां सुलुगित्यादिसूत्रात्। अन्यथा श्रुते
ष्वेवमेव भगवइतोऽस्मि तरति शोकमात्मविदिति पृष्टवतो नारदं प्रत्यनात्मोपास्यक्तिरयुक्ता स्यात्। प्रतिमायामपि देवताधिष्ठानत्वबुद्धित एम
एव फलं न तु देवतात्वबुद्धितः। शिलादेवइति ज्ञानं मोमेरत्पधीरित्यादिना तन्निषेधात्। यथा चान्यदेवतद्धिदितादिति श्रुतावप्यौतन्नो १२३

नस्यकार्त्स्न्येन ज्ञानस्यवा निषेधत्वात् तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रुतावप्युक्तो तद्ध्यानस्य कार्त्स्न्येन ध्यानस्य वा निषेधः। अन्यथा तस्या
भिध्यानादिति श्रुतिविरोधात्। तस्यास्साधकाभावादित्याद्यो न युक्तः। नापि बाधकसद्भावादिति द्वितीयः। सामान्यतो मिथ्यात्वश्रुतिभंगे आवेऽऽर्ष
भंगे वोक्तन्यायेनाद्वैतश्रुत्यादीनामबाधकत्वात्। नापि निर्गुणवाक्यं बाधकं वैपरीत्यस्यापि सुवचत्वात्। नच निषेधत्वात्तस्य बलवत्त्वम्। असद्वे
त्यादिवाक्यस्य सदेवेत्यादिवाक्यात्प्राबल्यापत्तेरित्युक्तत्वात्। अपच्छेदन्यायस्य च निरासात्। नच निर्गुणत्वं पुरुषार्थः येन तद्बोधकं तत्परं स्यात्
किंतु गुणितैव। नच निर्गुणज्ञानस्य मोचकत्वात् फलवत्सन्निधाविति न्यायेन सगुणवाक्यं तदनुगुणं नेयमिति युक्तं। सगुणज्ञानस्यैवस्यपो
चकत्वोक्तेः। तस्मात्सगुणत्वनिर्गुणत्वयोर्विरोधेन समुच्चयायोगादनुष्ठानवच्च वस्तुनि विकल्पासंभवादेकेनान्यस्य प्रतीतार्थस्यागरूपे
बाधेवक्तव्ये निर्गुणवाक्यस्यैव सयुक्तः। न तु प्रबलस्य सगुणवाक्यस्यात् स्य प्राबल्यं च उपक्रमाधिकरणन्यायेनानुपसंजातविरोधित्वा
त्। लिंगात् श्रुतेरिति शीघ्रगामित्वाच्च। निर्गुणश्रुतिर्हि प्रतियोगिप्रतीत्यपेक्ष्य याविलंबते। यदेन्नु होतीति वद्विशेषविषयत्वाच्च। सार्वज्ञादि
श्रुतिर्हि विशिष्य सार्वज्ञादिपरा निर्गुणश्रुतिस्तु सामान्येन निषेधिका। दीन्नस्तीयायामग्नेर्ब्रूयादितिवन्निरवकाशत्वा। निर्गुणश्रुतिर्हि द्वैताप
शक्तिंस्वगुणैर्निगूढांदेवीह्येषागुणमयीत्यादिश्रुतिस्मृतिषु वृत्त्वादिगुणेषु सावकाशा। बृहत्त्वाद्धि। निर्गुणशब्देऽतरेऽस्मवेदैपि हि शब्दाः स्वस्वनिमि
त्तगुणापेक्षाः। धर्मिग्राहकत्वेनोपस्थित्यत्वाच्च प्रवृत्तिनिमित्ताय हेतेर्हि ब्रह्मादिशब्दैर्धर्मिणं निर्दिश्य तत्र धर्मा निषेध्याः। न चोद्दिश्य विशेषणत्वा
तग्रहैकत्ववन्निमित्तमविवक्षितं। ग्रहैकनयेनोद्देश्यस्वरूपेलब्धे विपदधिकं तस्यैवाविवक्षेति स्थितिः। अस्य चाग्रहत्वस्याप्यविवक्षां स्यात्। अ

न्या पा० तएवो क्तेहदिशत्रिनये मख्यामहेह विषाविशेषणमितिल्लक्षणेनापि हि शब्देनेतरव्यावृत्तम संकीर्णमव स्वरूपमुद्देश्यं। अन्यथापत्रक्षु चन
१२४ धर्मनिषेधः स्यात्। किंच निर्गुणवाक्यस्य छागपशुन्यायेन त्रैगुण्यपर्वसितत्वे विनाहि येगुणादिभिविशेषोपसंहारोक्तः। न चैवं न हि सर्वादिगुणस्यापि
ब्राह्मणो न हंतव्य इत्यत्रोपसंहारात्। अर्थहिंसां न निषेध्येतिवाच्यं। सार्वस्यादिगुणोपि विवक्ष्यहिंसावां विषयभावात्। एतेन त्रैगुण्यपर्वसितत्वे
त्यादेरेव काकेभ्यो दधि रक्षतामित्यादिवत् सामान्यपरतास्त्विति निरस्तं। अत्र सार्वस्यादिप्रतिभिन्नतिव तन्नमानोत्तरेण विरोधाभावात्। अपि
सुततदानुगुणपात्। किंच एवं धर्मजिप्रथककरति श्रुतौ सविशेषणो हीति न्यायेन गुणानां पार्थक्यस्यैव निषेधात्। तत्समाख्यानादत्रापि वि
शेषनिषेधो युक्तः। पार्थक्याभावेपि च विशेषवत्त्वादेवतानानंदादयोरीवेकतरपरिशेषाभावो युक्तः। अन्यथानंदस्यरणाभावान्मुक्तिर
पुमर्थः स्यात्। अपि च साक्षी चेता केवलो निर्गुण इति वाक्यात्सर्वत्रोक्तत्रचगुणत्वेऽनन्यथ्यस्य निर्गुणवाक्यस्य पांशुयाजन्यायेन तदनुगुणत्व
नेयं। किंच निर्गुणशब्देन गुणमात्रनिषेधो न युक्तः। सा सीवे ते त्वा द्विभि ईषत्वादि विधानेन व्याघातात् इति संकोचोक्तः। साक्षित्वादेरतात्विकत्वा
द्विरोध इति तु निरस्तं उक्तेपयुक्तेः। युक्तस्य परत्वार्थ आगमस्य प्रतीयते। स्यात्र च युक्तः एवार्थो नावाक्यान्त्रिरिष्यत इति। एवं च उपक्रमादिन्याय
नप्रतिलिंगतयान्यथा। विशेषसामान्यनयायान्यथाविरवकाशतः। वहूल्पन्यायतश्चोपजीव्यत्वन्यायतस्तथा। पशुछागनयाद्वैवसवि
शेषनयात्तथा उपांशुयाजन्यायेन पुरुषापुरुषनयात्तथा। आदृतत्वात्सूत्रकृता प्रवलत्वात्सगुणश्रुतिः। तस्माद्हिंसावाक्यमग्नीषोमीयेतरहिंसा राम
पारवनिर्गुणवाक्यं श्रौतसार्वस्यारीतरतर्काभासप्राप्तहेयदुःखादिगुणानां निषेधकमिति न तद्बाधकं। एवं चाहिंसा हिंसावाक्यसाम्यात् १२४

गुणनिर्गुणवाक्ययोः। अविरोधेऽप्यमानत्वं दूषणेनागतमेतदा तत्। नाप्यनुभूतिर्निर्विशेषा अनुभूतित्वादिति व्यतिरेकानुमानं बाधकं। अप्रसिद्धवि-
शेषणत्वख्यापनात् श्रुतिबाधाभाससाम्यात् अप्रयोजकत्वप्रतिकूलतर्कपराहत्यादिदोषात्। नाविशिष्टत्वेऽपि वस्तुत्वे च धर्मत्वानुपपत्तिः। एवमसं-
बद्धत्वे धर्मत्वायोगः। संबद्धत्वे संबंधस्यापि संबंधांतरमित्यनवस्थेति निखिलस्य धर्मवदित्यादि कुतर्का बाधकाः। धर्माभावरूपधर्मिणां भावाभावाभ्यां व्या-
घातात् अभेदे विवक्षितानां नेदः। योरेकतरपरिशेषाभाववद्विशेषवत्त्वादेव धर्मधर्मिभावोपपत्तेश्च संबंधस्यापि मिथ्यात्वादिवत्स्वनिर्वाहकत्वाच्च।
अन्यथानंदस्य तानमात्रत्वे दुःखत्ताननर्थानेदःस्यात्। अभिन्नत्वे अखंडार्थत्वहानिः। एवं ब्रह्मजगदभिन्नं चेन्मिथ्यास्यात् अभिन्नं चेन्मेदस्य सत्यत्व-
मित्यादितर्कबाधात् भेदाभेदे ब्रह्मापि न सिध्येत्। श्रुतिबाधात् तर्काणामाभासत्वं तिहापि समं। एवं च शुष्कतर्कैः श्रौतगुणबाधे ब्रह्मापि बाधितं भवे-
त् श्रुत्या शुष्कतर्कधिक्कारस्तु द्वयोः समः। किंच निर्विशेषत्वरूपविशेषभावाभावाभ्यामक्रोडमितिवत्स्वव्याघातः। यदि निर्विशेषत्वरूपविशे-
षोऽप्यनेनैव निषिध्यते तर्हीयमपि वचनक्रियामकरत्वनेनैव निषिध्यत इति समं। तदुक्तं। निर्विशेषत्वमेतेन मक्रोडमितिवद्भवेदिति किंच
ब्रह्मणः स्यात् निर्धर्मत्वे तत्त्वतो विशेषाभावेऽतत्त्वतस्तदेव स्यात्। भावे तु सविशेषत्वं। किंच ब्रह्मणो निर्विशेषत्वे वेदांतविचारविषयत्व-
मयुक्तं। तदुक्तं। इदमित्यविदितानां जिज्ञासाभावः प्रयोजनेऽदृत्यभावो हि धर्मस्यानवेत्रप्रतियोगितेति किंच ब्रह्मणो धर्मारोपार्थमेव केचिदूचुः
ःसमाप्तीकार्याः। इदंत्वादिनाज्ञात एव प्रश्नत्वादौ धर्मांतरारोपात्। तदुक्तं। धर्मारोपोऽपि सामान्यधर्मादीनां हि दर्शने। सर्वधर्मविहीनस्य धर्मा-
रोपः कुहस्पतइति। अभावरूपा धर्माः संतीति चेत् नाभावत्वं तत्र हेतुरतिप्रसंगात्। किंतु प्रामाणिकत्वं तद्भावेऽपि समं। यदि चाभावो ब्रह्म-

न्याया० मिथ्यः प्रदिवायं च सप्रकारो न तु सन्निति सदं दृष्टे तद्विरोधीति तर्हि भावो वितथास्तु। तस्मात्। अ्रूतेः सतो पि मोहादीन्द्रोषान्न विभ्रमोर्गुणान्स्ततः॥ नि
१२५ रु ते परमे तत्वे दृष्टे षास्वेवाप्तुरोजनः। तस्माद्ब्रह्म सगुणमेवेति॥ ॥ ब्रह्मणो निर्गुणत्वभंगः॥ ॥ किंच निर्विशेषे किं प्रमाणं। न च तत्स्वतः सि
द्धं निरस्तत्वात्। यद्यपि प्रतिपन्नं तत्सर्वमपि स्वतः सिद्धमिति स्वव चत्वात्॥ विप्रतिपन्नायोगाच्च। शास्त्रवैयर्थ्याच्च। न चाज्ञाननिवृत्त्यर्थं
शास्त्रं। अज्ञानाविरोधित्वात्। स्वतः सिद्धे घटादावपि स्वव चत्वात्। न च तत्र प्रत्यक्षं मानं। अपसिद्धान्तात्। नेन्द्रियालिनानुमानमित्यादिश्रोतथा
शास्त्रवैयर्थ्याच्च। अत एव नानुमानं। व्याप्यव्यापकतावच्छेदकविशिष्टत्वेन पक्षे धर्मतया वपक्षे संसृष्टत्वेन सिद्ध्याते न निर्विशेषासिद्धेश्च
। नापि पदरूपशब्दस्तत्र मानं। गुणक्रियाजातिरूपमिमित्ताभावेन मुख्यवृत्तेरयोगात्। अस्वीकाराच्च। वैदिकशब्दस्येत्यादिवत्संकेति
कत्वायोगाच्च। आरोपितनिमित्तविशिष्टविषयप्रतीतेश्च तिर्विशेषप्रामाण्यायोगात्। गौणयाप्यमुख्यार्थगुणयुक्ततयैव स्वार्थोपस्थाप
कत्वात्। लक्षणयाप्यशक्यार्थसंबंधितावच्छेदकरूपवत्त्वेनैव स्वार्थोपस्थापकत्वात्। पदस्यान्यप्रतियोगितावच्छेदकरूपेणैव स्वार्थोप
स्थापकतया निर्विशेषे वृत्तिमात्रायोगाच्च। अत एव नोपनिषद्वाक्यरूपः शब्दस्तत्र मानं। असंसर्गत्वात्। धर्मिज्ञानाधीनविचारजन्यं तिर्धारितै
कवाक्यवल्लिविनं सप्रकारकनिश्चयं प्रत्येव तस्य हेतुत्वाच्च। निष्प्रकारकज्ञाने नैतत्त्वाच्च। निर्विशेषविषयकज्ञानस्य निष्प्रकारकत्वेतेन नि
र्विशेषत्वासिद्धात्। तत्सिध्यर्थमेव विशेषाभावरूपविशेषविषयकत्वस्यावश्यकत्वात्। तस्मात्सगुणमेव ब्रह्मेति॥ ॥ निर्गुणे प्रमाणभंगः॥ ॥ राम
एतेन ब्रह्मणो निराकारत्वमपि निरस्तं। आदित्यवर्णं तमसः परस्तात्। पदापश्यः पश्यते रुक्मवर्णं कर्तारमीशं परं ब्रह्मपुरुषं हृत्समापिंगलं विश्वतश्च १२५

स्तुः। सहस्रशीर्षा पुरुषः सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं यदेकमव्यक्तमनंतरूपमित्यादिश्रुतिभिः। पश्य मे पार्थ रूपाणि शतशोऽथ सहस्र
शः। नानाविधानि दिव्यानि नानावर्णाकृतीनि च। सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखमित्यादिस्मृतिभिः। तदनुगृहीतैर्ब्रह्मसविग्रहे। स्वेष्टत्वा
त्पाल्लपितत्वाद्वेदोपदेष्टृत्वात्तदित्याद्यनुमानेभ्यश्च तत्सिद्धेः। विग्रहं विनापि नित्यज्ञानेच्छैव कर्तृत्वे ज्ञानेच्छाप्रयत्नानि नित्यप्रयत्नेनैव तत्स्यात्। किंच कु
लालादौ न शरीरं ज्ञानाद्युपलीनं किंतु ज्ञानादिकमेव शरीरव्यपदेशीनं। अत एव विरागत्वाच्चेति चेत्तदुक्तमिति सत्येश्वरस्य कर्तृत्वांगबु
द्धिमान्मनोवानेगप्रत्यंगवानित्यादिश्रुत्यासमकरणत्वमुक्तं। किंच तदेवानुप्राविशत् ब्रह्मविदाप्नोति परमित्यादिश्रुतिसिद्धसर्वगतस्य ब्रह्मण
ः प्रवेष्टृत्वं गम्यत्वमित्यादि न विग्रहविशेषं विनायुक्तं। न च श्रुतिरवांतरब्रह्मपरा वा रूपोपासनापरा वा आरोपितरूपपरा वेति युक्तं। आदित्यवर्णं
पित्यत्रप्रकृत्या तमसः परत्वोक्तेः। य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यत्र च वर्तमानत्वेनापरोक्षज्ञानविषयत्वोक्तेश्च। नहि योगिप्रत्यक्षत्वेन दृश्य
ते इत्युच्यते। सहस्रशीर्षेत्यत्र तमेवं विद्वानमृत इह भवतीति पदाय स्पष्टत्वाच्च तदा विद्वान् पुण्यपापे विधूयेति न संदृशे तिष्ठति रूपमस्येत्यत्र च
य एनं विदुरमृतास्ते भवंतीतीति ज्ञानस्य मोक्षकत्वोक्तेश्च दिव्याप्रपस्य स्वरूपस्य निःसंदर्शनं कांक्षितारस्तु ज्ञातुं रूपस्य ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परं
तपेति स्मृतेश्च युक्तं गम्यत्वाद्युक्तेश्च। अत एव इदं रूपं न भौतिकं प्राकृतमनित्यं वा। नाभ्या आसीदंतरिक्षमित्यादौ भूतकारणत्वस्य तमसः परस्तादि
ति श्रुतौ तमसः परत्वस्य सर्वतः पाणिपादं तदिति स्मृतौ च न सत्तन्नासदुच्यत इति पूर्वं त्वाभौतिकत्वस्य तमसः परत्वस्य च तत्र इति पदत्रयात् प्राकृतत्वस्य वो
क्तेः। एको ह नारायण आसीन्न ब्रह्मा न च शंकर इत्यादिश्रुतिषु महाप्रलयेऽपि स्थित्युक्तेश्च। प्रलये विग्रहरहितचेतनमात्रसत्त्वस्य सर्वसाधारणत्वात्।

न्याया०
१२६

विग्रहानित्यत्वे नित्यो नित्यानां चेतनश्चेतनानामिति विशेषोनुपयोगश्च । पुराकल्पापाये स्वकृतमुदरीकृत्य विकृतमित्यादौ साक्षान्महाप्रलयेस्थि-
त्युक्तेश्च परस्येत्यादौ रूपमदभ्रचक्षुषः सहस्रपादोरुभुजाननाद्भुतेरित्यादौ भूयतन्नानावताराणां निधानं बीजमव्ययमित्यत्र सर्वे नित्याः शाश्व-
ताश्च देहास्तस्य महात्मनः । परमानंदसंदोहा ज्ञानमात्राश्च सर्वश इत्यादौ च सत्यासत्यत्वाद्युक्तेश्च । अत एव न तद्देहो नापि ततो भिन्नं आनंदरू-
पममृतं यद्विभाति आश्रयणात्सर्व एवानंदः मोदो दक्षिणः पदात्मको भगवांस्तदास्ति कान्यक्तिः । किमात्मको भगवान् ज्ञानात्मकः ऐश्वर्यात्म-
क इत्यादिश्रुतेः । भेदाभावेप्यहिकुंडलाधिकरणन्यायेन विशेषबलाद्विग्रहवत्त्वोपपत्तेश्च । आत्मनि चैवं विचित्राश्च हीति सूत्रे विचित्रशक्तिः
पुरुषः पुराणमित्यादिश्रुतिभिर्विचित्रशक्तेरुक्तत्वेन आनंदस्य नित्यत्ववदपराधीनत्ववच्च विग्रहत्वस्यापि संभवाच्च । नैषा तर्केण मतिरापनेय
त्यादिश्रुतिभिस्तर्कागम्यत्वोक्तेश्च । पिशाचादिवदेतर्धानशक्त्या अनुपलंभसंभवाच्च । न चापाणिपाद इत्यादिविरोधः । अदुःखमसुखसमं न
प्रज्ञानघन इति सुखज्ञाननिषेधकवाक्यवत्प्राकृतावयवादिनिषेधपरत्वात् । तान्यष्टोक्तश्रुतिस्मृतिभिः पश्यति श्रृणोतीत्यादिवाक्यशेषेण
च विरोधात् । अरूपोऽप्रकृतत्वाद्वेत्यादिस्मृत्यैवारूपश्रुतिगत्युक्तेश्च । विग्रहवत्त्वे न दुःखवैचितस्वपूर्त्वादिनापि तत्स्यात् । स्वतंत्रत्वादिना समाधि-
रधिसमः । अप्राकृतानंदमयविग्रहस्य दुःखाभावादिनैव व्याप्तेश्च । सर्वैरपीश्वरैर्लीलाविग्रहाभोगीकार्यराद्या । न च भगवद्विग्रहस्य महत्त्वविशि- राम०
ष्टरूपवत्त्वसावयवत्वादिनानित्यत्वे शंक्यं । उक्तश्रुत्यादिविरोधात् । प्राकृतत्वस्योपाधित्वाच्च । निरवयवविशेषस्येव ज्ञानानंदादिविशेषस्ये- १२६
वच सावयवविशेषस्यापि श्रुत्यादिबलान्नित्यत्वोपपत्तेश्च । किंचावयवशब्देनोपादानोक्तावसिद्धिः । पक्षदेशोक्तो गगनात्मादौ व्यभिचारः । नवा

पादानाविरिक्तपक्वदेशयवनास्ति। पटादावुपादाने तत्तन्यस्य हस्तवितस्त्यादिपरिमाणस्यैकदेशस्यानुभवात्। विस्तृतं चैतदन्यत्र नित्यगगं
नादेरपि संयोगित्वेनैकदेशसाधनाच्च। अन्यथाकाशे यत्किंसंयोगतदत्यंताभावयोः आलोकतमसोरणुसंयोगतदत्यंताभावयो आ
त्मनि च सुखदुःखयोः देशभेदेन प्रतीतिर्न स्यात्। एतेनैकदेशाभावेऽपि संयोगादेः स्वात्यंताभावसामानाधिकरण्यात् तत्तथाधीरिति निरस्तं। यत्र
देशे संयोगस्तत्रैव तदभावप्रतीत्यापत्तेः। गौरव्यंतवतीत्यादि प्रत्याप्रमादिनित्यायां अपि प्रकृतेः सत्वरजस्तमोरूपैकदेशदर्शनाच्चात्व
न्मतेप्यनाद्यविधकार्योपादानत्वापत्त्र नणुत्वेसति परिच्छिन्नत्वापत्तेर्गुणत्वापत्तेर्जीवन्मुक्तौ लेशं तु वृत्त्यं चैकदेशस्यैव कृत्यत्वाच्च ज्ञा
वानामपि द्रोणबृहस्पतेर्भार्गेंद्रोर्लिंरूद्रोशसंभवं। हरूवीसाः शेकरस्य शद्बत्यादिनो शोक्तेश्चायस्याद्गुतांशांशोपि विश्वशक्तिरवस्थिता। प
रब्रह्मस्वरूपस्य प्रमाणामितमव्ययं। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यादावीश्वरस्यापि अंशेनैव न चायमौपाधिकोंशः। नवे
दुयाधीति न्यायेन स्वभाविकांशाभावेन तत्संयोगात्। एतेन सावयवत्वादिना भगवल्लोकादेरनित्यत्वसाधनमप्यपास्तं। अतो हि वैष्णवालोका
नित्यास्ते चेतनात्मकाः। मत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतमित्याद्यागमविरोधात्। तस्मात्सगुणसाकारं च ब्रह्मेति॥ ॥ब्रह्मणोनि
राकारत्वभंगः॥ ॥यच्चेदमुच्यते। ब्रह्मज्ञानानंदात्मकमद्वितीयं नित्यं साक्षिरूपं च न तु ज्ञानादिगुणकमिति। तत्र परमते ज्ञानत्वं किं ज्ञा
तिविशेषः साक्षाद्व्यवहारजनकत्वं वा। जडविरोधित्वं वा। जडव्यावर्तत्वं वा। अज्ञानविरोधित्वं वा। अर्थप्रकाशात्मकत्वं वा। परोक्षत्वं वा। नेद्य
॥हरि[illegible]प्रतिबिंबितज्ञानावभासेपुतत्संभवेप्यखंडस्वरूपज्ञानेतदयोगात्। नद्वितीयः। फलोपधानस्य सुषुप्त्यादावभावात्। शब्दादिरूप

न्यापा० स्वरूपयोग्यतायाः अपि सुक्तावभावात्। न तृतीयः। स्वरूपज्ञानस्य नित्यत्वेन तद्विरुद्धस्य जडस्य नित्यनिवृत्त्यापातात्। न चतुर्थः। सत्यं ज्ञानमि
१२७ त्यत्र जडव्यावृत्तेरार्थिकत्वोक्त्यायोगात्। किंच जडत्वस्याज्ञानत्वादिरूपत्वे असंभवः। अज्ञानत्वरूपत्वे त्वन्योन्याश्रयः। न पंचमः। अज्ञान
स्य नित्यनिवृत्त्यापातात्। द्वितीयादिषु ज्ञानत्वस्य कारणत्वादिवत् व्यवहारार्थन्यूनतमोपाधिकत्वेन ब्रह्मणो ज्ञानस्वभावत्वायोगात्। न ष
ष्ठः। मोक्षे ऽन्यार्थोल्लेखाभावात्। स्वरूपोल्लेखे च स्वविषयत्वापातात्। न सप्तमः। परांगीकृतायाज्ञाते व्यवहारहेतुत्वादेर्वीत्वमते संभवा
त्। एवं च। अर्थप्रकाशरूपत्वं ज्ञानत्वं ब्रह्मणः कथं। अन्यार्थाभावतो मोक्षे स्वेन स्वस्याप्यवेदनात्। किं च वेदमानंदत्वं। जातिविशेषो वा।
अनुकूलतयावेदनीयत्वं वा। अनुकूलवेदनरूपत्वं वा। अनुकूलत्वमात्रं वा। विज्ञानात्मकत्वमेव वा। दुःखविरोधिस्वरूपत्वं वा।
दुःखाभावोपलक्षितस्वरूपत्वं वा। परांगीकृतं वा। नाद्यः। अखंडस्वरूपानंदे तदयोगात्। न द्वितीयः। मोक्षे वेदितुरभावात्। आत्म
नोऽवेद्यत्वाच्च। किंचानुकूल्यं किं वित्तापेक्षेन वान्यप्रतितिघकत्वमिति स्वप्रत्येववक्तव्यत्वेन सविशेषत्वापातः। अत एव न तृतीयः। अ
पि च। वेदनस्वभावादधिकस्यानुकूल्यस्य स्वाभाविकत्वे सखंडत्वापातः। औपाधिकत्वे कदाचिदानंदनिवृत्त्यापाता। न चतुर्थः। उक्तरीत्या
नुकूल्यासंभवात्। एतेन निरुपाधिकेष्टत्वमानंदत्वमिति निरस्तं। न पंचमः। दुःखादिज्ञानस्याप्यानंदत्वापातात्। विषयानुल्लेखि
ज्ञानं तच्चेति चेत्। न। अविरोधात्। विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेनैव दुःखव्यावृत्तिसिद्धावानंदपदवैयर्थ्याच्च। न षष्ठः। विरोध राम
स्यनिवर्त्तकत्वादिरूपत्वे दुःखस्य नित्यनिवृत्त्यापत्तेः। तादात्म्यायोग्यत्वरूपत्वे घटादेरप्यानंदत्वापातात्। विज्ञानमानंदं ब्रह्मेत्यादौ दुःख १२७

व्याप्तेरार्थिकत्वोऽन्यायोगाद्वा न सम्भ्रमः। वैशेषिकमोक्षवद्दुःखस्य दुःखस्याभावे सत्यप्यानंदाभावेनापुमर्थत्वस्यान्योन्ये व्याघातात्। ना
श्रमः। परांगीकृतस्य निरुपाध्यनुकूलतया वेदनीयत्वादेः त्वन्मते संभवात्। यदि चानंदत्वादेर्दुर्निरूपत्वेऽपि तदधिकरणं ब्रह्माबाध्यं
आनंदात्मकं च तर्हि सत्यत्वादेर्दुर्निरूपत्वेऽपि तदधिकरणं जगदपि अबाध्यं सदात्मकं च स्यात्। एवं चानिरुपाध्यनुकूलत्ववेदनीय
सुखं मते। निर्विशेषमवेद्यं च कथं ब्रह्म सुखात्मकं। किं च वेद्यमद्वितीयत्वं द्वितीयाभावविशिष्टत्वं वा तदुपलक्षितत्वं वा। नाद्यः। द्वितीयाभा
वस्य प्रामाणिकत्वे तेनैवाप्रामाणिकत्वे द्वितीयेनैव सद्वितीयत्वापातात्। न चाभावस्याप्रामाणिकत्वेऽपि प्राभाकरमत इवाधिकरण
मात्रत्वाददोषः। अनुपलब्धिगम्याभावस्यादित्वन्मतेऽभंगात्। अन्यत्राप्यात्रेरपि ब्रह्ममात्रत्वे भेदसत्त्वापातात् च। प्राभाकरमतेऽपि प्रति
योगिमदधिकरणव्यावृत्त्यर्थं केवलत्वादिविशेषितस्याभावत्वाच्च। न चैतन्मतेऽप्यनुपपत्तिरेव। अन्यथा गुणागुणभेदमते शौक्ल्यादिरि
व शशशृंगादिभावधर्माणामपि ब्रह्ममात्रत्वं स्यात्। न च भावरूपद्वितीयाभावविशिष्टत्वमद्वितीयत्वं तथा चाभावस्य द्वितीयस्य प्रामाणिक
त्वेऽप्यदोष इति वाच्यं। द्वैतस्याप्यभावस्यैवं रूपत्वादिति द्वैतस्य धर्मो धर्मादिरूपभावस्यापि मिथ्यात्वायोगादित्युक्तत्वात्। अत एव नान्त्यः। उ
पलक्षणस्याप्यभावस्याप्रामाणिकत्वे तत्प्रतियोगिनो द्वितीयस्य प्रामाणिकत्वावश्यंभावात्। किं चात्यन्ताभावस्य प्रागभावादित्वे द्वितीयस्या
नित्यत्वमात्रस्यानुमिथ्यात्वं। अत्यन्ताभावत्वेऽपलक्षणत्वमयावत्तद्रूप्यभावित्वेन चेदत्यन्ताभावत्वहानिः। वेदान्ततात्पर्यविषयत्वा
दिरूपेणानन्यपित्वेन चेदत्यन्ताभावासिद्धिः। किं चाप्रामाणिके न द्वितीयाभावेनैव द्वितीयेनाप्युपलक्षितत्वसंभवात्। तेन सद्वितीयं

न्याया० किंतस्मात्। एवं चाद्वैतीभावस्यात्विकत्वेनेन स्यात्सद्वितीयता। अतात्विकत्वे तद्वैतेन सद्वितीयत्वमापतेत् किंचेदं नित्यत्वं यद्ब्रह्मण एवाभिमतं सर्व
१२८ कालसंबंधित्वं वा। कालावच्छेदराहित्यं वा। ध्वंसाप्रतियोगित्वं वा। उभयावच्छिन्नराहित्यं वा। नाद्यः। अविद्यायां कालेवातिव्याप्तेः। सापि सर्वकालीयादा
नत्वात् तत्संबंधिनी। इदानीमेव नान्यदेत्येवंरूपतदवच्छेदराहित्ता वा। न तृतीयः। ध्वंसेतिव्याप्तेः। ननु ध्वंसोपि ध्वंसप्रतियोग्यनुमन्तं नेतु प्रा
गभावनिवृत्तिरूपस्य घटस्य निवृत्तावपि प्रागभावानुन्मज्जनवत् तदुन्मज्जनमितिचेत् न। एवं सति मोक्षस्यानित्यस्य कस्यचित् ध्वंसस्य वक्तं
व्यतयात्मायवार्थं आद्यध्वंसनित्यतापायवदुक्तत्वात्। न च ध्वंसस्यानित्यत्वेपि भावेषु ब्रह्मैव नित्यमित्यस्याहानिरिति वाच्यं। निष्प्रतियो
गिकत्वे नभावस्य ध्वंसत्वादेर्नित्यत्वादेर्नित्यत्वावच्छेदाभावात्। न चतुर्थः। एवं परिभाषायामपि ब्रह्मण एव नित्यत्वमित्येतस्यालस्य सुज्ञा
नस्याभावस्यासिद्धेः। एवं चाकाले कालापरिच्छिन्ने ध्वंसे चाध्वंसयोगिनि नित्ये सति कथं नित्यं ब्रह्मैवेति मतं तव। कथं च द्रष्टृरूपस्यात्मनः सा
क्षात् द्रष्टृत्वरूपं साक्षित्वं। साक्षाद्द्रष्टरि संज्ञायामिति हि सूत्रं। चक्षुरुपाधिकस्यापि द्रष्टृत्वस्य तु अस्यासंभवात्। बुद्धेः साक्ष्यधीनसिद्धि
कप्रातीतिकाविद्याकार्यत्वेन चक्षुकात्रयाच्च। किंच साक्षी किं जीवकोटिर्ब्रह्मकोटिर्वा। उभयथा नुगतेति न्मात्रं वा नाद्यः। जीवो तु भयया
धिकोणुरितिपक्षेरदमंशावच्छिन्नचिद्वैयस्य शुक्तिरूप्यादेः साक्षिवेद्यत्वायोगात्। चैत्रकावुा अज्ञानोपाधिकः सर्वगत इति पक्षेपि
अज्ञानस्य साक्ष्यधीनसिद्धिकत्वेनान्योन्याश्रयात्। न द्वितीयः। तेन ब्रह्मण एव तु साक्षिवेद्यस्य खेदुःखादिधीः ननु जीवस्येति वैपरीत्यापा राम
तात्। अन्यथा नवच्छिन्नानंदधीरपि जीवस्य स्यात्। न च ब्रह्मचैतन्यं घटादिप्रकाशकमिति मते अज्ञानाभिभवद्वारा तस्य जीवचैतन्या १२८

पेदाभिव्यंजिकांतःकरणवृत्तिरविहतादृशीहन्निरस्ति।नततीयः।ईश्वरेणोवचिन्मात्रेणाविसंसारिदुःखस्यतद्गतत्वेनग्रहणेपियद्वावोयुक्ति
ः।तस्यचिन्मात्रस्यदुःखाद्यस्लेशरूपोपप्लवायातात।सुप्रमैत्रंप्रतिमैत्रीयाज्ञानादेःमैत्रीयतयेवजाग्रद्वैत्रीयदुःखादेरपिचैत्रीयतयासु
षुप्तमैत्रंप्रतिप्रतीतिप्रसंगेनमैत्रस्यैतावंतंकालंदुःखंनावेदिषमितिपरामर्शायोगाद्।नापिसाक्षात्कर्त्र्याकाराविद्यावृत्तिप्रतिफलि
तेचैतन्येसाक्षीसुषुप्तौचाज्ञानाद्याकाराविद्यावृत्तिरस्त्येविवाच्यं।दुःखादेःस्वानंतरभाव्यविद्यावृत्तिप्रतिफलितचिद्वेद्यत्वेज्ञातैकसत्वा
योगात्।तत्र अविद्यावृत्तेरपिसाक्ष्यधीनसिद्धिकत्वेनान्योन्याश्रयापाद्।विस्तृतंचैतदस्मतांसाधकत्वभंगे॥ ॥परमतेब्रह्मणोज्ञानत्वानंदत्वाद्वि
तीयत्वनित्यत्वसाक्षित्वभंगः।यद्वेदमुच्यते।ब्रह्मणजगतउपादानत्वेसतिकर्त्तृत्वमभिन्ननिमित्तोपादानंजगदितितत्र।यतविकारवत्का
रणत्वमुपादानत्वमुच्यते।निर्विकारतयावेदसिद्धब्रह्मणितत्कथं।परिणामापरपर्यायविकारवत्वंउपादानत्वंतच्चब्रह्मणिनिर्विका
रेश्रुतःसुदृढत्वादिश्रुतिविरुद्धं।ननुविवर्त्तोरज्वासर्पवद्यवत्मायाविशिष्टंब्रह्मजगत्कारणमितिवामायाशक्तिमत्ब्रह्मकारण
मितिवाजगदुपादानमायाप्रपतयाब्रह्मकारणमितिवेतिमतत्रयमुक्तं।तत्राद्येरज्वांसर्पइवमायाब्रह्मणिउपादानेनिर्विकारश्रु
तिस्तुकेवलब्रह्मपरेतिविवक्षितं।द्वितीयेमायोपरागात्ब्रह्मविकारिनिर्विकारश्रुतिस्तुतदनुपरक्ताभिप्रायेतिविवक्षिते।तृतीयेतद्द्वारंपु
ःपरस्येवमायाद्वाराब्रह्मोपादानेश्रुतिस्तुअद्वारकविकारनिषेधिकेतिविवक्षितमितिचेन्न।आद्येमायावत्तेतद्वद्ब्रह्मापिविकारीतिविशिष्टब्र
ह्मणोनिर्विकारत्वोक्त्ययोगात्।किंचपारमार्थिकसत्वज्ञानानंदस्वभावस्यब्रह्मणोप्युपादानत्वेकार्यमपितथास्यात्।अविद्योपादानत्वेपिसिता

न्या॰वा॰
१२९ सितस्यत्वकार्येप्रपंचेसितत्ववज्जगतिपरमार्थसत्वादेरपिदुर्वारत्वात्।तानस्य उपादानस्वभावस्योपादेयेपिधीमात्रे।अविद्यास्वभावस्यानिर्वाच्यत्वस्या
पिप्रपंचेधीमात्रत्वापातात्।तन्मात्रोपादानकत्वेसत्वेतत्रैचेत्।अनिर्वाच्यत्वमपिनस्यात्।तन्मात्रोपादानकत्वाभावात्।द्वितीयेमाया
ख्यहेतूपरागमावाभावात्।मायांविकारभावाभावविवक्षाचेन्मृदादिसाधारण्यं।मायाविशिष्टंब्रह्मविकारिनिर्विकारश्रुतिस्तुविशेष्याभि
प्रायेतिविवक्षायांतुविशिष्टस्यब्रह्मत्वेनिर्विकारश्रुतिविरोधः।अब्रह्मत्वेननोहानिः।एतेनप्रकृतिविशिष्टंब्रह्मोपादानमितिनिरस्तं।
विस्तृतंचैतदन्यत्र।किंच।विशिष्टस्यमृदादिवद्भूमिसमसत्ताकरूपांतरापत्तिरूपपरिणामाद्विवर्त्तमतहानिःस्यात्।विशिष्टस्यपरिणामः
शुद्धस्यतुविवर्त्तइतिचेत्।तर्हिशुद्धेपिविवर्त्तार्थंआरोपितविकारस्यावश्यकत्वान्निर्विकारश्रुतेस्तत्परत्वंनस्यात्।श्रुतिर्विशेष्यस्यैव
तात्विकविकाराभावपराचेत्विशिष्टेविकारोक्तिरयुक्तास्यात्।तत्वतोनिर्विकारेआरोपितविकाराविरोधात्।ततोयोग्यमुक्तं।अशे
स्तंतुप्रतीवब्रह्मणःअनादिमायांप्रत्युपादानत्वाभावात्।भ्रमाधिष्ठानत्वमुपादानत्वमितिचेन्न।उपादानेमृदादौभ्रमाधिष्ठानत्वस्या
धिष्ठानेवस्तुन्यपादावुपादानत्वस्यव्यवहारात्।पारिभाषिकोपादानत्वस्यचानुपादानत्वेपर्यवसानात्।एतेनासत्यरूपांतरापत्तिर्वि
वर्त्तःसत्यरूपांतरापत्तिस्तुपरिणामः।रूपांतरापत्तिमात्रमुपादानत्वं।तच्चब्रह्मणोविवर्त्तरूपविशेषेणोपपन्नं।निर्विकारश्रुतिस्तात्
त्विकविकाराभावाभिप्राया।ब्रह्मचाज्ञातंप्रपंचरूपेणविवर्त्ततेरस्यज्ञानमपिपरिणामितयोपादानांतर्गतं।रूप्यमपिशुक्तिविवर्त्तत्वाद्रत्नान राम
परिणामत्वाद्वोभयोपादानकमितिनिरस्तं।तथापिमिथ्याभूतस्यमिथ्याभूतमेवोपादानमन्वेषणीयं।सत्यत्वेकार्यस्याविकारणस्वभावतया १२९

सत्यत्वप्रसंगइतिवदता सत्यस्यासत्यरूपापत्तेर्निषेधात् । सत्यारोपितधूमानुगतधूमत्वसामान्यस्येव सत्यासत्यरूपांतरापत्त्यनुगतोपादा
नत्वसामान्यस्याप्यभावाच्च । शुक्तिब्रह्मणोरेवरूप्याकाशाद्युपादानत्वसंभवेऽपि विद्यान्वयव्यतिरेकयोर्निमित्तत्वेनाप्युपपत्तेरविद्योपाद
नकत्वकल्पनायोगाच्च । स्वपरिणामित्वेनाविद्याकल्पनेऽपि सत्यस्वरूपादेः सत्यरूपापत्तिमत्परिणाम्यपेक्षाभावात् । विकारित्वेनावि
द्याकल्पनेतु तत्त्वतो निर्विकारे ब्रह्मणि अतात्त्विकविकारांगीकारात्तत्परेणोवनिरस्तत्वात् । नचकार्यापेक्षितसमसमानसत्ताकोपादानत्वेना
विद्याकल्पनं । अविद्यायाः पत्तिमंगेनिरस्तत्वात् । किंच अरूप्येपि रूप्यमिदमितिप्रतीतेः । तेरविद्याविकारभूतेरूप्यमिदेरूप्यतादात्म्यवा
णात् । इदमो रूप्यरूपापत्तिरूपो विकारस्तत्कथं । नहीदं रूप्यरूपमापन्नमिति धीरस्ति । नचारोपितमप्यारोपं विना पुंस्त्व । एतेनरूपांतरा
पत्तिप्रतीतिविषयत्वमुपादानत्वं प्रतीतेः प्रमात्वाप्रमात्वाभ्यां परिणामविवर्ताविति निरस्तं । शुक्तिर्वा ब्रह्म वा रूप्यत्वेन वा आकाशत्वेन वा अ
पन्नमित्यप्रतीतेः । सद्यस्य च्चाभवदित्यादिश्रुतेस्त्वात्माश्रयप्रसंगेन स्वजन्यरूपांतरापत्तिधीविषयत्वप्रत्यापकत्वायोगात् । एतेनरूपांत
राभेदधीविषयत्वं वा कार्याभेदधीविषयत्वं वोपादानत्वं प्रतीतेः प्रमात्वाप्रमात्वाभ्यां परिणामविवर्ताविति निरस्तं । आधेयत्वे पदार्थयोः क्षी
रनीरयोः खंडगोत्वयोश्चोपादानोपादेयत्वापातात् न हि तीये सदृशे सन्निहिते निमित्तेपि कार्याभेदभ्रमसंभवेनातिव्याप्तेः । तस्मादकारणस्या
तीतादेरस्येतास्तत्त्वभ्रमाधिष्ठानत्वदर्शनात् शुक्त्याधिष्ठाने च शुक्त्यारोपकारणत्वोपादानत्वयोर्व्यवहारात्रपरपद्ये भ्रमाधिष्ठानस्य ब्रह्मणस्तदु
पादानत्वकारणत्वोनतुमायोपादानतेरीश्वरोनिमित्तं शुद्धं ब्रह्माधिष्ठानमितिचेत्न । अपि च निमित्तोपादानत्वाभावेन तत्त्वम्मते तदंशस्य प्रकृ

न्या॰या॰ त्वविकरणादेरनुपपत्तेः॥ ॥ब्रह्मण उपादानत्वभंगः॥ ॥किंचेदं कर्तृत्वं किं परिभाषया मृत्तादिवदधिष्ठानत्वमात्रं भ्रांतवदध्यासद्रष्टृत्वं
१३० वा। मायाविवक्षामोहकत्वं वा। कुलालादिवदुपादानगोचरप्रयत्नादिमत्वं वा। नाद्यः। त्वन्मते अधिष्ठानत्वातिरिक्तोपादनत्वाभावेन कर्तृ
त्वोपादानत्वयोः सामानाधिकरण्यासंयोगात्। तदैक्षत नामरूपे व्याकरोदित्यादिश्रुत्यनुपपत्तेश्च। नहि चेतनोऽचेतनो वा स्वस्मिन्नारोपितं सं
कल्प्य करोति। अत एव न द्वितीयः। भ्रांतस्य प्रेक्षापूर्वकं आरोपितकर्तृत्वाभावात्। ब्रह्मणो भ्रांतत्वेन कर्तृत्वस्य जीवस्य भ्रांतत्वे न जगत्क
र्तृत्वस्य वा यातायातानैवेत्यापत्तिः। श्रुत्यादिविरोधात्। जगतः ईश्वरं मुक्तासंसारित्वादित्यादि संभावयितुमपि न शक्यमित्यादित्वस्याध्य
विरोधाद्वनेनुपुढस्य भ्रांतत्वे विमायासवलितं कर्तृत्वमीश्वरो भ्रांत इति चेत्। ईश्वरस्य भ्रांतत्वे जीववत्संसाराद्यापातेन च श्रुत्यादिविरोधात्।
किंच। पक्षद्वयेपि वैषम्यनैर्घृण्ये न सापेक्षत्वादित्यादिसूत्रेषु कर्मसापेक्षत्वेन वैषम्यादिपरिहारोऽनुपयुक्तः स्यात्। अधिष्ठानत्वेन त
दप्रसक्तेः। न तृतीयः। व्यामोहनीयजीवादर्शने व्यामोहकत्वायोगात्। दर्शने च भ्रांतत्वापत्तेः। व्यामोहकत्वस्याप्यारोपितत्वे तान्यान्याश्रया
त्। नामरूपे व्याकरवाणीत्यादिश्रुत्यनुपपत्तेश्च। नहि मायावी गजादिकं करवाणीति संकल्पयति किंतु दर्शयानीति संकल्पदर्शयति किं
च। पक्षत्रयेपि जन्मादिसूत्रेऽर्थत्वं च सार्वज्ञ्यादिस्फोरणार्थं शास्त्रयोनित्वमिति परमते तत्प्रसंगः स्यात्। अमायाधिष्ठानत्वादिना सार्वस्याला
भात्। न चतुर्थः। कल्पितत्वे तस्यायोगात्। नहि घटादिकं कुलालत्वेनेव कल्पिते रूप्यादि भ्रांतेनवाप्येन क्रियते। विस्तृतं चैतत्पुरस्तात्। राम
तस्मात्। अधिष्ठिततया भ्रांते भ्रामके च न कर्तृता लौकिकी रतिमन्त्रानुनरष्टारोपिते प्रति॥ ॥परमते ब्रह्मणो निमित्तत्वभंगः॥ ॥वि १३

वोपादानत्वेन तावदात्मन आकाशः संभूतः। यतो वेत्यादि पंचमीश्रुतिर्मानं तस्या अनेकार्थत्वात्। अपादानार्थत्वेपि ध्रुवमपायेपादानमित्य
नेनापादानसंज्ञासंभवाच्च। जनिकर्तुरित्यनेनापादानसंज्ञायामपि वृत्रोपुत्रात्प्रमोदो जायते इत्यस्माप्युदाहृतत्वात्। न्यासेपि प्रकृतिपदं हेतुमत्त्व
परमित्याश्रित्यासति प्रकृतिग्रहणे उपादानस्यैवस्मात् प्रत्यासत्तेर्नेतरस्य प्रकृतिग्रहणात् सर्वस्य कारणस्य भवतीति प्रकृतिपदं पुत्रात्प्रमोदो जाय
त इत्यादावनुपादानेप्युपादानसंज्ञार्थमित्युक्तत्वात्। शृंगाच्छरो जायते लोमविलोमभ्यो दूर्वा जायंत इत्यादावपि शरांकुरं प्रति उपादानभूतो पं
शृंगैकदेशः तत्संसृष्टं शृंगैकदेशांतरं शरांकुरनिमित्तमस्ति मांसांकुरोपादानभूतो पस्कवांतरवस्थितो मासभागस्तत्संसृष्टो मांसांकुरनिमित्त
मतस्तद्वभागे एव अपरिणतशृंगभागस्यानुभवात् तदेव शृंगादिति पंचम्यंते नोच्यते। अतएव महाभाष्ये अपमवियोगः शक्योऽवक्तुं।
गोलोमविलोमभ्यो दूर्वा जायंते अपक्रामंतिताभ्य इत्यादिना लोमादीनां दूर्वादीन प्रत्यवस्थित्वात् ध्रुवमपायेपादानमित्यनेनैवापाद
नसंज्ञासिद्धेरिदं सूत्रं प्रत्याख्यातं। केष्यदेविषयावित्तात दीर्घभोगोमोगीनिद्धुमत्रप्यविछेदात तत्रोपलभ्यते तथा दूर्वा अपीत्यादिना
पवित्वमेवोपपादितं। तदुक्तं। शृंगाच्छरो विलोमभ्यो दूर्वा गोमयतस्तथा वृश्चिकश्चैव माध्येष्वप्यपादानत्वमिष्यत इति। अतएवाकाशा
द्युपरित्याक्ष्युपादानपंचमी सा हेत्वार्थेति आत्मन इत्यप्युपादाने पंचमीति निरस्तं। आकाशादित्यादावपि तिमित्रांशस्यैव पंचमीनिर्देशा
ता। अन्यथा संभूतमित्युक्ते नहि शुक्तेरूप्यं संभूतमित्युच्यते युक्तं नापि सोकामयत बहु स्यां प्रजायेयेति स तपोतप्यत स तपस्तप्त्वा इदं
सर्वमसृजत तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुतिस्तत्र मानं। आसत्यादिभवनस्यान्गतस्य चितस्तदनुप्रवेशानंत

न्या॰पा॰ रूपाविशिष्टत्वेन जगत्सृष्टित्वानुपपत्त्या परमेश्वरस्य सत्यत्वादिगुणाभिव्यक्तिपरत्वात्। अन्यथा ऽभवदित्युक्तं। न हि शुक्तिरूप्यमभवदित्युच्य
१३१ ते मरुमरीचिकायां। एवं च स्य सत्त्यत्यदाभ्यामेवोक्तत्वेन निरुक्तं चानिरुक्तं च निलयनं चानिलयनं चेत्यादिवाक्यशेषस्य निरुक्तादिपदवैय
र्थ्यं च। सोऽकामयत बहु स्यामित्यादितु परमेश्वरस्य अजायमानो बहुधा विजायते यदेकमव्यक्तमनंतरूपमित्यादिश्रुतिसिद्धतत्तदनंत
पदार्थप्ररकीतत रूपैर्बहुभावसंकल्पमाह। न च स्वस्यानंतरूपैर्बहुभावं संकल्प्य इदं सर्वमसृजतेति प्रपंचसर्जनानुपपत्तिः। नियाम
करूपैर्बहुभावस्य नियम्यसापेक्षत्वात्। नियम्यं सर्वं सृष्ट्वा नियामकरूपैः प्रवेशोपपत्तेः। उक्तं हि। बहुः स्यामिति संकल्प्य तेन
ः प्रभृति सर्जनं गुतां स्यामिति संकल्पशिष्यसंपादनादिवदिति। अन्यथा स्यामिति सत्योक्तिरयुक्ता स्यामिति संकल्पितस्य सत्यदादिप
वनस्य स्वरूपत्वबाभवदित्यनेनैवोक्तत्वेनेदं सर्वमसृजतेत्यादिवैयर्थ्यं च। स ऐक्षत एवं मतः करणाभावेन तद्विशिष्टाहामर्थाभावादु
तमस्वरूपानुपपत्तिश्च। एतेन तदैक्षत बहु स्यां प्रजायेयेत्य तदपि व्याख्यातं। किंवत तेजोऽसृजतेति यत्तेजः प्रभृति सृष्टं तत्रदात्व
नाहितत्वपाव बहुभावो वाच्यः। तेजः प्रभृति च चेतनं तत्तेज ऐक्षतेत्तदपोऽसृजत ता आप ऐक्षंत ता अन्नमसृजतेति स्तो देवता इति
हस्तत्रत्व स्वपृत्व देवतात्वानां श्रवणात्। न च चेतनं प्रत्युपादानतात्त्वा वीष्टायेतेनैव असद्वा इदमग्र आसीत्ततो वै सदजायत
तदात्मानं स्वयमकुरुतेत्येतदपि व्याख्यातं। तदात्मानं सृजाम्यहं। संभवामि युगे इत्यादिवदुपपत्तेः। न स्वात्मानमाकाशायात्मना राम
कुरुतेति श्रूयते। अन्यथाऽकुरुतेति सत्योक्तिरयुक्ता। किंच परमते ततो वै सदजायतेति पूर्ववाक्येनैव तत्र ह निर्दिष्टात् ब्रह्मणः प्रपंचोत्प १३१

तेः सिद्धत्वात्तदात्मानमिति व्यर्थं। नापि सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंतीति ब्रह्मलक्षणसूचितत्वपोक्ति
स्तत्र मानं निमित्ते कार्यस्य लयाभावादिति युक्तं। निमित्तेप्यूर्णनाभौ तंतोर्लयदर्शनात्। ब्रह्मणोप्यूर्णनाभिवदेव संहर्तृत्वस्य यथोर्णनाभिरि
त्यादिश्रुतिसिद्धत्वात्। न चोर्णनाभिरपि तंतुकोशादीन्प्रत्युपादानं। ऊर्णनाभिनापोषितं तत्पत्तेमात्। न च दधि कुंडलं वा क्षीरे स्वर्णे वा प्रत्यस्तं
यातीत्युच्यते। नापि यथोर्णनाभिः सृजते गृह्णते च यथा सतः पुरुषात्केशलोमानि सर्जमाता पितृवद्धित्यादिदृष्टांतकथनादुपादानता। ऊर्ण
नाभिदेहधातुविशेषस्यैव तंतूपादानत्वात्। केशादीनंगजैपादानकान्प्रति चेतनस्य निमित्तमात्रत्वात्। पितृदेहधातोः पुत्रदेहं प्रत्युपादा
नत्वेपि पितृचेतनस्य निमित्तमात्रत्वात्। नाप्येकमेवाद्वितीयमिति वस्त्वंतरनिषेधात्तस्य नयोपादानत्वं। तन्मतेप्यविद्यादेः सत्वात्। य
द्भूतयोनिमिति योनिशब्दस्य योनिष्ट इंद्र सदने इत्यादिप्रयोगान्नोपादानत्वे नियतेति परैरप्यंगीकृते। नाप्येकविज्ञानेन सर्वविज्ञा
नानुपपत्तिरुपादानत्वे मानं। साहचर्यप्राधान्याभ्यामेव तदुपपत्तेरुक्तत्वात्। नापि सर्वं खल्विदं ब्रह्मेत्यादिसामानाधिकरण्यानुप
पत्तिस्तत्र मानं। सर्वं समाप्नोषि ततोसि सर्व इति स्मृत्यैवान्यथाख्यातत्वात्। प्रकृत्यधिकरणं तु भाष्य एवान्यथाव्याख्यातं। एतेन ब्रह्म
लक्षवपरिणाम इति भास्करादिमतमप्यपास्तं। नापि महाभूतानि सद्वस्तुप्रकृतिकानि सत्वभावानुरक्तत्वे सति विविधविकारत्वात् मदनुस
तघटादिवदिति विवरणोक्तमनुमानं मानं। विवर्त्तमतेऽपादानता न युक्तेत्युक्तत्वात्। सत्प्रधानप्रकृतित्वस्य पन्मतेपि सत्वाच्च। खंडो गौर्मु
डो गौरिति गोस्वभावानुरक्ते खंडादौ व्यभिचाराच्च। सदनुपादानकत्वे विसदृश इति वत्सती पृथिवीत्यादिप्रतीतेरुपपत्त्यात्र प्रयोजकत्वाच्च। अत्रेदं

न्या॰या॰ नीसन्नघट इति वदत्रेदानीमसन्नघट इत्यपि प्रतीत्याघटादेः असत्त्वं गगनमसत्त्वपुष्पं इत्यादिप्रतीत्या च नत्वं गगनादीनामप्यसदुपादानकत्व
१३२ पाताच्च ब्रह्मणनद्भोपादाने चेतनत्वात् चैत्रवत् जगत्त्रानंदप्रकृतिकं तत्स्वभावानुरक्तत्वात् यद्यत्स्वभावानुरक्तं न तत्तत्प्रकृतिकं य
था घटस्वभावाननुरक्तः पटो न घटोपादानक इत्यादिनासत्प्रतिपक्षत्वाच्च। अपि च जगदभिन्ननिमित्तोपादानकं प्रेक्षापूर्वजनितकार्यत्वा
त् सुखदुःखादिवदिति विवरणोक्तमनुमानं। तत्राविवर्तमते उपादानत्वानुपपत्तेरुक्तत्वात्। कार्यत्वादित्येतावत एव हेतुत्वसंभ
वाच्च। त्वन्मते दुःखादीनामंतःकरणोपादानकत्वेन साध्यवैकल्याच्च। जगदुपादाने न कर्तृद्रव्योपादानत्वात् महत्त्वात्। जगत्कर्त्ता न द्रव्यो
पादाने कर्तृत्वात् कुलालादिवदित्यादिनासत्प्रतिपक्षत्वाच्च। अपि तेन विमतमभिन्ननिमित्तोपादानकं कार्यत्वात् सर्वकार्यनिमित्तकालघ
टसंयोगवदिति निरस्तं। तस्माद्ब्रह्म जगत्कर्तृत्वादिनैव श्रुत्यादिवेद्यं न तूपादानत्वेनेति॥ ॥ब्रह्मण उपादानत्वप्रमाणभंगः॥ ॥एवं वेदस्तु
च्यते ब्रह्म न वेद्यं स्वप्रकाशत्वात्। तच्च यद्यपि न वृत्तिव्याप्यत्वं दृश्यत्वभंग उक्तरीत्यासंभवात्। नापि फलव्याप्यत्वं। अतीतादौ नित्यातीं
द्रियेचातिव्याप्तेः। नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं सुषुप्तिप्रलयादौ व्यवहाराभावेनाव्याप्तेः। नाप्यवेद्यत्वे सत्यपरोक्षव्यव
हारविषयत्वयोग्यत्वं। मोक्षे योग्यतारूपधर्मस्याभावात्। तथाप्यवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वयोग्यतात्यंताभावानधिकरण
त्वे न तत्प्रमाणं वा। आत्मानुभूतिः स्वप्रकाशा अनुभूतित्वादिति व्यतिरेकि। न चाप्रसिद्धविशेषणता। वेद्यत्वे किंचिद्विशिष्टात्यंताभावप्रतियो राम
गिधर्मत्वात्। शोक्लवदिति सामान्यतस्तत्सिद्धेः। आत्मा वानुभूतिरूप इति तत्त्वन्मते आत्मनिःसत्त्वाद्यनधिकरणत्वरूपानिर्वाच्यत्वस्य १३२

वप्रोक्तयोग्यतात्यंताभावानधिकरणत्वरूपस्यवानधिकरणत्वोपलक्षिततत्वरूपस्याप्यभावात्॥ किंचात्वन्मते। ब्रह्मणि योग्यत्वमपि मिथ्या
मिथ्यात्वेवस्वसमानाधिकरणात्यंताभावप्रतियोगित्वं तथा च तदत्यंताभावानधिकरणत्वमसंभवि। न च व्यावहारिकयोग्यतात्यंताभावो
ब्रह्मणि नेति वाच्यं। अत्यंताभावस्य ब्रह्मान्यत्वे न व्यावहारिकत्वात्॥ किं चेदमवेद्यत्वं। न तावद्वृत्त्यव्याप्यत्वमसंभवात्। नापि फलाव्याप्यत्वं
दृश्यत्वभंग उक्तरीत्या प्रातिभासिके रूप्यादौ व्यावहारिके अविद्यांतःकरणतद्धर्मसुखादौ घटादौ च फलहतत्वातिव्याप्तेः। न चोक्तरीत्यैव ब्र
ह्मणोपि चरमवृत्तिप्रतिबिंबितचिद्रूपफलव्याप्यत्वेनासंभवाद्युपत्ते न फलव्याप्यत्वं वृत्तिप्रतिबिंबितचित्तन्यातिशययोगित्वमतिशय
श्च नावरणभंगः नापि व्यवहारः। किंतु अज्ञानावरणचित्संबंधः। स च घटादावस्ति न त्वात्मनि। यद्वा फलव्याप्यत्वं वृत्त्या तत्प्रतिफलितचिता
वाभिव्यक्ताधिष्ठानचिद्विषयत्वं तच्च तदन्यव्यवहारयोगित्वं तच्च घटादावस्ति न त्वात्मनीति रहस्यं। घटादेर्वृत्तिविषयत्वमेव न तु तत्प्रतिफ
लितचिद्विषयत्वं न वा तदभिव्यक्ताधिष्ठानचिद्विषयत्वमित्युक्तत्वात्। तथैतेनैव वृत्तिरूपज्ञानाविषयत्वमवेद्यत्वं रूप्यादिरपि साक्षिविषयत्वा
ल्लक्षणो विशेष्यं तु नित्यातीन्द्रियेऽनतिव्याप्त्यर्थमिति निरस्तं। घटादावतिव्याप्तेः। चित्स्वविनतत्स्वभावस्याविस्फुरणस्य तद्विषयत्वमित्युक्त
त्वेनासंभवाद्वा। न तु तर्हि चिदकर्मत्वमवेद्यता। चित्सुखेनैव चित्तच्चिद्विषयत्वमुपेत्य तदकर्मत्वोक्तेरिति चेत्। ताकर्मत्वं किंकारकविशेषत्वं
त्तन्यातिशयवत्वं वा परसमवेतक्रियाफलशालित्वं वा नाद्यः। अनवच्छिन्ने नित्ये चैतन्ये प्रतिघटादेरप्यकारकत्वात्। स्वाकारवृत्तिप्रतिबिंबित
तु प्रतिघटादेरूपादेरिवापरोक्षचरमवृत्तिव्याप्यस्य ब्रह्मणोपि कारकत्वावश्यंभावात्। न द्वितीयः। ब्रह्मण्यप्युक्तन्याये न प्रतिफलितचित्फ

न्याया० त्वम् तावदस्मामंगरूपस्य तदभिव्यक्तचिज्जन्यव्यवहाररूपस्य वातिशयस्य सत्त्वात् । तदन्यस्य च घटादावप्यभावात् । न तृतीयः । अनुद्भूतो समे
१३३ वेतत्वादक्रियात्वाच्च तत्फलशालिनोपि जडस्याकर्मत्वापातात् । प्रतिविंबितवित्तिसमवेतत्वादेः सत्वेपि ब्रह्मणोपि चरमवृत्तिप्रतिफलित
चित्फलत्वम् तावदस्मामंगादिशालित्वात् । यत्ते नतस्य विषमत्वमवेद्यत्वं च निरुक्तं नत्वप्रसिद्धिरिति निरस्तं । घटादौ तु स्वन्यत्वस्य भावस्योक्तत्वान्नात
स्यावेद्यत्वे दुर्वचोऽकल्प्याप्यमपरोक्षव्यवहारः । अपरोक्षता मज्जन्योवा अपरोक्षव्यवहारविषयो वापरोक्षोऽयमित्याकारो वा नाद्यः । धर्माधर्मादी
वप्यपरोक्षत्वापत्तेः योगजज्ञानेनानुव्यवसायेन व्याप्तिज्ञानेन च जन्यव्यवहारस्य सत्वे नातिव्याप्तेः । अपरोक्षता न शब्देनानागतगोचरसाक्षात्कारज
नकप्रत्यासत्तेज्ञानसाक्षात्कारविवक्षायां चात्मस्वरूपज्ञानस्य नित्यत्वेना । संभवात् । विषयगतापरोक्षव्यवहारहेतुसाक्षात्कारविवक्षायां तु
सन्निवेशे रूपादौ अविद्यादौ वातिव्याप्तेः । द्वितीये वक्तुं न अपरोक्षं अपरोक्षतानविषयत्वं चेदात्माविद्ययादिवद्धेयः स्यात् । तस्यैव लक्षणत्वो
पपत्त्या कुसुमे द्विवेदैर्घ्यं च स्वपरोक्षव्यवहारविषयत्वे वेदुक्तव्यवहारयोरपरोक्षेऽपि अन्योन्याश्रयत्वेनान्योन्याश्रयः । न तृतीयः । निराकार
शुद्धब्रह्मविषयस्याहंवज्ञार्थनिर्वेदांतजन्यस्य च व्यवहारस्यापरोक्षेदंत्वाकारत्वायोगात् । अभावेतिव्याप्तेश्च । अस्ति हि गजस्तत्र गजाभावेप्यप
रोक्षमिति लोकव्यवहारः । स चावेद्यः स्वयमेव नाभावस्य प्रत्यक्षत्वे किं त्वनुपलब्धिगम्यत्वमिति फलव्याप्यत्वनिषेधात् । यदि चापरोक्षतानेऽ
परोक्षव्यवहारशब्दार्थस्तदा स्वयमाह किं च । अपरोक्षव्यवहारयोग्यत्वं न तावत्सर्वान्प्रति वेद्यस्य ज्ञानेऽस्मिंस्त्वं प्रति तदभावात् । नापि ज्ञानं राम
प्रति । तस्याव्यवहर्तृत्वात् । नापि ज्ञानाश्रयं प्रति वित्तेर्नाश्रितत्वात् । किं चावेद्यस्याप्यपरोक्षव्यवहारविषयत्वे माहत्तेनदपरोक्षव्यवहारेतद्विषय १३३

कस्फुरणास्यहेतुत्वात्। यदि च स्फुरणविषयोऽपि स्फुरणेन तद्विषयकापरोक्षवृत्तिर्वा तद्विषयं स्फुरणमेव वा स्वभावभेदादेवापरोक्षव्यवहारहे
तुस्तर्हि वैरूप्यापत्त्या द्वावपि तथैव स्याताम्। न तु घटादिकमस्फुरणरूपं स्फुरणं तु तद्रूपमिति चेत्। असत्यतावत्तास्फुरणे स्फुरणान्तरं नापेक्ष्यते तेन
तत्फलं तद्विषयत्वमपि अन्यथाप्रमेयत्वमपि स्ववृत्ति विनैव स्वस्मिन्नमेयव्यवहारं कुर्यादिति केवलान्वयि न स्यात्। गतिरपि प्रामेयत्व स्वस्मिन्
पि स्वकार्यं कुर्यात्। अस्मन्मते अबाध्यत्वरूपसत्त्वस्य स्ववृत्तित्वादेव सत्तासत्तेति व्यवहारः। एतेन चिद्विषयस्वरूपत्वमेव स्वप्रकाशत्वमिति वि
दन्यत्वस्य सर्वमविदृश्यत्व निरस्तं प्रस्तावे उक्तन्यायेन विद्रूपमेव वित्तु न स्ववेद्या स्वात्मनि वृत्तिविरोधात्। न हि छिदा छेद्या भवतीति निरस्तं। मिथ्यात्वा
नुपपत्त्यादेः स्वविषयकत्ववद्भुपपत्तेः। अन्यथा चितिः स्वात्मनि व्यवहारमपि तज्जनयेत् न हि छिदा कार्यं छिदायां दृश्यते। नापि स्वव्यवहारे स्वा
तिरिक्तसंविदनपेक्षत्वं वा स्वव्यवहारे स्वावच्छिन्नसंविदनपेक्षत्वं वा स्वप्रकाशत्वं। अस्य स्ववेद्यत्वपक्षपातया सम्मतत्वात्। स्वविषयत्वे वितात्यव्यव
हारहेतुत्वायोगात् दिग्पक्षत्वाद्युक्तिं वा स्वप्रकाशत्वे आत्मस्वरूपमेव वा तद्धर्मो वा। नाद्यः दृष्टापत्तेः नो त्यः। तात्त्विकस्य तस्याभावे न स्वप्रकाशत्वस्याता
त्त्विकत्वापत्त्या तत्साधकानुमानादेर्बाधात्। स्वकाशत्वलक्षणाभंगः। पूर्वानुभूतित्वहेतौ साध्यप्रसिद्ध्यर्थं धत्वमेतादित्यनुमाने तत्रावेद्यत्वप्र
त्रिव्याप्यत्वे वा फलव्याप्यत्वे वा चिद्विषयत्वे वा अस्वप्रकाशत्वे वा। नाद्ये पर्यातरत्वात्। न हि पूर्वानुमानपतद्भावः साध्यः। न द्वितीयः। तस्य मम वृत्त
दीतवच्छुक्तिरूप्यादौ धर्मादौ न्वयहेतावव्यक्तिविशेषे सिद्धत्वे नासाधारणानैकान्त्यात्। न च पूर्वत्रावेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं साध्यं
तद्वृत्तव्यक्तिविशेषे सिद्धमिति वाच्यं तस्य सामान्यतोऽप्रसिद्ध्या प्रद्धविशेषणत्वात्। न च पूर्वत्र किंचित्त्वपि फलव्याप्यत्वं साध्यं धर्मादिष्वपि

न्या॰पा॰ गिनेप्रतिफलव्याप्यः। अविद्यावृत्तिप्रतिफलितचिद्विषयत्वात् फलमिति युक्तिरूप्या यद्यपि फलव्याप्यमेव अवेद्यत्वमात्रं च स्वप्रकाशत्वपि
निदायें। उक्तन्यायेन फलव्याप्यत्वप्रसक्तौ तदभावस्य बाधात् न तत्तौ पः। उक्तरीत्या प्रतिफलितचिद्विषयत्वस्य ब्रह्मण्यपि भावात् शुद्धचिद्वि
१३४ षयत्वस्य च घटादावभावेन असाधारणत्वात्। न च तत्तु अर्थः। प्रतियोग्यप्रसिद्ध्या अप्रसिद्धेः। सर्वत्रैवे साध्याभावे ऽपक्षीकृत्य सुसाधत्वे तात्तिप्रसं
गाद्वा। किं च धर्मत्वस्यानिर्वाच्यमंगेउक्तरीत्या शब्दप्रतियाप्रत्वादिषु केवलात्वाच्च विधर्मेषु व्यभिचारः। किं चात्मोतावाव प्रतियोगित्वं कुतश्चि
त्व्यावर्तते चेत् तत्रैव व्यभिचारः। व्यावर्त्तते चेद् यतो व्यावर्त्तते तत्रैव धर्मे व्यभिचारः॥ अविवाघरणदाविव स्वप्रकाशत्वदितेधिनो व्यवहारि
कस्य वेद्यत्वस्य सत्वे पि तदत्यंताभावसंभवेनार्थान्तरं। न च घटादेर्धर्मिसमसत्ताकमेव वेद्यत्वं तद्धितेस्थि। तथात्वे आत्मनि वृत्तिव्याप्यत्वव
त्फलव्याप्यत्वस्य व्यावहारिकत्वे पि स्वप्रकाशत्वोपपत्त्यात् निरासवे व्यर्थ्यात्। अतएवायं घटः एतद्वृत्त्यत्वे सति वेद्यत्वानधिकरणत्वानन्य
पदार्थत्वादित्यादि महाविद्यया साध्यप्रसिद्धिरिति निरस्ता। वेद्यत्वानिरुक्तेः॥ अयं घटः एतद्वृत्त्यत्वे सति वेद्यत्वानधिकरणान्यत्वानधिकरणं॥
पदार्थत्वादित्यप्रकरणसमत्वाद्वा। तस्मात् अप्रसिद्धविशेषणत्वं दुरुद्धारं। त्वदभिमते ज्ञातिरूपमनुभूतित्वं शुद्धचेतन्ये ऽसिद्धं च। अखंडार्थ
भंगेउक्तरीत्या ज्ञाते धर्मिसमसत्ताकमेदव्यवृत्तिसाधेयत्वात्। जउत्व भंगेउक्तरीत्या अनुभाव्याभावे अनुभूतित्वासंभवाद्वृत्त्विपक्षादव्या रत्न
वृत्तेश्चानुभूतित्वे। तस्यानुभूतिशब्दवाच्येनान्यनिसत्वात्। किं च वृत्तिरूपस्य एतेज्ञानुभवस्य पक्षत्वे बाधः। अपरोक्षस्य पक्षत्वे तत्र व्यभिचा १३४
रः। तन्निरासार्थं हेतुविशेषणे ऽनुभूतिशब्देन विवक्षितत्वेनोक्तौ चाप्रयोजकत्वं। अपि विवधुःखादिवत् स्मृतिवत् एतेज्ञानुभववद् अपरोक्षानुभव

मप्यपरोक्षतो ज्ञानाभिमामहं जानामि स्वात्मानं जानामीत्यात्मनो वेद्यत्वग्राहिणा प्रत्यक्षेणात तदात्मानमेवावेदीत्यादिश्रुत्या च बाधः । न चात्रापरोक्षवृत्ति
वेद्यत्वं वापरोक्षव्यवहारविषयत्वं वा भातीत्युक्तं । जानामीति ज्ञप्तिविषयत्वस्यैवानुभवात् । एवं जानामीत्यादावपि तथात्वापाताच्च । अनुभूतिः स्व
रूपविषयः । अपरोक्षव्यवहारविषयत्वात् । घटवत् । वेद्यानुभूतिर्वेद्यापरोक्षव्यवहारयोग्यापरोक्षज्ञप्तिविषयः वेद्यापरोक्षव्यवहारविषयत्वा
त् । घटवत् । वेद्यानुभूतिः वेद्यापरोक्षव्यवहारयोग्यापरोक्षज्ञप्तिस्वविषयो नावतिष्ठते । वेद्यं प्रत्यक्षप्रकाशमानत्वरहितत्वात् । वेद्यघटवदिति
सत्प्रतिपक्षत्वं च । अप्रयोजकत्वं च । नन्वनुभूतिरूपस्यात्मनः परवेद्यत्वे ऽनवस्था स्यात् । पराभाववद्दशायामात्मविसंशयादिप्रसङ्गात् । न चा
त्मन्यहमनहं वेति कस्यचित् संदिग्धे नापि नाहमेवेति विपर्ययस्मृतिः । स्ववेद्यत्वं तु विरुद्धं तस्माच्चाप्रयोजकतेति चेत् न । आत्मनः संदेहाद्यविषयस्या
हमर्थस्यानात्मत्वात् । तदन्यस्मिंश्च शब्दैकगम्यात्मनि संदेहादेः सत्वात् । किंच स्ववेद्यत्वे किमिति विरुद्धं । किं साक्षात्कारस्य विषयजन्यत्वात् स्वस्य स्व
जन्यत्वासंभवात् किं वा साक्षात्कारत्वे सत्यैन्द्रियसन्निकृष्टस्यैव विषयत्वात् । स्वजनकसन्निकर्षकाले च स्वस्याभावात् । यद्वा विषयविषयिभा
वसंबंधस्योभयनिष्ठत्वात् अथवा ज्ञानस्यैव ज्ञेयत्वे विरुद्धस्य क्रियायाः कर्मत्वस्यापातात् । आहोस्वित् विषयविषयिणायव विषयत्वे कर्तुरेव कर्म
त्वापातात् । तस्य चान्यत्वगर्भितस्यैकस्मिन्नसंभवात् । नाद्यद्वितीयौ । स्वप्रकाशस्यात्मस्वरूपज्ञानस्येश्वरज्ञानवज्जन्यत्वेनाविरोधात् । अन्य
थात्वव्यवहारहेतुसाक्षात्कारस्यापि स्वजन्यत्वादिनियमान्न चापि तुल्यो दोषः । न तृतीयः । अतीतानागतपितामहसंतानदर्शने तस्योभया
विषयत्वात् । न चतुर्थः । वृत्तिविशेषस्य कार्यत्ववत्तरद्वा विशेषस्यावेद्यत्ववत् स्वव्यवहृतेष्वव्यवहार्यत्ववत् । अथ चेति शब्दगताभिधायाः स्वा

न्याया॰ मिधेयत्ववत्तद्विरूपस्य यद्दृश्यं तन्मिथ्येति व्याप्तिज्ञानस्य मिथ्यात्वानुमितेश्च स्वविषयत्ववद्व्याघातोपपत्तेः। न पंचमः। अतस्यैव ब्रह्मणो ज्ञेयत्वस्वविषयवि
१३५ रणापत्तमिथ्यात्वानुमितेः स्वविषयकत्वस्य अभिधायकस्यैव शब्दस्य स्वाभिधेयत्वस्य चरशब्देन नमामहं ब्रह्मास्मीत्यनुभवेन तदात्मानमेवावेदि
तिश्रुत्या वक्तृत्वकर्मत्वसिद्धेः परसमवेतक्रियाफलशालित्वरूपात्मत्वगर्भितस्वकपोलकल्पितलक्षणत्यागे तत्क्रियाविषयत्वादिरूप
स्याप्यन्यस्यैव लक्षणस्याकल्पत्वात्। न तु कृत्यादिः कृत्याद्युत्तरं प्रत्येव विषयः न तु स्वं प्रतीति चेत्। नागत्यादेर्गत्यघंतरविषयत्वस्पर्श
नात्। यदि च वस्तूनां विचित्रस्वभावत्वात् गत्यादावदृष्टमपि इष्टत्यादेः स्वजातीयविषयत्वं तर्हि तत एवानुमितेः स्वविषयत्वमप्यस्तु। अन्यथा
स्वस्य स्वस्मिन्व्यवहारजनकत्वं नस्यादित्युक्तं। व्याप्तिज्ञानमिथ्यात्वानुमित्यादेश्च स्वाविषयत्वे सर्वोपसंहारवती व्याप्तिरनुमितिमिथ्यात्वं च
न सिध्येत्। नहि चित्तस्य चिदविषयत्वे चिद्वृत्तिव्याप्यत्वमात्रेण सिध्यादिवत् व्याप्तिविषयदृश्यत्वेः स्वाविषयत्वे विसर्वोपसंहाररूपत्वे व्याप्तिसिद्धावस्म
उपपत्तेश्च। न च व्याप्तिज्ञानादेः स्वस्मिन्व्यवहारहेतुत्वमेव तत्स्वविषयत्वमिति वाच्यं। घटादिज्ञानस्यापि तत्संस्कारहेतुत्वमेव न तु तद्विषयत्वमित्या
पत्तात्। व्याप्तिज्ञानादेरपि व्याप्यतावच्छेदकावच्छिन्नत्वाद् घटादौ तातरतिवत् सर्वोपसंहारवती व्याप्तिर्नेत्यनुभवाच्च। एवं च ज्ञानाभिमा
महमिति तदात्मानमवेदिति प्रत्यक्षेण तच्छ्रुत्या चात्मनः कर्तृत्वकर्मता। गमनादौ तु दृष्टत्वाच्च कर्तुः कर्मत्वमिष्यते। अन्यथा शब्दः शब्दादेः स्वया न्या
प्यत्वदर्शने कथं प्रतिकूलतर्कपराहतिश्च। अवेद्यत्वे अवेद्यत्वसाधकप्रमाणावेद्यत्वावेद्यत्वाभ्यां व्याघातात् विदंतानां ब्रह्मणि प्रामाण्य १३५
मिति निरस्ते। आत्मनोऽसिद्धि
योगाच्च। ब्रह्मविचारविधिवैयर्थ्याच्च। ब्रह्मज्ञाताऽनिवृत्तप्रयोगाच्च। यतेनतद्दत्तानन्निवर्तकत्वात् तत्प्रामाण्यमिति निरस्ते।

प्रसंगाद्यापत्तेः सिद्ध इति चेत् स्वतरतिकोर्थः। किं स्वेनैवेति किं वा प्रमात्रंतं वितेति। नाद्यः स्वविषयत्वापातात् ज्ञानं च सिद्ध इत्यस्य ज्ञात इति नार्थः। किं
तु व्यवहारयोग्य इति वाच्यं। ज्ञानत्वातिरेकेण व्यवहारयोग्यत्वाभावात्। मुक्तौ योग्यताया अप्यभावेनात्मनस्तदा स्वतःसिद्धभावापातात्। नांत्यः।
सिद्धुपायस्यानुपन्यासात्। अन्यथा तत्र घटादेरपि सिद्ध्यापातात्। न तु वृत्तिव्याप्यत्वात् सर्वं पुक्तं अवेद्यत्वं तु फलाव्याप्यत्वमिति चेन्न एतादृशावे
द्यत्वस्य घटादावपि सत्त्वात्। किं वात्मस्वरूपभूतचितेः स्ववेद्यत्वाभावे चित्त्वे स्वव्यवहारहेतुत्वे स्वस्मिन् संशयादिविरोधित्वं च न स्यात्। सुने
सभोत्स्यत्ववत् चित्तेः स्ववेद्यत्वनियमात् मुक्तौ च वेद्यांतराभावात्। उक्तं चैतज्ज्ञत्वहेतुत्वभंगे। चित्ते सत्यव्यवहारादिहेतुत्वे तत्संशयादिविरोधि
त्वे च तद्विषयत्वस्य तंत्रत्वात्। न च स्वकर्मकत्वाभावेपि स्वनिर्वाहकत्वात् स्वस्मिन् व्यवहारादिकं कुर्यादिति वाच्यं। स्वनिर्वाहकशब्देन व
तिर्वाह्यत्वनिर्वाहकत्वरूपयोर्निर्देहत्वा क्रियाकर्मत्वकर्तृत्वयोरुक्तेः। स्वनिर्वाहकमध्ययनविधिर्दीपप्रभादिकमप्यन्यस्मिन्निव स्वस्मि
न्स्वकार्यकारि चेत्तद्विषयमेव। एतेन यथा गवादिपदस्य बहुव्रीहिः स्वाविषयेपि कुर्वत्स्वकार्यं करोति तथेहापीति खंडनोक्तं निरस्त
व बहुव्रीहेरन्यपदार्थे शक्तिरिति वैयाकरणादिमते लक्षणेति तार्किकादिमते वा चैत्रशालास्था आनीयतामित्यत्रोपलक्षणस्यापि चैत्र
स्य स्वशालास्थस्य तद्वद्भविषयत्ववत् कुटस्यापि पुत्रादिवत्। अन्यपदार्थभूतसमुदायांतर्गतस्य शक्त्या लक्षणया वा बहुव्रीहिविषयत्वे
तद्विषयत्वासंभवेः। उक्तं हि कैयटे। अन्तर्भावयवभेदः समुदायः समासार्थ इति। तत्र ज्ञानस्य स्वस्मादन्यत्र व्यवहारादि ज्ञाने तद्विषयत्वं तंत्रं
स्वस्मिंस्तु स्वाभेद एवेत्युक्तं। एतच्चान्यत्रैवायं नियम इति सर्वत्रस्तु वचत्वात्। दुःखादिविषयकस्य द्वेषस्य स्वाभेदे सत्यपि स्वविषयकत्वा

न्याया॰ तिरेकेणाडुखाद्या विवस्वस्मिन्निवृत्तिहेतुतायाः दृष्टा विरोधित्वस्य चादर्शनाद्व्यवहाराज्ञानस्य च स्वाभेदे सत्यपि स्वविषयत्वव्यतिरेकेणाव्रह्मणीवस्व
स्मिन्नप्रकाशप्रतिबंधकत्वादेरदर्शनाच्च। स्मरणरूपस्यपरोक्षानुभवरूपस्य च वृत्तिज्ञानस्य स्वाभेदे सत्यपि स्वविषयकत्वव्यतिरेकेणास्ववि
१३६ षयस्वस्मिन्व्यवहारादिहेतुताया अदर्शनाच्च। वृत्तेरपि चिद्वत्स्वव्यवहारहेतुत्वे स्वप्रकाशत्वं स्यात्। मैत्रचैतन्यस्य चैत्रचैतन्येन पा
रमार्थिकाभेदे सत्त्वेप्यभेदे कल्पनाराहित्येव सम्भवितद्विषयकत्वव्यतिरेकेण तद्व्यवहारादिहेतुत्वव्यतिरेकस्यादर्शनाच्च। सोहं मां न जाना
मीति स्वविषयकत्वस्यानुभवाच्च। एवं च कुर्यात्स्वकार्यं स्वस्मिंश्चेद्रूपात्मेनस्वाविषये तद्रूपे वा ज्ञानादिकं कुर्यात्स्वकार्यमपि चात्मनि। स्ववि
षयकत्वेपि स्वकर्मकत्वाभावात् अवेद्यत्वमिति तु निरस्तं। घटः स्वप्रकाशः घटत्वात्। व्यतिरेकेणापटवदित्याभाससाम्यं चानुचक्षुरा
दिसिद्धस्य पटत्वे बाधः। अन्यथा आश्रयासिद्धिरिति समं। तद्वज्ञानेन तत्वापरोक्षव्यवहारयोग्यत्वे सति वेद्यत्वानधिकरणज्ञानत्वात् म
दीयज्ञानवदिति स्वप्रकाशत्वानुमाने तद्वज्ञानेन तत्वापरोक्षव्यवहारयोग्यत्वे सत्यवेद्यत्वानधिकरणज्ञानत्वान्मदीयज्ञानवदिति प्रक
रणसमता। विवादपदानि ज्ञानानि घटज्ञानान्यत्वे सति वेद्यत्वानधिकरणानि ज्ञानत्वात्। घटज्ञानवदित्यत्रापि विवादपदानि ज्ञानानि
घटज्ञानान्यत्वे पतिविदविषयत्वानधिकरणानि ज्ञानत्वात् घटज्ञानवदिति प्रकरणसमते वेद्यत्वे नात्मनोपि स्वप्रकाशत्वं निरस्तं। चितप
वास्वप्रकाशत्वे चिद्रूपत्वेन जडसिद्धेः परपक्षे आत्मनि विद्वित्वायोगस्योक्तत्वाच्च। विज्ञाता प्रज्ञातेति ज्ञातृत्वश्रुतेश्च। एतेन विमतं ज्ञानमचित्वाश्र राम॰
यविषयं ज्ञानत्वात्। ज्ञानांतरवत्। विमतं न स्वाश्रयविषयं गुणत्वात् अग्नेरौष्ण्यवदिति विद्यासागरोक्तं निरस्तं। मामहं जानामीति प्रत्यक्षस्वा १३६

धात।अत्तान इव ज्ञानेच्छाद्युपविषययोरेकोपपत्त्या अप्रयोजकत्वाच्च।अंतःकरणविषयपरिणामांतःकरणाश्रितायां शब्दादिज्ञत्वदृष्टौ आद्यस्य व्यभिचार
द्वा।द्वितीयस्यापि दीपगतभास्वररूपस्य घटरूपदीपेष्वंधकारविरोधित्वेन तद्विषयतया तत्र व्यभिचाराच्च।त्वन्मते तस्यागुणत्वाच्च।नाप्यत्रायं पुरुषः स्व
यंज्योतिरिति श्रुतिः आत्मनः स्वप्रकाशत्वे मानं।तथाहि।अस्तमित आदित्ये याज्ञवल्क्येत्यादिना किंज्योतिरयं पुरुष इत्यंतेन ज्ञानसाधनालोकाद्यभावे
जीवस्य किं ज्ञानसाधनमिति पृष्टे आत्मैवास्य ज्योतिरित्युपक्रांत आत्मनात्मा परमात्मैवास्य स्वप्ने न शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीतीत्यादिलिंग
त।फल्ग्वाद्यधिकरणन्यायेनात्मशब्दस्य तत्रैव मुख्यत्वाद्योतथाचात्रायं पुरुष इत्युपसंहारोपि अस्येत्यस्यानुषंगेणायमीश्वरोस्य जीवस्य स्वयमेव ज्यो
तिर्ज्ञानहेतुरित्येवंपरः।अस्मिन्नेव प्रकरणे वाचैवायं ज्योतिषास्त इति ज्योतिःशब्दस्य ज्ञानसाधने प्रयोगात्।स्वप्रकाशत्वपरत्वे सदा स्वप्रकाशत्वेन प्र
तावृत्तेत्यस्य वैयर्थ्याच्च।आत्मैवास्येति षष्ठ्याः स्वविषयत्वस्यैवोक्तेश्च।स्वयंपदस्य साक्षित्वपरत्वाद्विवादाविषयत्वपरत्वे वक्रतौ वै मुख्यार्थत्वापाता
न्नावेद्येपि प्रदीपादौ स्वविषयप्रकाशत्वमात्रेण लोके स्वप्रकाशपदप्रयोगाच्च।तत्रापि सजातीयप्रकाशाप्रकाश्यत्वं निमित्तमिति चेन्न।घटादेरपि स्व
प्रकाशत्वापातात्।नहि घटज्ञाने दीपेव घटत्वादिकमस्ति।यद्वोक्तं विवरणे आत्मा स्वप्रकाशः स्वसत्तायां प्रकाशव्यतिरेकविधुरत्वात्।प्रकाशाश्रयत्वात्।
प्रकाशकत्वात् प्रदीपवदित्यनुमानत्रयं तत्र साध्यं अवेद्यत्वे चेत् दृष्टांतस्य साध्यवैकल्यं।सजातीयप्रकाशाप्रकाश्यत्वं चेदर्थांतरं।घटादिस्वविदत्वप्रका
शत्वेप्युपपत्तेः।स्वविषयप्रकाशत्वे चेत् सिद्धसाधनं।किं चाद्यस्य ज्ञाने कसति दुःस्वादो व्यभिचारः।अंत्ययोर्वादृष्टसिद्धिः।त्वन्मते आत्मन
प्रकाशत्वात् निरस्तं वाविद्यानुमानभंगे ज्ञानस्य भानुगतप्रकाशत्वं।परपुंस विवरणे आत्मा न स्वीयत्वेन तद्वत्सदाचमाने प्रकाशाश्रयः प्रकाशा

न्या॰या॰ अप्रत्यक्त्वात् आदित्यवदिति तत्रास्माकं सिद्धसाधनं । तत्त्वासिद्धिर्वा । रातेन विवादाध्यासितासंवित्स्वसमानाश्रयस्वसमानकालीनस्वगो
१३७ चरज्ञानविरहप्रयुक्तव्यवहाराभावा भवति । संवित्त्वात् । अनंतरव्यवह्रियमाणसंविद्वदित्यानंदबोधोक्तं निरस्तं । स्ववेद्यत्वे पक्षपद्यत्वस्यास्माकं
सिद्धसाधनात् । ब्रह्मणो वेद्यत्वश्रुतिस्तु साकल्येनावेद्यत्वपरेति द्रष्टव्यं भंगवादोक्तं । एतेनैवानुभूतिर्न स्वविषया वा स्वाविषयत्वे
सति स्वजातीयविषया वा क्रियात्वात् छिदावत् । प्रकाशत्वात् आलोकवत् । वस्तुत्वात् घटवत् । चैत्रीयानुभवो वा चैत्रीयापरोक्षव्य
वहारयोग्यानुभवो वा न चैत्रीयापरोक्षानुभवविषयः । अनुभवत्वात् मैत्रानुभववदित्यादीनि नवीनान्यनुमानानि निरस्तानि । अवि
द्यानैकांतिकत्वबाधसत्प्रतिपक्षाद्यक्तदोषात् । तस्माज्ज्ञानस्य भट्टरीत्या ज्ञाततानुमेयत्वेतीतं जानामीत्यनुभवस्याहंसुखीतिवदहं जा
नामीत्यपरोक्षानुभावस्य बाधो गात् । प्राभाकररीत्यायं घट इति ज्ञान्यज्ञानस्यैव स्वप्रकाशत्वे विमतं न स्वविषयं तत्वसंनिकृष्टकरण
जन्यप्रमात्वादित्याद्यनुमानेन अयं दृष्टघटमनुभवामीति ज्ञानयोः क्रमानुभवेन च विरोधात् । तार्किकरीत्यानुव्यवसायस्यापि प
प्रकाश्यत्वे ज्ञानस्य प्रत्यक्षात्मविशेषगुणत्वेन सुखादिवदवश्यवेद्यत्वानुपपत्तिः न ग्राह्यत्वेऽपि ज्ञानं विनानुव्यवसायापवायोगेनान
वस्थानात् । अयं घटं घटं जानामीति ज्ञानद्वयातिरिक्तज्ञानधारानुभवेनानुभवविरोधात् । चैत्रदुःखादिकं चैत्रीयनित्यापरोक्ष
ज्ञानविषयः । तं प्रतिज्ञातैकसत्त्वात् । यद्यं प्रतिज्ञातैकसत्तत्तदीयाक्रज्ञानविषयः यथा स्वप्नरूप्यलक्ष्यादि नानित्यता न सिद्धेत १३७
त्वविषयं नित्यज्ञानत्वात् । स्वव्यवहारेऽन्यानपेक्षत्वात् स्वसंशयादिविरोधित्वाद्वे स्फुरज्ञानवत् । न च द्वितीयपादावसिद्धिः । ज्ञानधा

णानुभवादित्याद्यनुमानेऽप्यत्र स्वोक्तज्ञानाभावे स्वप्रोत्थितस्य परामर्शेनस्यादित्याद्यनुकूलतर्कसनाथे विरोधात्। अद्वैतिरीत्या
त्मरूपस्य ज्ञानस्यावेद्यत्वे च दोषाणामुक्तत्वात्। आत्मनो नित्यगुणभूतं ज्ञानं स्ववेद्यत्वरूपस्वप्रकाशवत्। आत्माविद्यावद्व्यभि
विनातेनाभिन्नत्वान्मामहं जानामीत्यनुभवात्। आत्मरूपा संवित् स्वविषया स्वजन्यव्यवहारविषयत्वात्। स्वसत्तायामप्रकाशमानत्वर
हितत्वात्। यो यज्जन्यव्यवहारविषयादिः स तद्विषयः यथा घटः। आत्मरूपा संवित् स्वविषया स्वसमानाधिकरणस्वसमानकाली
नसत्त्वप्रकारकस्वविशेष्यकसंशयविरोधित्वात्। उक्तविशेषणावच्छिन्नपर्यवसितविरोधित्वात् यद्विशेष्यकोक्तसंशयादिविरोधि तत्त
द्विषयकं यथा घटसंवित्। स्वसमानाधिकरणपदस्यानेस्वापरोक्षव्यवहारयोग्येति वा वक्तव्यं। अयं घट इत्यादिज्ञानमपि घटे व्यधि
करणादिसंशयाविरोधीति व्याप्तिग्रहणार्थमेव हेतुविशेषणानि नित्यसिद्धिर्वारकाणि न्यायानुमानेऽप्यस्य वेद्यत्वरूपस्वप्रका
त्ववात् स्वप्रकाशदीप्स्या प्रयप्रदीपवत्। तस्माद्यौगिकापुनरुक्तानन्तवैदिकशब्दैर्वाच्यतयावेद्यत्वादनन्तगुणं ब्रह्मेति॥ ॥आत्म
नः परामिमतस्वप्रकाशत्वभंगः॥ ॥यत्तु दूरस्तु च्यते। ब्रह्म सर्वशब्दावाच्यमिति तत्रावाच्यपदेनोच्यते चेत् वाच्यत्वसिद्धिः। नापि तेनापि
लक्ष्यते। आवाच्यरूपमुख्यार्थस्यान्वयाभावात्। भावे वा ब्रह्मना वाच्यं किं तु तीरवदवाच्यरूपमुख्यार्थसंबंधिमात्रमिति स्यात्। मु
ख्यार्थहीनस्यापि ब्रह्मलक्षकत्वे घटशब्दोऽपि घटलक्षकः स्यात्। एवं निर्विशेषस्वप्रकाशपरमार्थसदित्यादिशब्दैर्ब्रह्मोच्यते
चेद्वाच्यत्वसिद्धिः। नापि तैरपि लक्ष्यते निर्विशेषस्वप्रकाशादिरूपमुख्यार्थस्यान्वयाभावात्। एवं लक्ष्यशब्देनोच्यते चेद्वाच्य

सू० पा०

१३८

त्वसिद्धि[illegible]स्यते चेल्लक्षस्यत्वहानिः। गंगा शब्दलक्षस्य गंगात्ववतलक्ष्यपदलक्षसंस्थाल्लक्ष्यत्वात्। ननु निर्विशेषादिशब्दानां विशेषा
भावादिविशिष्टं वाच्यं। तच्च न ब्रह्म तस्य विशेषाभावाद्युपलक्षितत्वादिति चेत्। तर्हि विशेषाभावोपलक्षितशब्दवाच्यत्वमनिवार्यं।
ननु विशेषाभावोपलक्षितत्वादिकं वा तद्विशिष्टं वा निर्विशेषादिपदवाच्यं तच्च न ब्रह्म किंतु तदाश्रयव्यक्तिभूतं विशेष्यं एवं वस्तुवा
र्थसिद्धिः। ब्रह्मणो निर्विशेषादिप्रातिपदिकलक्ष्यत्वेपि निर्विशेषत्वाद्यहानिरिष्टेति चेन्न व्यक्तिः शब्दार्थः जातिस्तु प्रधानमिति मते जातिवि
शिष्टा व्यक्तिः शब्दार्थ इति मते च यत्र विशेष्येति निर्विशेषत्वादिकं तस्य तद्वाच्यत्वायोगात्। जातिरेव शब्दार्थः व्यक्तिस्तु लक्ष्येति मत
स्य च वक्ष्यमाणत्रिविरोधादिना प्रत्यक्षनिरासात्। अस्मिन्पक्षे घटादिव्यक्तेरपि घटादिशब्दावाच्यत्वेन ब्रह्मणस्ततो विशेषार्थं जातिवा
भिः सत्यादिशब्दैर्मे च शब्दे ननु रूपइव ब्रह्मज्ञान्याधार व्यक्तिसंबंधितये व लक्ष्यत इति वक्तव्यत्वेन मुख्यार्थाभावादिदोषतादव
स्थ्यात्। सत्यंज्ञानमित्यादौ ब्रह्मणः सत्यत्वादिधर्माश्रयतये व लक्ष्यत्वे घटादिवत्सखंडार्थत्वापातात्। किंच तिर्गुणत्वप्रकाशा
दे ब्रह्मत्वेघ घट्टब्रह्मतयेष्टं तत्तत्त्वब्रह्मेति साधु समर्थितो ब्रह्मवादः। तत्ववाच्यादिशब्दाः समस्तरूपाः लक्ष्यादिशब्दास्तु योगिकाः। अभ
वेषामपि वाचकत्वात् न वाचकतेति चेन्न। अन्विताभिधानपक्षे तेषामपि वाचकत्वात्। अभिहितान्वयपक्षेपि वाक्यपवा
भिहितान्वयस्वीकारेण प्रकृतिप्रत्यययोरन्विताभिधायित्वात्। समासे पदार्थसंसर्गस्य यौगिके प्रकृतिप्रत्ययार्थसंसर्गस्य चा राम
भिधेयत्वेपि पदार्थस्य प्रत्ययार्थस्य च वाच्यत्वात्तदर्थस्य ब्रह्मणः वाच्यत्वापरिहारात्। यदि तु ब्रह्म न पदार्थः किंतु—यथा संसर्ग १३

येन तर्हि सखंडं स्यात्। यदि तु अवाच्यमित्यादौ पद[illegible]दुपादिकं न स्वार्थे संसर्गे परं किंतु ब्रह्ममात्रलक्षकं तर्हि न तेनावाच्यत्वादिसिद्धिः। तस्यापि
विशेषादिशब्दवाच्यत्वे तु दुर्वारं। तदुक्तं। यदेवन्निर्गुणमिति कथं गौणं वदिष्यति। गुणाभावोपलक्ष्यं चेत्पदं तदपि वाचकमिति। येन लक्ष्यमि
ति प्रोक्तं लक्ष्य शब्देन सो वदेदिति। एवं च। अवाच्यत्वस्यादिपदैर्लक्ष्यं चेद्दृश्यतादिकं स्यान्न ही शब्दलक्ष्यस्यानहीत्वमिव हि ध्रुवं। यतो
वाचो निवर्त्तंत इति अशब्दमस्पर्शमित्यादिश्रुतिस्तु अभूतत्वाद्यभिप्राया। न तद्दृगिति ज्ञेयं न वाच्यं न च तर्क्यते। पश्यंतोपि न जानंति मे
रो रूपं विपश्चित इत्यादेर्दर्शनात्। अभूतत्वादवाच्यं तदतर्क्यं ज्ञेयमेव च। अनंतगुणपूर्णत्वाद्दित्यदेवं गिनो श्रुतिः। अवाच्यमिति लोको
पि वक्तुं स्वपर्यंतमं भुवीत्यक्तेश्च। पराभिमतार्थे अशब्दमित्यादिशब्दवाच्यत्वस्यापि निषेधेन अशब्दावाच्यस्याशब्दत्वपरिध्यास्वव्याघाता
च्च। यतो वाचः इत्यत्र मनसा सहेति श्रुतमनोवृत्तेरिवांतःकरणवृत्तिव्याप्ये ब्रह्मणि वाग्वृत्तेरपि सर्वथा निषेधायोगाच्च। यतश्चानंदं ब्रह्म
णा इति यदानंदाद्यनेकशब्दमुख्यार्थत्वाय निवर्त्तंत इत्येकामुख्यार्थत्वस्येव व्याप्यत्वाच्च। तन्मते यतो वाचा इत्यादेरपि लक्षणया नि
न्मात्रपरत्वे न वाच्यत्वाविरोधित्वाच्च। अपूकस्माडुच्यते ब्रह्मेति तस्माडुच्यते परं ब्रह्मेति श्रुत्या वचसां वाच्यमुत्तमं परमात्मेति वा
युक्त इत्यादिस्मृत्या वेदांततात्पर्यविषयो ब्रह्मवाच्यं वस्तुत्वाल्लक्ष्यत्वाद्वा नीरवत्। परमार्थसदादिपदं कस्यचिद्वाचकं। पदत्वा
द्घटपदवत्। सत्यज्ञानादिवाक्यं वाच्यार्थतात्पर्यवत्पदयुक्तवाक्यत्वादग्निहोत्रादिवाक्यवदित्याद्यनुमानेभ्यश्च विरोधाच्च विपक्षे लक्ष्य
त्वेन स्यात्। [illegible]धीर्हि। नालक्षितिकशब्देन श्रुतपदार्थान्तरधीहेतुः। तत्रागृहीतशक्तित्वात्। किंतु पूर्वधीस्थवाच्यार्थानुपपत्तिदर्शने

सति तस्य ... स्वरूपतो वा वाच्यार्थसंबंधित्वेन वावगतस्यार्थांतरस्य बोधकः । गंगाशब्दादेस्तथादर्शनात् । अन्यथातिप्रसंगात् । तथा च ब्रह्म
णो पि लक्ष्यत्वे वाच्यार्थसंबंधित्वेन ज्ञेयत्वात् । औपनिषदत्वश्रुत्या वेदैकगम्यस्य वाच्यशब्देनाज्ञेयत्वात् । स्वप्रकाशतया नित्यसिद्धौ च शब्द
वैयर्थ्यात् । अवाच्यवशब्दस्य लक्षकस्यैव वक्तव्यत्वात् तत्रापि वाच्यसंबंधित्वेन ज्ञेयत्वेनानवस्थेति कथमवाच्यलक्षणा एवं चावाच्य
योगितया तुल्यं लक्ष्यं ब्रह्म च वैदिकं । अवाच्यं चेति वक्तव्ये लक्षके स्यानवस्थितिः । न च वाचकस्यापि गृहीतसंगतिकस्यैव बोधकत्वात्
संबंधग्रहणस्य च संबंधिज्ञानाधीनत्वात् । संबंधिनश्च ब्रह्मणः शब्दैकगम्यत्वात् तत्राप्यनवस्थेति वाच्यं । यौगिकशब्दानां वाकतुल्य
त्वेन संगतिग्रहणानपेक्षणात् । एवमवाच्यं चेत् ब्रह्म न सिध्येत् स्वतः सिद्धेर्निरस्तत्वात् औपनिषदत्वेन चाशब्देनासिद्धेः । लक्षकस्य
च शब्दस्य वाच्यार्थसंबंधित्वेन ज्ञाते ऽर्थे एव साधकत्वेनावाच्यस्यासिध्ययोगात् । ननु वात्र पक्षो ब्रह्मपदवाच्यं चेत्सिद्धसाधनं लक्ष्यं चेद्वि
रुद्धं अत एवावाच्यं । अनुमिते च शब्दादनुमितिप्रसंगात् । एवं च परोक्षेप्यपरोक्षे च वाच्ये वस्यार्शनीव च अपरोक्षे परोक्षाधीर्दु
ष्टाकारणाशक्तितः । तस्माच्च विरुद्धे भानत्वावांतरजातीयपरोक्षत्वे तदा ऽपरोक्षत्वानवोर्भित्रत्वात् तयोरेकविषयात् तत्र विरुद्धज्ञानस्याभावा
द्विरुद्धज्ञानाधारत्वानविषयत्वस्य च वाक्यस्यार्शनविषयत्वस्यैकैकस्मिन्न संभवात् प्रत्यक्षविषयमपि शाब्दज्ञानं परोक्षमेव ।
किं च धर्मिमात्रस्य ... तत्त्वाभिप्राये प्रत्यक्षे घटादौ अयं गुरुः पर्वतो ऽग्निमानित्यादिशब्दादप्यपरोक्षधीः स्यात् । नापि सप्रकारकाभिप्राये

प्रकृते तदभावात् । न हि दशमस्त्वमसि त्वत्त... मित्यादिवाक्यबोध्ये दशमत्वे कालादिकं प्रागपरोक्षं वा काक्ये वेवैयर्थ्यात् । न च स्वरूपाभिप्राये

बोऽस्वरूपज्ञानेनापरो॰ त्ततोभास्यविज्ञत्वप्र॰ शब्दंगत्वपा स्वरूपज्ञानप्रयुक्तभानाप्रतिबंधार्थमेवावरणकल्पनात्। एतेनापरोक्षेब्र
ह्मणि परोक्षधीः यदि तेकाभिन्यादौ अरोपक्षधीरिवाप्रमाणं स्यात् इति निरस्तं। स्व ते अनुभववत् अनुमितेरपि इंद्रियेणापरोक्षधी
वत् पूर्वपरोक्षे स्वाघोगजसाक्षात्कारवत् परोक्षत्वत्रापामयरोक्षप्रत्यभिज्ञानवद्वा परोक्षज्ञानविषयेऽर्थे परोक्षत्वजात्याधारत्वेनो
पपरोक्षस्य परोक्षत्वेनानुत्वे एवनाप्रामाण्यापत्तेः कामिनीसाक्षात्कारस्य बाधात् प्रमाणत्वं न तु परोक्षार्थविषयकापरोक्षत्वज्ञा
त्का त्याधारत्वात्। तथात्वे योगजसाक्षात्कारादेरप्यप्रामाण्यं स्यात्। किंचैवं शब्दादावेवापरोक्षधीरिति त्वदेकदेशिमते दोषाभावेपि इंद्रिये
मादावभिज्ञानमनुत्पाद्य संस्कारसचिवं प्रत्यभिज्ञानमिव शब्द आदौ परोक्षज्ञानमनुत्पाद्य मननादिसाध्यप्रतिबंधनिवृत्तिसचिवो
ऽपरोक्षज्ञानं जनयतीति त्वदेकदेशिमते प्रथमोत्पन्नपरोक्षज्ञानस्याप्यप्रामाण्यं स्यात्। एतेन प्रमातारमपेक्ष्य देशतः कालतः स्व
भावतो वा विप्रकृष्टपदवपरोक्षज्ञाननियमात् स्वप्रकाशप्रमातृचैतन्याभिन्नत्वेनाविप्रकृष्टे ब्रह्मणि परोक्षधीरेव न तु क्तेति निरस्तं। प्रत्य
क्षेवह्नौ लिंगादपि अपरोक्षधीप्रसंगात्। अविप्रकृष्टपदार्थ अपरोक्षज्ञाननियमेन विप्रकृष्टत्वाभावस्यादावेंद्रियजन्यप्रत्यभिज्ञाया
स्यादित्यज्ञानस्यापि परोक्षत्वापातात्। तत्र संस्कारादेरेव सन्निकर्षत्वे अत्राप्यावरणकृतविप्रकर्षस्य वात्। वृत्तेरावरणनिवर्तकत्वेपि
तस्य दयात्प्राक् विप्रकर्षात्परावीनस्य चाविप्रकर्षस्य प्राचीनवृत्त्यापरोक्षेऽत्र तत्वात्। ननु कर्तृत्वादिरूपापरोक्षाध्यासस्य परोक्षे
प्रमयाऽ हितेः यतिघटेव ब्रह्मणि मानांतराप्रवृत्तेः शब्दादपरोक्षज्ञानानुत्पत्तावनिर्मोक्षः स्यादिति चेत्। न। तस्य ज्ञातविवर्तत

न्या॰ या॰ यातिरस्मात्तानिदिध्यासनसंस्कृतमनसा अपरोक्षधीसंभवाच्च। यन्मनसा न मनुत इत्यादिश्रुतिस्तु मनसैवानुद्रष्टव्यमित्यादिश्रुति
विरोधेनायस्कृतमनोविषया। मनसा तु विशुद्धेनेत्यादिश्रुतेः। अन्यथ शब्दस्य करणत्वेपि यतो वाचो निवर्त्तन्त इत्यादिश्रुतिबाधः स्यात्। मन
१५० सा नद्रष्टव्यमपरोक्षधीर्हि दृष्टिचेत्। न। योगजसाक्षात्कारदर्शनात्। शब्देनापि तद्दर्शनीच्च। मनसः कारणत्वे उक्तश्रुतेरिव शब्दस्य
तत्करणत्वे श्रुत्यादेरदर्शनाच्च। औपनिषदं पुरुषमित्यादि तु मनसः करणत्वेप्यौपनिषदनिदिध्यासनापेक्षत्वात्। तदुक्तं। श
ब्देनदेशपतेत्र्हेस्तत्र मानवदृश्यते। मनसा दृश्यते ब्रह्मैत्यत्र मानं नदृश्यत्वे तस्य त्वनस्मादिति तर्कोप्ययुक्तः। आपाद्यापदकयोरप्र
सिद्धाव्याप्त्यसिद्धेश्च। ठक्तंहि। कथं तस्य त्वमंतां वाच्यस्येति नचोद्यतां। अस्मंतावाच्यशब्देन लक्ष्यस्यैवावबोधनादिति चेन्न। वेदांतता
त्पर्यविषयत्वादिना रूपेणायङ्कीकरणात्। अन्यथा त्वदीयैः वाच्यत्वानुमानेपि पक्षो वाच्यो चेद्द्वितीयः। लक्ष्यश्चेद्दाग्रधासिद्धिरिति स्यात्।
अविवक्षप्रयोजकाभावस्तत्र प्रयोज्याभाव इति सामान्यव्याप्तिः ठक्ता वल्लक्ष्यत्वे वाच्यत्वस्यातंत्रतानेच्चेक्षुक्षीरमाधुर्यादेर्वाकार्य
व्यभिचारः। तस्यापि माधुर्यवाक्यादिस्यधारणशब्दवाच्यत्वात्। विशेषं क्षीरमाधुर्यस्येरमाज्ञ्यस्यतीन्हाणकं। गुडस्यपनसादीनां
निर्हारीत्यभिधीयत इत्युक्तत्वेनन्विताभिधानस्यान्यत्र समर्थितत्वेन चासाधारणशब्दवाच्यत्वाच्च। अभिहितान्वयपक्षेपि वाक्यार्थो नि
च्यते नापि लक्ष्यते किंतु अन्विताभिधाने विशेषात्वपरत्वशक्तिं विनैव संसर्गमर्यादया प्रतीयत इति नैर्विकल्पते वाक्यार्थे लक्ष्यत्वस्याप्य रम
भावाच्च। न च वाक्यार्थे... समासस्य समासत्वेन लक्षकत्वात्तन्न वावकतेति वाच्यं। समासस्य लक्षकत्वपक्षेपि राजपुरुष इत्यत्र पुरुषशब्दस्य १५०

ववाक्ते शब्दस्य बध्य[illegible]लक्षकत्वेपि अर्थ[illegible]शब्दस्य वाचकत्वात्। एतेन समासस्य वाक्यतुल्यत्वेनाभिहितान्वयेपि धानेविनैवत्वार्थबो
धकतेति निरस्तं। वाक्ये शब्दार्थशब्दयोर्यावर्थो तत्संसर्गस्य संसर्गरूपेण समासावाच्यत्वेपि अर्थत्वरूपेणार्थपदवाच्यत्वात्। ननु प्रवृत्ति
निमित्ताभावात्कथं वाच्यत्वं। उक्तं हि। दृष्टा गुणक्रिया जाति रूढयः शब्दहेतवः। तात्स्यन्यतमो मीमांसे नात्मा नाभिधीयत इति। न च घटा
[illegible]दिवारोपितं निमित्तमस्तीति शंक्यं। आरोपितेश्रुति तात्पर्यायोगेन तात्पर्यविषयस्य वाच्यत्वायोगादिति चेन्न। सत्यादिशब्दा
नां लक्षकत्वे सिद्धे निमित्ताभावः। तस्मिंश्च सिद्धे लक्षकत्वमित्यन्योन्याश्रयात्। स्वरूपमात्रप्रश्नोत्तरत्वेन तल्लक्षकत्वस्य च निरस्त
त्। निर्विशेषवाक्यस्य च स्वरूपमात्रपरत्वे सत्यत्वाद्यविरोधात्। तस्य निर्विशेषत्वविशिष्टपरत्वे तु निमित्तस्य वस्तुत्वे न निर्विशे
षशब्दवाच्यत्वापातात्। अभावनिमित्तकशब्दवाच्यत्वे वृत्तिगुणत्वभंगे उक्तरीत्या प्रामाणिकत्वाविशेषणाभावनिमित्तकशब्दवाच्य
त्वस्यापि दुरवीरत्वात्। तस्मात् ब्रह्मणि सर्वेषां वैदिकशब्दानां लक्षकतोत्येतदयुक्तं। उक्तं हि टीकायामपि च शब्दस्य गौणार्थस्वीकृता
सतां। महतीजायते लक्षणा यत्र तत्प्राखिल्यादरवा। अमुख्यार्थोऽस्तीति वदन यक्षस्यानां गोनुवर्तितां। कथं न जायते लक्षणा वक्तुं शा
ब्द[illegible]त्मनः[illegible]तस्माद्यौगिकानंतशब्दवाच्यत्वादनंतगुणं ब्रह्मज्ञानीवादि भिन्नमिति। अव[illegible]त्वभंगः। यद्यपि दमुच्यते। भे[illegible]
किं स्वरूपं धर्मोवा। [illegible]घः। निरपेक्षत्वाद्यापातात्। नांत्यः। अनवस्थाद्यापत्तेः। कुंभस्य स्तंभाद्भेदे प्रतीते स्तंभस्य कुंभाद्भेदधीरि[illegible]मा
न्याश्रय[illegible]यदंते वृत्तिः अवतदूमः। किं भेदप्रतीतिरवनास्तीत्युच्यते किंवा साकारणांतन्यानेति उत बाध्यविषयेति। नाद्यः। भेदप्रम

न्याया० शक्तार्थेन श्रवणाय योगात्। भेदाप्रतीतौ च द्वयत्वे सन्निरासायोगाच्च। स्वपरपक्षद्वयस्य लाभ लाभरूपत्वे भेदाप्रतीतौ च द्वयं विदलत्वात् पदे
१४१ प्तेभेदः स्वरूपं यस्य इति विकल्पायोगाच्च। नहि पर्यायता विकल्पाः संभवंति। द्वितीये कारणात्त्वं तत्कार्यत्वेन वा स्यात्। अकारणत्वे
नत्वेन वा। नाद्यः भेदप्रतीतेर्नित्यत्वापत्त्यास्व प्रातिकूल्याचरणार्थतात्। न द्वितीयः। व्याघातात्। ज्ञानस्यैव कारणत्वात्। तृतीये विविक्ति
ष्ठ। तर्केरेव भेदस्य बाध्यत्वाध्यवसायः श्रुत्यादिनावा। नाद्यः। एकस्याविद्याख्यस्वरूपत्वे तद्वदेव निरपेक्षत्वापातात्। धर्मत्वे अनवस्थेत्यादि तर्कबा
ध्यत्वसाम्यात्। द्वितीये वेदान्तानामभेदपर्यन्तरं शेवितुमिदं शास्त्रं प्रवृत्तं न तर्कशास्त्रवत्केवलाभियुक्तिभिः। किं विवक्षिंडास्त्रे साधयितुं दूषयितुं वा
प्रवृत्तेः रत्नस्य तत्त्वाच्च। एवं चाभेदः स्वरूपेण धर्मो वेत्यादिरूपा विभीषिका। अकारमात्रप्रक्षेपेस्या दभेदविभीषिका। भेदाभावाद न्यदेव न्या
स्तीति चेदेकाभावादन्यो भेदो नास्तीति समं। भेदद्रूषणेनैव कासिद्धि अभेदे काद्रूषणेनैव भेदसिद्धिः स्यात्। एवं चाभेदस्य खंडनेनैव परम
भेदः प्रसिध्यति। अभेदखंडनेनैव तर्हि भेदोविसिध्यतु। भेदस्य च द्रूष्योस्माकं न त्वभेदं साधयतीति चेत्। अभेदप्रवद्रूष्यो स्माकं न तु भे
दं साधयतीति समं गमस्वपक्षस्य जल्पादौ त्वयापि स्थाप्यत्वात् वितंडायां तु मयाप्यस्थाप्यत्वात्। न च वितंडात्वेवेति नियमः। सत्यपि प
क्षपरिग्रहे तत्वेव ममापि तत्र तदस्थापनेन वितंडाधिकारात्। अन्यथा तार्किकादेः शङ्कानिरासत्वादौ मीमांसकादिना सह वितंडानस्या
त्। उक्तं च। वितंडात्वसतामस्मैस्त त्वमेषु निगृहित मिति। पक्षपरिग्रहहीनस्य तु निर्मर्यादस्यापसिद्धान्तादिनिग्रहानर्हत्वान वितंडाप्राम राम
ण्याधिकारः। नाप्येवमिदं मम स्वपक्षस्थापितत्वात् वितंडैवेति नियमः त्वदिष्टानन्तुसारित्वात्प्रासंगिकानां उपनिषदां परपक्षनिरासमात्ररूपत्वा १४१

भावानुपपत्तिनिरासः [illegible] केन द्वितीयाध्याये नैव गतार्थत्वेन स्वपक्षसाधनार्थानामाद्याद्यध्यायानीवेष्वपर्याप्ततात्त्वाभावितं च तत्त्वयेवाद्यद्विती
ययोः संगतिं दर्शयता स्वपक्षस्थापने प्रथमं कृते तदुपस्थाहिते परपक्षप्रत्याख्यानादिति। नवास्मा यं प्रयाद्रूप्यमिति समवर्वंधे कथमिति चेत्।
नमयाविद्यानभिमतस्यास्याप्यत्वेन तत्त्वापिद्यानभिमतस्याद्रूप्यत्वेन तथा तद्वंधायोगात्। नवाभेदः स्याप्यः मयाद्रूप्य इति तद्वंधे कथमिति
चेत्। नवयेकं स्याप्यं मयाद्रूप्यमिति तद्वंधे कथं। तदापि श्रुत्यव्याघातके रेवत्वयापेक्षं रूप्यमिति चेत् भेदेपि तथेति न व्याघातके भेदद्रूप
र[illegible]श्रुत्यातिरिक्तमेवस्तमेव नास्तीति चेत्। घटाघटातिरिक्तो भेदो नास्तीति समं। श्रुतिविरोधादेकपद्रूपकास्त कौश्राभासा इति चेत्। प्रत्यक्ष
दिविरोधाद्भेदद्रूपका श्रपि तथेति समं। प्रत्यक्षं तर्कविरोधादप्रमाणं चेच्छ्रुतिरपि तद्विरोधादुपचरिता[illegible] इति समं। त्वन्मतेपि स्वस्य सापिन्न तो
द्भेदनिरासः स्वव्याहतिरिति चेत्। त्वन्मतेपि ब्रह्मणोनन्तापि त्वाद्भेदनिरासोपि स्वव्याहत इति समं। ब्रह्मणोनन्तादपि भेदो मिथ्येति चेत्।
ना। स्वस्यस्याभेदोपि मिथ्येति सुवचत्वात्। नहि सत्यमसत्येनापि मिथ्नेनेत्यकृत्रितो विचारसत्ये न सत्यमित्यक्रावधिकास्ति विरुद्धता। एवं वा
शुष्कतर्कैर्भेदबाधे स्याद्भेदोपि बाधितः प्रमितित्वान्नत्र तर्कस्य काष्ठायुक्ते तत्कृते न वकि। न द्वितीयः। प्रकृते साक्षिप्रत्यक्षाद्यबाधकत्वस्योक्तत्वात्
श्रुत्यादेः सम्यक्[illegible]आतत्वाद्वा प्रत्यक्षस्याविबाधशंकाभंगोऽत्र न्यायैर्भेदबाधकासंभवाद्वा। किंच [illegible] मानमपि बाधकं किं भेदमेव
[illegible]पत्तिं विविच्यात्वेवनतानायोगात्। नाद्यः। साधकत्वात्। द्वितीये तदन्यत्व द्वितीयो [illegible]दभावो वानत्र यो न्यायः प[illegible]
वरवत्ता उतामेद। [illegible]पत्तिं विविच्यात्वेवनताना योगात्। भेदाभाववदित्याहितापि प्रतियोगिविलक्षणत्वे यवत्वविषयस्य ग्राह्यत्वाद्वा
यपिदु[illegible]विरोधेः। तदनन्यत्वेन द्विरुद्धतदभाववत्वायोगात्।

[illegible]या० दासीदेव[illegible]तत्त्वस्य ह्रमितित्वानवदवाधकत्वात्। अत एव नतृतीयः। एतेन बाधकं भेदश्च माधिष्ठानतत्त्वगोचरमिति निरस्तं। तस्यापि भेदाभेद
१४२ भावे भेदविल[illegible]ग्रहणोच तत्त्वज्ञानस्य भेदर्बाधकत्वायोगात्। किं च। नायं भेद इति वा नास्त्यत्र भेद इति वा अन्यदेव भेदात्मना प्रत्यभादिति
वा बाधकज्ञानेन[illegible]यं नेदं रजतमित्यादिवत्तदेतत्सर्वथा भेदावगाहीति कथं तद्बाधकं। एक एवानेक[illegible]स्वनाप्रत्यभादिति ज्ञानेन बाध इ
मिति चेन्न। एकानेकयोर्वस्तुनोर्भेदाभावे वैलक्षण्याग्रहणो च तस्य बाधकत्वायोगात्। एवं चाभेदाभि[illegible]तत्वात्सर्वथा बाधधीर्गृह्यते न बाधो
ऽभेदः स्थिरीत्वेतु न साम्याद्भेद बाधिका। तस्मात् प्रविषयत्वात्सो न्याय्यपतारेरूपत्वान्नेतिस्थितमस्य च भवेदाभासत्वं। एतेन यदुक्तं खंडनानि
र्वचनवादिनीदं शोभते नास्माकं। प्रतिभासमानोऽयं भेदः स्वरूपादिविषयस्तत्तर्भावविवहिर्भावाभ्यां सदसत्त्वाभ्यां वा अन्योन्याविधर्मत्वा वा अनिर्वाच्य
ऽस्तं मीकारादिति तन्निरस्तं। तर्कबाधकमात्रेणानिर्वाच्यत्वे यत्कस्यापि तत्प्रसंगात्। किं चान्वयाप्यनतज्जडदुःखपरिच्छिन्नाद्यनात्मके ब्रह्मणि
अतदाकाराद्यावृत्तिर्ब्रह्मज्ञानाबाध्येति वाच्यं। पुन्याघनात्मके घटादौ ब्रह्मादितः स्वज्ञानाबाध्यभेददर्शनात्। अत्र न्यायात् तदाद्यावृत्तिबोधनेन त
[illegible]निवाकस्य सत्यज्ञानादिवाक्यस्याखंडार्थतरहेतुत्वस्यात्। ब्रह्मण्यनृतत्वादेरधिष्ठानज्ञानाबाध्यात्यंताभावप्रतियोगित्वरूपं मिथ्यात्वं द
नस्यात्। उक्तं चैतद्देहात्मैक्याध्यासभंगे। न च प्रतियोगिनो नृतत्वात्तत्त्व्यावृत्तिरप्यनृता। युक्तो ह्यन्यथा भेदवत्। बाधगम्यस्य तद्भेदस्यापि प्राति
भासिकत्वापत्त्याऽस्तिबाधकव्यवस्थायोगात्। विस्तृतं चैतन्मिथ्यात्वभंगे। एवमात्मनि देहादात्मज्ञानाबाध्यभेदाभावे देहात्मैक्यस्य मिथ्या राम
त्वं न स्यादिति तदीयतदे[illegible]ध्यासे त्रिरप्युक्तः स्यात्। तथा नित्यस्यानित्यान्नात्विकभेदाभावे साधनचतुष्टयांतर्गतो नित्यानित्यवस्तुविवेको १४२

भयः स्यादिति ते व्य[illegible]वहारेणेन [illegible]वित्ये प्रवृत्तिर[illegible]क्रमस्यात्। एवं प्रपंचे सद्विलक्षणादिरूपमनिर्वाच्यत्वमधिष्ठानसत्तानाबाध्यमिति वाच्यं। अन-
धिष्ठानसत्तानाबाध्यस्यापातात् तार्जगन्मिथ्यात्वप्रमाणानामतत्त्वावेदकत्वापातात्। एवमभेदस्य भेदात्तात्त्विकभेदाभावे तयोरभेदस्ता-
त्त्विकः स्यादिति भेदद्रोषे रभेदबाधने अभेदप्रमाणोर्भेदसाधनं च स्यात्। न च तात्त्विकभेदाभावे पि तात्त्विकाभेदाभावमात्रेणाव्यवस्थितिर्वाच्या।
अभेदाभावे भेदध्रौव्यात्। न च व्यावहारिकभेदादव्यवस्था। कल्पिते नाकल्पितकार्याप्रतिबंधादित्याक्रान्त्वात्। एवं चात्र ब्रह्मणो न ततो भेदः
[illegible]स्वं हेरखंडने व्याहतं स्याद सत्यस्वे दुब्रह्मणो न ततो भवेत्। भेदाभेदाभिदावे स्यात्कथं भेदो निवार्यते। भेदाभेदभिदा नो चेत्कथं भेदो निवा-
र्यते। किं चाभेदस्य व्यावहारिकसत्यत्वे स्वार्थमेव त्वयाप्यन्योन्याश्रयादिकमुद्धार्यं। तद्यन्योन्याश्रयादिदूषणव्यावहारिकतापि दृषत्करी। नहि
मरवास्तवीत्येतावता स्वजन्यघटजन्या। अन्यथा काशवाघादेरेवान्योन्याश्रयादानत्वाधिष्ठानत्वे स्यातामित्यतो न ब्रह्मणीस्तेन कल्प्यस्यातो
। यदि चान्योन्याश्रयादि दुष्टस्यापि अविद्यासामर्थ्यात् व्यावहारिकता तर्हि स्वरसामर्थ्यात् तादृशस्यापि पारमार्थिकत्वेवास्तु। अपि च [illegible]
मत्रापादनक्रमः। यदि भेददर्शनं स्यात् तर्ह्यन्योन्याश्रयादिकं स्यात् न च तथाक्रं तस्मात्तास्ति भेददर्शनमिति वा। यदि भेददर्शनं वास्तवं स्या-
त्तर्ह्यन्योन्याश्रयादि[illegible]कं स्यादिति वा। यदि भेददर्शनं प्रमा स्यात्तर्ह्यन्योन्याश्रयादिकं स्यादिति वा यदि भे[illegible]दर्शनं धर्मिप्रतियोग्यादिसापेक्षं स्या-
त्तदान्योन्याश्र[illegible]यादिकं स्यादिति वा। नाद्यः। यदि भेददर्शनं न स्यात्तदापरं परमतमिव स्वमतम[illegible]पि निराकुर्यात्। सकलव्यवहा-
रविध्वंसप्रसङ्गादित्यादिप्रतिकूलतर्कपराहतेर्भेददर्शनेन तत्प्रतिरासायोगेन विपर्ययापर्यवसानाच्चानन्द्वितीयः। वास्तवेऽन्योन्याश्रयादेरभा-

[illegible]१० वेनेच्याप्तिर्व[illegible]कल्पन[illegible]द्दर्शनावास्तवत्वेपि अभेदवद्भेदस्यापि सत्वोपपत्तेश्च । न तृतीयः । त्वया[illegible]भातत्वं[illegible] भेदप्रतीतौ कुं भातत्व[illegible]भस्य भेदबुद्धी
रितिप्रतीतावेवान्यो[illegible]श्रयप्रसंगोक्तत्वेन चोराचराधान्तोऽध्यस्य मूलप्राप्तिवत् प्रतीतिगतेनान्योन्याश्र[illegible]प्रमात्वनिर्वाधावोगात् त[illegible]
१५२ प्रतीतेर्विचारासह[illegible] भ्रमत्वे । विचारासहत्वं चोत्तमेंत चरमवृत्तिवत् प्रमात्वोपपत्तेः । जीवस्य ब्र[illegible]प्रतीतौ ब्रह्मणो जीवे कार्यत्वं इति
कल्प्यतो त्वाश्रयस्य वक्ष्यमाणत्वाच्च । रूप्यादिभ्रमस्यापि त्वयाप्यत्वातिवाधकत्वे हेत्वभावादिवाधकानामुद्भूतत्वे न विचारसहत्वाद्भेद
हर्षेविसापेक्षतामात्रे निवर्त्ततो भेददर्शनस्य च कि मायातेः प्रकारान्तराभावात् स्वयमपि निवर्त्तते इति चेन्न । प्रतीतेः परेणाप्यपेक्षतीयत्वेन नि
वर्त्तयितुमशक्यत्वात् । प्रमात्वनिवर्त्तनेवसामर्थ्याभावस्योक्तत्वात् । अन्यथा स्वाभिमताद्वैतमपि न सिध्येदित्युक्तं । किंचातत्पत्ते घटस्य
पटाद्भेदद्वयघटे नाभेदो मिथ्याव्यवहारिकः उक्तरीत्या ब्रह्मजीवेक्यमिवानृतत्वावृत्तिस्थिरपितात्विकं[illegible]कथमभेदमुपेत्य भेदे द्वेषः । एवं
[illegible]ह्मण्यपनतभेदस्य सत्यत्वे क ल शेषत्वतः अभेदस्य मिथ्यात्वे भेदे द्वेषस्य किंकृतः मायामात्रतो भेदखंडनोद्गारः । संभवति च भेदस्य स्व
रूपत्वे न निर्वाहः । तत्र यदुक्तं निरपेक्षघटस्वरूपत्वे तद्वदेव भेदस्यापि निरपेक्षत्वं स्यादिति तन्न । व्याप्तेः स्वपराभिमतेः । त्वन्मते सापेक्षताया
अविद्यानिवृत्तेर्जीवब्रह्मैक्यस्य मतद्वयेपि स्थितौ व्याप्तिः सापेक्षस्य ज्ञातिमात्रस्य प्रतीतौ सापेक्षस्य नीलतरत्वादिजातिविशेषस्य अ
र्थप्रकाशात्मकता[illegible]स्य ब्रह्मणो ब्रह्माभेदस्यापि ब्रह्मत्वादौ कालसापेक्षस्यापि त्वस्य च निरपेक्षब्रह्मव्यक्त्यादिस्वरूपत्वात् त्वयास्यभा राम
वेचानुमानस्यतर्द[illegible]सवाभा[illegible]त्वात् । ऐक्यस्य स्वरूपत्वेवसत्वेद्वैतहानिः । मिथ्यात्वे च तत्परस्यतत्त्वमसीत्यादेरतत्त्वावेदकत्वं भेदस्य

परस्पराच स्यात् । यत्र [य]दध्यस्तं [त]त्र तद्भिन्नोधि[ष्ठान]ज्ञानाबाध्यं यथा शुक्त्यादिरूप्यत्वमिति वा यत्र यदेकाध्यस्तं तत्र तद्भेदस्तज्ज्ञानाबाध्यो
यथाहंकारस्येव नस्य [चैत]न्यभेद इति वा यत्र यदध्यस्तं तत्र तद्भिन्नोधिष्ठानात्त्विकं यथा ब्रह्मत्वं न तत्तत्स्याध्यस्तत्वे सत्यत्वेनातात्त्विकमिति वा प्रेः । ये
क्यस्य च निरपेक्षत्वे तत्त्वंपदार्थपराणां सत्यज्ञाने विज्ञानघनेत्यादीनामेकपरमहावाक्यैकवाक्यत्वाभावेन वैयर्थ्यं स्यात् । न च प्रतियो
[...]कभेदस्य सापेक्षत्वादेवं सापेक्षत्वमिति वाच्यं । घटः पटो नेति नत्रर्थस्य भेदस्यैव तादात्म्यनिषेधनेनैवोपरीत्यस्यैवोचितत्वात् । एकाभे
दे[...]पेक्षत्वस्य दुर्वारत्वाच्च । अथ तत्र प्रतीत्योरेव सापेक्षत्वनिरपेक्षत्वे इति तयोरेव भेदः न तु तद्विषयस्य । एकस्यामेव तत्त्वायां संख्या
र सापेक्षनिरपेक्षस्य त्वनुभवविषयत्वस्य एकस्मिन्नेवाग्न्यादौ व्याप्त्यादिधी सापेक्षनिरपेक्षत्वा[नु]भूति प्रत्यक्षविषयत्वाद्दृष्टदर्शना
दिति चेन्न । समे प्रकृतेपि । एवं च अज्ञानहानिवन्न ब्रह्मरूपधीवद्भेदवत् । स्वरूपत्वेपि भेदस्य सापेक्षत्वं हि युज्यते । अथ तत्र स्वरू
पेण निरपेक्षस्यापि ब्रह्मणः अभेदत्वेन सापेक्षत्वं तर्हि स्वरूपेण निरपेक्षस्यापि घटस्य भेदत्वेन सापेक्षत्वमस्तु । प्रमेयत्वादिना निरू
पेक्षस्याप्यभावसादृश्यादेरभावत्वादिना सापेक्षत्वस्य स्वरूपेण निरपेक्षस्यापीदंमादेर्ब्रह्मणश्च [का]रणत्वेन ज्ञानत्वेन च सापेक्षत्वस्य
द[र्श]नात् । सप्रति[योगिकत्व]निरुक्तियोगिकव्यवस्था तु यदसाधारणेन स्ववाचकपदप्रवृत्तिनिमित्ते[न रू]पे[णा]वच्छिन्नेन प्रतीतौ प्रतियोगिप्र
ती सापेक्षं तत्सप्रतियोगिकं अन्यत्तु निष्प्रतियोगिकमिति । यदि च तत्रैकस्यैवार्थस्य सत्त्वस्य तत्त्वकठिनत्वा[ज्ञा]नोल्लेखेन निरपेक्षस्यापि प्र
गुरु[...]त्वशब्दोल्लेखेन सापेक्षत्ववत् ब्रह्मशब्दोल्लेखेन निरपेक्षस्याप्यभेदशब्दोल्लेखेन सापेक्षत्वं तर्हीहापि घट[श]ब्दोल्लेखेन

[illegible]रा० ष्टिरपे [illegible]ापि [illegible]दशङ्गो ल्लेखे न सापेक्षत्वमस्तु । एकस्यैव गमनस्य गच्छतिचलति शङ्खो [illegible]लिखाम्यो प्रयत्नस्य च करोति प्रयतते [illegible]ति शङ्खोल्ले
खाभ्यां कर्म [illegible]सापेक्ष [illegible] निरपेक्षत्वयोः शब्द स्वभावप्रयुक्तयोर्दर्शनात् । यदि च तत्राभेदत्वा [illegible]देकमेव सापेक्षं न त्वभेदरूपो विशिष्य स्ता [illegible]
१४४ वाप्यन्योन्याभा [illegible] रूपभेदत्वमेव सापेक्षं न तु भेदरूपो विशिष्यत इति समं । न च तर्ह्यन्योन्याभाव [illegible] व भेदोऽस्त्विति वाच्यं । अन्योन्या [illegible] भा
वस्यैव स्वरूपत्वोक्तेः । उक्तं हि । भावाभावस्वरूपत्वान्नान्योन्याभावता पृथगिति । उक्तं च । न स्वरूपमात्रं भेदः । किं त्वन्योन्याभावः स च वस्तुन्ना
सति शेषाभिन्न इति । कथमभावस्य भावैक्यमिति चेत् । अविद्यानिवृत्त्यद्वैतयोरपि कथं ब्रह्मैक्यं । भावः स्वाभावेन विरुद्धो न त्वन्याभावे
नेति चेत् स एव प्रष्टव्योपि । अभावाभावस्य भावत्वदर्शनात् । यदि वाविद्यानिवृत्तेर्ब्रह्मत्वं नाम प्राभाकरमतं न वाधिकरणस्यैव निवृत्ति
व्यवहारालंबनता तर्हीहापि परस्यैवान्योन्याभावव्यवहारालंबनतेत्यस्तु । यदि वाद्वैतेनन्द्वैताभा [illegible]किं तु तद्विरोधिभावांतरं द्वैताभावोप
[illegible]क्षितं ब्रह्मेव वा तर्हि भेदोपि न तादात्म्याभावः किं तु तद्विरोधिभावांतरं तदभावोपलक्षितं स्वरूपमेव वास्तु । केचित्तु तत्तादात्म्यायोग
[illegible] वा तदभेदधीव्यवहारविरोधित्वं वा न भेदत्वं पत्रयदर्शनं पत्रादात्म्याध्यासविरोधितत्तत्वं वा न भेदत्वमित्याहुः । इतरे तु स्वप्रति
पत्तिं विरुद्धर्मानाधारत्वरूपं वा स्वाश्रित्त्रि धर्माधारानिष्ठधर्माधारत्वरूपं वा स्वरूपत्वं भेदत्वं । अनाधारत्वं
वाधारत्वराहित्यं न [illegible]वाधारान्यत्वे इति नान्योन्याश्रय इत्याहुः । एतेन प्रतियोगिनिरूप्यस्य भेदस्य वस्तुस्वरूपत्वे प्रतियोगिनोपि वस्तुस्व राम
रूपत्वं स्यादिति निर [illegible]स्याद्यः वयमसम [illegible] । उक्तनिवृत्तेस्तु समर्थत्वेपि दोषाभावस्य साधकत्वप्रयोजकत्वेपि अन्यतव्याहतत्वानादिप्र [illegible]१४

...रूपत्वानस्य च ब्रह्मस्वरू[पत्वे]पि अज्ञान[नि]वृत्तेर्मोक्षत्वेपि दुःखदोषेन तेज्ञानेन च पुमर्थत्वस्य साधकत्वप्रयोगजनकत्वस्य ब्रह्मस्वरू
पत्वस्य मोक्षत्वस्य वादर्शनात्। न चाज्ञानादिकं कार्यान्वयित्वेनोपलक्षणं सन्निरूपकमात्रं न तु कार्यान्वयित्वेन विशेषणमिति वे
त्संप्रज्ञते। लोके विनिरूपके लंबकर्तामानयेत्यादौ कार्यान्वयस्यैव चित्रगुमानय काशीवासी समागत इत्यादौ तदन्वयस्यापि दर्श
नात्। न च व्याप्तिग्रहरोऽनुसृता लौकिकी रीतिर्विभिचारेनानुसरणीया न च कर्मस्य कार्यान्वयदर्शने तद्भगवामपितदापादनं वैपरीत्याप
...अज्ञानादेर्ब्रह्मस्वरूपत्वापत्तेश्च। ननु प्रतियोगिन उपलक्षणत्वे कदाचित्काज्ञानेपि ग्रहज्ञाने ... तत्प्रतियोग्यज्ञानेपि भेदज्ञान
स्यादिति चेत्। न सर्वज्ञानापन्नानेपि कदाचित्त्रिवृत्यादिज्ञानेस्यात्। अथोपलक्षणस्यापि प्रतियो...दे ज्ञानमुपलक्षणाभावसादृश्यादि
ज्ञानकारणं हृष्टमित्यदोषः इति चेत्। समं प्रकृतेपि। तस्मात्प्रतियोगिन उपलक्षणत्वात्तद्धर्मित्वं तद्भावः। एवं च पुरुषार्थदुःखमपि वक्त
ल्लक्षणत्वानवत्तथा। योऽसौ चमोह्वत्तांतर्गतं कुंभादिकं पटे। तदस्यत्वेपि कुंभादेरप्रतीतौ न भेदधीः। अज्ञानादेरप्रतीतौ तद्धान्याय प्रतीति
वत्। केचित्तु प्रतियोगिनो विशेषणत्वेपि न दोषः। शाखो नित्यदुरत्यादोषाद्वन्द्वादेखिल कार्यानन्वये... विशेषणत्वोपपत्तेरित्याहुः। ननु त
...पि विदारणा...दस्य घटस्वरूपत्वे घटस्यापि विदारणापत्तेः। एवं तदवयवानामपीति परमाणुरा... नेकरतिषु न्यतापत्तिरिति...त
न्। अविदारणात्म...भेदस्य ब्रह्मस्वरूपत्वे पारमार्थिकस्य ब्रह्मणो व्यावहारिकेन घटादिना प्रातिभासिकेन रूप्यादिना भे...
न...विदारणे तेदेवं स्यादिति साम्प्रतम्। यदि च तत्र जीवाभेद एव ब्रह्मस्वरूपं न तु ... भेदः तर्हि तत्रापि घटादि भेद एव घटे

स्तं…स्या दितिसमीयवं च विदारकत्वेपि घटादुस्य स्याद्विदारकत्वं न तु स्वतो यथा…त्वेनैव न घटेरणां तु किंच। भेदस्य…स्याद्विदा
०
रकत्वेपि अव…यवा…भागेनस्य स्यत्वमेव स्यात् न तु भूम्यत्वं। नहि भूम्यानां संयोगात…स्य चित्र…येन अवयवानां विभागे घट
१४५ परिशेषः स्यात्।…च। विदारकमपि त्वद्वित्रादि स्वयं यत्संबंधितदेव विदारयति न तु स्वात्मानं…धर्मभेदवादे कथं विदेवं…
व्यं न तु स्वरूपभेदवादे। वस्तुतस्तु भेदो न विदारकः किंतु विदारकत्वाभावसाधनत्वात् भेदशब्दस्य। तथा च घटोपि विदारकं स्यात्तदुप
टस्य। नहि विदारकत्वस्य विदारकत्वं स्ववृत्तिविरोधात्। एवं च। विदारकत्वस्य भेदस्य घटत्वे हि घटोपि च। विदारकं स्यात् घटस्य स्वस्मिन्वृ
त्तितः। अंत्ति कृत्यवेदमुदितं वस्तुतस्तु न विभागरूपविदारकत्वात्मा भेदः किंत्वन्योन्याभावः। क्रियावाचित्वमाख्यातुः एवेकार्थः प्रदर्श
ते। प्रयोगतो नुगंतव्या अनेकार्था हि धातव इति वचनेन भिदेर्विभागोन्यत्वं चार्थौ यतः। अन्यथा सं…कुयोरोष योर्भिन्नाविति व्यवहारो न
स्या…उक्तं च। भेदस्य च स्वरूपत्वे ये वदंति वपून्यंतो। अभुता स्ते यतोन्यस्य प्रतियोगित्वमिष्यते। प्रतियोगिनो हि भेदोयं न तु स्वस्
…र्थ च न विभागे नात्यंतेव स्यात्कुतः एव च भून्यता। नभून्यानां हि संयोगाभावो वस्तु न दृष्यते। विदारकार्थो धातुश्च विभाग गुणाश्रा
पकः। अविदारको पि ह्यास्य स्य भिन्नावोषो तु तस्य हीति। यतेनानेकत्वे कार्ये समवायि नो भेदस्य घटस्वरूपत्वे घटस्यान्यानेकत्वं रा
स्यान्न तथा तदवयवानामपीति तद्विरुद्धमेकत्वं क्वापि न स्यात्। एकत्वाभावे चानेकत्वमपि न भवेत् यथाव संख्या हि तस्य द्रयस्य
…यत्रितिनिरस्तं। एकत्वे कार्थे समवायि नो घटे न यटाभेदस्य घटस्वरूपत्वे घटस्य पटे न सह अविभक्ताना वाध्यमनेकत्वं ब्रह्म

र्विवक्ष्या भेदस्य अनेकस्वरूपत्वे मताद्वैतमते अ[illegible]णाः अभावे न सहानेकत्वं न स्यादिति साम्प्रतं । अथ स्वेनैकत्वेप्यन्येन सहानेकत्वं न विरुद्धं तर्हि
अन्येन सहानेकत्वेपि स्वेनैकत्वमविरुद्धमिति समं किंच । भेदस्य सादृश्यादिवदन्यनिरूप्यस्यैकमात्रवृत्तिकत्वादनेकत्वैकार्थसमवायित्वमसि
द्धं । अपि च भेदस्यानेकत्वैकार्थसमवायित्वेपि पटभेदात्मको घटस्तस्यानेकत्वं स्यात् न तु घटस्यैकत्वं चानेकत्ववत्त्वे नैकत्वाभाववत्त्वं पुन
स्तेनानेकत्वाभावं वदतो न पूर्वोत्तरविरोधः । न ह्यत्र काप्यस्मद्रीतिरस्तीत्युक्तं येन परारीत्यापादनमिति निस्तारः स्यात् । एतेन भेदस्य धर्मि
स्वरूपत्वे संशयादिकं न स्यात् । धर्मिज्ञानस्य संशयादिहेतुत्वात् । तज्ज्ञानेनैव तदभिन्नस्य भेदस्य ग्रहणात् भेदज्ञानस्य च संशयादिविरोधित्वा
दिति निरस्तं । प्रत्यक्चैतन्ये स्वयं भातेपि तदभिन्नस्यैकस्यानवच्छिन्नानंदस्य चाप्रकाशवत् धर्मिप्र[illegible]प्रकाशेपि तदभिन्नस्य भेदस्याप्रका
शोपपत्तेः । ऐक्यस्य च प्रकाशे तत्र विप्रतिपत्तिर्न स्यात् । उपदेशानर्थक्यं च स्यात् । न च स्वरूपज्ञानेनैवैक्यस्य स्वतो भानेपि अज्ञानादिदोषा
स्यावृत्तेरभावात् विप्रतिपत्त्यादीति वाच्यं । प्रत्यगर्थवदेव तत्प्रभावेपि स्वतो भानेनैवैक्येपि विप्रतिपत्त्याद्ययोगात् । यदि चैक्यस्याविद्या
वरत्वादप्रकाशः तर्हि भेदस्यापि सादृश्यादिदोषादप्रकाश इति समं । एवं च स्वरूपत्वेपि भेदस्य युज्यते संशयादिकं । स्वप्रभप्रत्यगात्म
न्येप्यभेदे संशया[illegible]त् । किंच । भेदः स्वरूपेण प्रकाशत एव तु रूपेण भेदत्वेन तु न प्रकाशते भेदत्वेन भेदज्ञानमेव च संशयादिवि
रोधि संशयस्थ[illegible]पि[illegible]स्य भेदत्वेनाप्रतीतिरसिद्धा । प्रायः सर्वतो भिन्नमेव हि वस्तुतत्वं प्रतीयते अन्यथा सर्वकोटिकः संशयः स्यात् ।
किंतु [illegible]प्रतियोगिकत्वघटप्रतियोगिकत्वमित्यादयोनेके धर्माः संति तत्र सादृश्यादिवशात् यत्प्रतियोगिकत्वं न भाति तत्र संशयः । न च

ना विल[...]भे[...]न निरूप्य भेदः। एकघटनिरूप्ययोः प्रागभावध्वंसयोर्भेददर्शनात्। अनेकविषयनिरूप्यस्यापीश्वरज्ञानादेरेकत्वेन निरू-
पणस्याद्वैतस्यैव दर्शना[..]च्च। केचित्तु स्वरूपभेदवादे भेदज्ञानेन भ्रमविरोधित्वं किं त्वधिष्ठाने आरोप्यविरुद्धधर्मादिज्ञानमित्याहुः। [..]चि-
२४२ न्त्यदोषमूलत्वा[..]प्रतीतौ प्रतीतिः स्वरूपभेदत्वस्यापि युक्तेः। युक्त्यात्मत्वेनाप्रतीतिश्च दोषमूलेति नातिव्याप्तिः। एवं च भ्रमप्र[..]
ताद्रूप्येणाप्रतीत्यभावाद्भेदभ्रमोपपत्तिरित्याहुः। एवं च। सापेक्षत्वात्सावधेश्च तत्त्वे द्वैतप्रसंगतः। एकाभावाद्संदेहान्न रूपं वस्तु-
नोभिदेति श्लोकः। सापेक्षत्वात्सावधेश्च तत्त्वे द्वैतप्रसंगतः। नैकाभावादसंदेहान्न रूपं वस्तुनोऽभिदेति पठनीयः। एतेन भेदस्य घटस्वरू-
पत्वे घटभेदयोरेकतरपरिशेषः स्यादिति निरस्तं। एकास्यानंदस्य ज्ञानस्य च ब्रह्मस्वरूपत्वेऽप्येकतरपरिशेषः स्यादिति साम्यात्। न च वस्तुतो भे-
दाभावादिष्टापत्तिरिति चेत्समं प्रकृतेऽपि। तथा हि। एकतरपरिशेषः स्यादिति कोऽर्थः। किं वस्तुभेदो न [..]त्। किं त्वेकमेव स्यादिति वा किं वा
घट इति दा भेद इति वा व्यवहारः स्यात् न तूभयथेति। यद्वैतयोरेकस्यैवार्थक्रिया स्यात् नोभयार्थक्रियेति। अथ वा द्विवचनप्रयोगो न
[..]दिति। नाद्यः। इष्टापत्तेः। न द्वितीयः। प्रवृत्तिनिमित्तभेदेन तदुपपत्तेः। न तृतीयः। एकत्रैव दीपे युक्तभास्वररूपोष्णस्पर्शावच्छे-
न प्रकाशदाहरूपार्थक्रियावदेकत्रैव घटत्वभेदत्वावच्छेदेन तदुपपत्तेः। न चतुर्थः। प्रकाशात्मकत्वनिरूपाधिकेष्टत्वरूपयोर्ज्ञान-
त्वानंदत्वरूपविशेषणयोरनेकत्वेन विज्ञानानंदावितिवदिहापि घटत्वभेदत्वयोरनेकत्वेन तदुपपत्तेः। एतेन भेदस्य स्वरूपत्वे
[..]भेदशब्दयोः पर्यायत्वं स्यादिति निरस्तं। एकब्रह्मशब्दयोः पर्यायत्वं स्यादिति साम्यात्। [..]दितत्रैकार्थपर्यवसानेऽपि युक्तरूपटस्या

वि[illegible]त्तिनिमित्तानेकत्वाद[illegible]पर्यायत्वं तर्हि [illegible]कृतेपि समं । यतेन [illegible]दस्य स्वरूपत्वे अस्य भेद[illegible]इदं भिन्नमिति संबंधित्वेन धीने स्यात् । प्र
तीतयटो भेद इति धीः स्यादिति निरस्तं । जीवब्रह्मणोरैक्यं आनंदो ब्रह्मणा इत्यादिवदुपपन्नं ॥ नहि यदेकं ब्रह्मेति वदेदैक्यं ब्रह्मोत्पत्तिर्जीव
ब्रह्मणोरैक्यमिति व्यपदेशमात्रमिति चेत्तन्न । मात्रशब्देन किमर्थो निषिध्यते व्यवहारस्य बाधितत्वं वाव्यवहारनिमित्तं वा । आद्ये वि
[illegible]ब्रह्मस्वरूपं निषिध्यते येकं ठात् संबंधो वा । नाद्यः । निराश्रयस्यैकस्यानिर्वाहात् । निर्वाहे वा ब्रह्माद्वैते भूम्नाद्वैते पर्यवस्यत् । न द्विती
।।[illegible]त्वनायातात् । न ह्यु[illegible]भयोदासीनत्वसिद्धिः । उभयात्मकत्वं वत्वस्याविद्याहतत्वात् । न तृतीये येकस्यान्यसंबंधित्वं वा भेदः भेद
ादिवत्स्वातं संवास्यादिति प्रत्यक् ब्रह्मैक्यासिद्धिः । येकमात्रस्य मन्यते पि सत्वे न सिद्धसाधन[illegible]ऐक्यं वस्यात् । न द्वितीयः । अकारीत्या
अर्थोबाधे न व्यवहारवाधायोगात् । न तृतीयः । निमित्ताभावे कार्यासंभवात् । [illegible] भेदाख्यनिमित्ताभावात् व्यपदेशमात्रत्वोक्तिरिति चे
त्प्रपवादिशेषकृतेपि तथास्तु । एवं च अपर्यायत्वे कृतत्पपरिशेष्यता । अभेदस्यैव भेदस्य स्वरूपत्वेपि संगतां । तत्र गत्यंतराभावे दैक्य
स्य स्वरूपत्वं सिद्धमिति पर्यायत्वादिकं कथं चित्रिवार्यमिति चेत् । इहापि धर्मपक्षस्य त्वयैव दूषितत्वेन पृथक्त्वा [illegible]न्याभावे वेत्त[illegible]
भेदवादेपि पृथ[illegible]वं ततः स्वरूपभेदस्यांगीकरणीयत्वेन गत्यंतराभावात् । तथा भेदस्य घटो घटात्म[illegible]केनेत्यप्रतीते । घटः पदात्मके
नेत्येकत्वप्रतीतिस्तत्र च[illegible]तादात्म्यनिषेधरूपस्य भेदस्य[illegible]न घट इति वत्त घटसामानाधिकरण्येनाभेदस्यैव भानेन प्रत्ययत्वात् तथाप[illegible]तिइ
दं[illegible]स्यप्रतीता विनरस्यनियमेन प्रतीयमानत्वादिलिंगात् । [illegible]भेदस्तु वस्तुनो स्वरूपं मात्रसंशयरत्या [illegible]मात्र भेदस्य स्वरूपं त्वेपि

न्या [illegible] ठो [illegible] यदा [illegible] दस्य घटस्वरूपत्वे तु उपस्य घटस्वरूपत्वाभावाभस्यपट [illegible] भेदो न स्यादिति युक्तं । अभेदस्य ब्रह्मस्वरूपत्वे घटतद्भयोर्ब्रह्मरूपत्वात्
पटस्याभेदो न स्यादिति मा [illegible] स्यात् । यदि तु ब्रह्माभेदो ब्रह्मस्वरूपं घटाघभेस्तु तत्स्वरूपं तर्हि पटप्रतियोगिको भेदो घटधर्मिक एव घटस्वरूपं
१४७ घटादिधर्मिकस्तु [illegible] रूपमिति समं । यद्यपि घटकुड्यादिरूपाः पटभेदाः स्वरूपेणाननुगतास्तथाप्यनेकेषु घटत्वानेकत्वादि बुद्धिविषय [illegible] त्व
रूपेणैवेहापि पटप्रतियोगिकत्वस्य पटैक्यव्यवहारविरोधित्वादेर्वानुगमात् पटभिन्नमिति व्यवहारानुगमः । एतेन भेदो यदि स्वं [illegible] मस्याभिन्न
मिति वा अस्याममुष्माद्भेद इति वा धर्मिप्रतियोगिघटितत्वेन गृह्येत तदा धर्मिप्रतियोगिज्ञाने सति भेदज्ञानं अस्मादमुष्मादिति विकल्पेन धर्मि
प्रतियोगिज्ञानेन च भेदज्ञाने सतीतरेतराश्रयः । यदि तु घटपटौ भिन्नाविति घटपटविशेषणतया घटपटयोर्भेद इति तद्विशेष्यतयावगम्ये
तत्रापि घटपटप्रतीतौ तद्विशेषणत्वादिना भेदप्रतीतिः भेदप्रतीतौ च तद्विशेषणत्वावच्छिन्नघटपटप्रती [illegible] रित्यन्योन्याश्रय एवेति निरस्तं । भेदस्य
स्वरूपत्वे स्वरूपप्रतीतेरेव भेदधीत्वेन धीद्वयाभावात् । भासमानं हि वस्त्विदं न सर्वात्मकं किं तु स्वरूपमेवेति सामान्यतः सर्वतो व्यावृत्त
[illegible] यते । अन्यथेदं सर्वात्मकमेवेति विपर्ययादि स्यात् । न च सार्वज्ञापत्तिर्दोषः । सामान्यतः सर्वज्ञानस्य प्रामाण्यान्मात्रवृत्तित्वात् । अन्यथा [illegible] वा
पसंहारवती व्याप्तिर्न सिध्येदिति सर्वानुमानतत्केच्छिदः स्यात् । सर्वशब्दप्रयोगादिकं च न स्यात् । सर्वं खल्विदं ब्रह्मेति वा कार्यधीश्च न स्यात् । ननु राम
यद्यपि भेदो धर्मिस्वरूपमिति न तदपेक्षयान्योन्याश्रयः तथापि प्रतियोगिस्वरूपं नेति तदपेक्षयान्योन्याश्रय इति चेन्न । विद्यमानभेदस्य तद्वेद्येना
[illegible] स्वरूपप्रतीतिमात्रेण प्रतियोगित्वबुद्ध्युपपत्तेः । न हि सामान्यतः सर्वस्मिन्प्रतीतेऽपि तस्य पुरोवर्तिना भेदाग्रहेण पुरोवर्तिनः सामान्यतः सर्व

...ग्रहो दृष्टः। किंचास्तीदमपि अत्र साक्षिसि... नकालेन सहैव वस्तुनः रवन ज्ञानामीत्यत्र साक्षिसिद्धे न विषये तासहैवाज्ञानस्यैव सर्वं खल्व
दं ब्रह्मेत्यत्र सर्वे तासहै वाभेदस्यैव चेहापि साक्षिसिद्धेन प्रतियोगिना सहैवाबाधित्प्रतीतेर्नान्योन्याश्रयः। उक्तं हि। सर्वं सामान्यतो यस्मात्सर्वैरप्य
नुभूयते। तस्माद्याव‍त्त्रतासर्वैः। सर्वस्मादनुभूयत इति सर्वस्मादित्यनेन च तदात्मकत्वेनाज्ञातं सर्वं विवक्ष्यते। यथा सर्वं खल्विदं ब्रह्मेत्यत्र ब्रह्मात्म
...त्वेनाज्ञातं सर्वमिति न कश्चिद्दोषः। ननु तथापि विशिष्टभेदप्रतीतो सत्तं भातुं भस्यभेदसिद्धौ कुभातत्वं भस्य भेदसिद्धिरित्यन्योन्याश्रयः। धर्मि
णः ... भेदेन प्रतीतस्यैव प्रतियोगित्वात्। अप्रतीतभेदस्य प्रतियोगित्वे तु स्वस्यापि तत्स्यादिति चेत्। नात्वन्मतेपि विंवादेः प्रतिविंवादिनाद्
ह्मणश्च ब्रह्मणा जीवेन वा भेदोपीदमनेनाभिन्नमिति वा। अस्मात्युष्मादभेद इति वा इमे अभिन्ने इति वा अ... भेद इति वा प्रत्येतव्यः। धर्मिप्रतियोगि
भावधीः द्विलावधिं च धीश्च भेदज्ञानाधीनेति तद्विरूद्धाभेदज्ञानानुपपत्तिरिति साम्यात्। यदि च तत्राभेदं प्रतिप्रतियाग्यादिधीर्न भेदज्ञाना
धीना विरोधात् तर्हीहापि भेदं प्रतिप्रतियोग्यादिधीरपि तभेदज्ञानाधीनाऽसंभावात्। अनयोरिति द्वित्वधीः इदमस्माद्भिन्नमित्यव...व
धिमत्वधीश्च अपेक्षाबुध्यादिस्वसामाग्रीतः न तु भेदज्ञानात्। न ह्यवधित्वादेर्भेदवकस्पता न नियमेन भेदज्ञानाधीनं। भेदकज्ञानानेतरम
पि भेदधीदर्शनात् ...वधित्वाद्यवछेदक नीलत्वादिधीमात्रेणा तत्संभवाच्च। अन्यथा जीवस्य ब्रह्मणा भेदे ज्ञाते ब्रह्मणा जीवाभेदधीरिति वाच्यं स्यो
न्याश्रयः। धर्मि...सहाभे...न प्रतीतस्यैवाभेदप्रतियोगित्वात्। अप्रतीताभेदस्य प्रतियोगित्वे तु दहनस्यापि तुहिनाभेदप्रतियोगित्वं स्यात्। ...त्वे
मसी ...त्वं...दवाच्यस्य विशिष्टस्य च तत्स्यादिति समं। तत्र विषयमानाभेदस्यासति प्रतिबंधके अभेदयोग्यत्वादिरूपेण प्रतीतिर्नु भेदं धीहे...

न्या॰ आ॰ भेद[illegible]दर्शनः प्रतिबंधकइतिनाभेदधीरितिचेन्न। अत्रापिस्वरूपभेदपक्षेवक्तव्यतोन्योन्यप्रतियोगिकयोर्घटपटस्वरूपभेदयोरन्योन्यप्रतियोगि

१८८ त्वयोग्यघटपट[illegible]त्वादिरूपेणाप्रतीतयोरसतिप्रतिबंधके अन्योन्यप्रतियोगितयाविशिष्टधीः। धर्मिभेदपक्षेपिविद्यमानभेदस्यासतिप्रतिबं[illegible]क

भेदयोग्यनीलत्वपी[illegible]दिरूपेणाप्रतीतिर्भेदधीहेतुः इत्यस्यवचनस्यत्यागेदृष्टादिदोषः प्रतिबंधकइतिनभेदधीरितिसमं। नन्वेकविशेषाणी

तिसत्तंभातुंभस्यभेदाग्रहेताकुंभात्तत्तंभस्यभेदाग्रहोदृष्टः। नचान्योन्याश्रयासंस्पर्शिनिमार्गेसतितदापादकोमार्गोग्राह्यः। गोगवयसदृशीपिं

डावपिगवयादीनांगवादिभ्योभेदःसत्त्वेवप्रतियोगित्वज्ञानेहेतुः। नतुप्रतियोगित्वज्ञानेभेदज्ञानंहेतुः नहिगोगवयसदृशीतिप्रत्यक्षा

धीःस्वविनियमेनगवयोगोभिन्नइतिज्ञानपूर्वकानुभूयतेस्तुतरांशीघ्रधीः। तत्रभेदवाविशेष्ट्याभावात्। अन्यथाचैत्रस्यमैत्रपितृत्वगुरुत्वादि

केज्ञातएवमैत्रस्यचैत्रपुत्रत्वादिज्ञाने। गवयस्यगोसादृश्येज्ञातएवगोर्गवयसादृश्यज्ञानमितिसप्र[illegible]योगिकपदार्थज्ञानमात्रेन्योन्याश्रयः

स्यात्[illegible]भेदस्यस्वरूपेणाज्ञातस्याप्रतिबंधके। प्रतियोगितानभेदेनज्ञातेतत्रमिथः। अथजीवस्यब्रह्मणाप्येकोज्ञातेजीवेकातामि

ब्रह्मणीतितत्वापिस्यादन्यथान्योन्यसंश्रयः। यतेनन्यप्रतियोगिधीमात्तंभेदधीहेतुः। तन्निर्विकल्पकादपिभेदधीप्रसंगात्। किंतुप्रति

योगित्वेनतत्रापिनान्यंप्रतिप्रतियोगित्वेनधीर्भेदधीहेतुः अतिप्रसंगात्किंतुभेदंप्रति। तथाचभेदज्ञानेप्रतियोगित्वधीस्तज्ज्ञानेचभेद

धीरित्यन्योन्याश्रयइतिनिरस्तं। सप्रतियोगिकेसादृश्यादावभेदेवसाम्यात्। तत्रसादृश्याभेदादिप्रतियोगितावच्छेदकगवयत्ववित्वा राम

[illegible]धीरिवसादृश्याभेदादिधीहेतुश्चेदिन्नापिवक्तव्यं प्रतियोगितावच्छेदकपीतत्वादेःपीतत्वादिरूपेणधीरिवभेदधीहेतुः। पद्यापत्रध १८८

[illegible]र्मिणोर्योगिनोः सन्निहितो तत्र धर्मप्रतियोगिस्वरूपयोः तद्भावयोः तद्भेदस्य च युगपद्धीः इदमनेन सदृशमिति वत्तथा विशेषणविशेष्य
भूतयोर्भेदभेदिनोर्विशेषणविशेष्यभावस्य च युगपदेव धीः इमौ सदृशाविति वत्सर्वस्येंद्रियसंनिकृष्टत्वायोग्यत्वाद्युगपदनेक
ज्ञाने त्वन्त्रैर्विरुद्धत्वेविदीर्घसहस्वरवसमहात्वे वनेकज्ञानाविरोधात्। न हि मन्यते रंजी चेत्र रतिविशिष्टधीरपि विशेषणज्ञानपूर्विका।
उक्तं चैतदन्यत्रापचत्तु धर्मिप्रतियोगिनोरन्यतरस्यासन्निधानं तत्रापि संस्कारसचिवेंद्रियसन्निकर्षतो क्रमेवज्ञानमुत्पद्यते तदनेन सदृश
मि[illegible]विशेषणत्वं अन्यथाऽभेदज्ञानमपि न स्यात्। तथा च नान्योन्याश्रयः। तदुक्तं। धर्मित्वप्रतियोगित्व तद्भेदा युगपद्धियां। विशेषणविशे
च तद्भावस्यैव गृह्यते को विरोधः स्वरूपेणागृहीते भेद एव तु। अस्या मुख्यादितिपुनर्विशेष[illegible]च्यते। यद्यपि स्यादन्त्रिधी हेतुधीर्वि
शेषविषयत्वादिरूपस्यावर्त्तकत्वाद्यात्मकस्य विशेषणत्वादेर्विशिष्टज्ञानाधीनत्वादन्निता नोनंतरं निर्वर्त्यस्य न विशिष्टज्ञाने स्फुरणं
तथापि तदुपसर्जनत्वादिरूपविशेषणत्वादेर्विशिष्टज्ञाने स्फुरणं पुनः। किं त्वा अन्यत्वाग्रहणोऽप्युक्तः कथं चान्योन्यसंश्रयः। अन्यत्वेऽपि
सिद्धं स्यात् कथमन्योन्यसंश्रयस्तु कृत्वा उभयतः पाशारज्जुः। एतेन विशेषणविशेष्यभावेनैव भेदस्य प्रत्येतव्यत्वात्तद्भावप्रतीतेश्च भेद
प्रतीत्यधीनता[illegible]चेत्राद्यैर्दर्शनेन भेदप्रतीतिपरंपरानवस्थेति निरस्तं। ब्रह्मजीवाभिन्नं जगन्मिथ्यास्वप्नवन्निर्दुष्टपरपक्षो
दुष्टः स्यादात्यप्यभे[illegible]र्विशेषणादिभावेनैव प्रत्येतव्यत्वात्तत्प्रतीतेश्च भेदप्रतीत्यधीनत्वेनानवस्थानात्। प्राथमिका भेदधीः[illegible]
[illegible]पदेशादावपि भेदः सत्त्वेव विशेषणत्वादिहेतुः। न तु भेदज्ञाने तज्ज्ञाने तथा न नु भवाता तथा च नानवस्थेति चेत्समं प्रकृतेऽपि वा

...पेदयो स्वरूपेणाप्रतीतयोरसतिप्रतिबंधे विशेषणत्वादिधीसंभवादित्युक्तत्वात ।किं च भिन्नत्वेनैव ज्ञातस्य विशेषणतायामपि तत्त्वते
१५९ ति भेदधीपूर्वकविशेषणतया ज्ञातस्याभेदस्य पुनर्ब्रह्माभेदज्ञानेनस्यात विरोधात ।एवं च ।विशेषणत्वभेदे न ज्ञानेनापेक्ष्यते अन्यथा ।नन्वा
द्विशेषणं द्वैकं ब्रह्म... भिन्नं विरोधतः ।यतेन प्रत्यक्षं किं भेदमेव गोचरयेदुत वस्तु वि ।नाद्यः ।भेदस्य त्वेवाप्रतीतेः ।द्वितीये वि किं भेदस्य च
स्तु गोचरयेत उत वस्तु पूर्वं भेदं युगपद्वोभयं ।नाद्यः ।भेदस्य त्वेवाप्रतीतेः ।बुद्धेर्विरम्य व्यापाराभावाच्चात्रतय च न द्वितीयः ।न तेती
यः ।वस्तुग्रहस्य भेदग्रहहेतुत्वादिति निरस्तं ।विंव प्रतिबिंबयोज्ञविब्रह्मणोश्चाभेदग्राहिप्रत्यक्षं शब्दश्चकिमभेदमेव गोचरयेदि
त्यादेः साम्यात ।वस्तुमात्रज्ञानानंतरभाविनाविशिष्टज्ञानेन युगपदुभयग्रहणाच्च ।विशिष्टधीर्विशेषणधीपूर्विकेति मतेभ्य त
घटाभाव इति ज्ञानानंतरमेवभूतलं घटाभाववदिति ज्ञानवत अनयोर्भेद इति ज्ञानानंतरमेव ...भिन्नाविति धियः संभवेन तत्पूर्व
काले ... युगपदेवोभयगोचरविशिष्टधियः संभवेनोक्तदोषानवकाशाच्च ।यच्चोच्यते ।भेदस्यान्योन्याभावत्वे तत्प्रतियोगिनं
यत्तु भयोस्तादात्म्यस्याप्रामाणिकत्वेनान्योन्याभावस्याप्रामाणिकत्वस्यादिति तन्नारूप्यस्यद्वैतस्यात्यंतासतश्चाप्रामाणिकत्वेनवाध
गोचरस्य रूप्याभावस्याद्वैत लक्षणस्य चाप्रामाणिकत्वस्यादिति साम्यात ।यदि तत्र प्रतियोगिनो निरूपकमात्रत्वेन स्वपक्षे दोषस्या राम
प्रामाणिकत्वेपि तदभावस्यप्रामाणिकत्ववदुपपत्तिः तर्हि प्रकृतेपि तथा ।न ह्यस्मन्मते प्रामाणिकस्यैव निषेध इति नियमः ।येषां त १५९
...तन्मतेपि परे प्रमितस्य परतादात्म्यस्य घटे निषेध इत्यस्तु तन्मते अन्योन्याभावसंसर्गाभावयोर्घटप्रतियोगिकत्वेपि यत्र प्रतियोगि

[...]धिकरणे समारोप्यनिषेधावगमः। संसर्गाभावः यत्र त्वधिकरणे प्रतियोगितावच्छेदकमारोप्यनिषेधावगमः सोऽन्योन्याभाव इति
तयोर्भेदः। एतेन भावादभावस्यान्योन्याभावरूपभेदस्य वक्तव्यत्वात्स्वरूत्रित्वमिति निरस्तं। जीवब्रह्माभेदेऽपि स्वेनाभेदस्य वक्तव्यत्वा
त्स्ववृत्तित्वमिति साम्यात्। तत्राभेदान्तरं वा तस्यैव स्वनिर्वाहकत्वं वा चेदिहापि तथास्तु। एतेन नरशृंगशशशृंगात्यंताभावयोरन्योन्याभा
वरूपभेदस्य सत्त्वादभावाभावस्य भावत्वान्नृशृंगशशशृंगयोः सत्त्वं स्यात्। एवं घटध्वंसप्रागभावयोरन्योन्याभावस्य वक्तव्यत्वादभा
वाभा[...]भावत्वात् घटध्वंसादिकाले घटः स्यादिति निरस्तं। अविद्यानिवृत्तिः पंचमप्रकारेति मते भावाद्वैतमते चाविद्यानिवृत्तेर्ब्र[...]
तोऽन्योन्याभावस्य वक्तव्यत्वादभावाभावस्य भावत्वादविद्यानिवृत्तिकालेऽविद्या स्यादिति स्यान्या[...]दित्व भावसंसर्गाभाव एव भावो न
त्वन्योन्याभावस्तर्हि प्रकृतेऽपि समं। यद्वोक्तं। भेदेषु जातिरूपमौपाधिकधर्मरूपं वा भेदत्वं वाच्यं तत्र पुनर्भेदो वाच्यः। अन्यथा भेदत्वस्यात्र
न्यस्याभेदेरो तस्यात्। तथा चान्योन्यवृत्तिरिति। तत्र। अभेदेष्वभेदत्वं वाच्यं तत्र पुनरभेदो वाच्यः अन्यथा तस्याभेदो न स्यात्। तथा चा[...]व
वृत्तिरिति साम्यात्। न च घटस्य घटाभेदः जीवस्याजीवाभेदो वाजीवस्य ब्रह्माभेदः वेदांतवैयर्थ्यापत्तेः। अथ तत्र प्रमेयत्वाभिधेयत्वपरि
वप्रमितत्वादन्योन्यवृत्ति[...]र्दोषः तर्हि प्रकृतेऽपि तथास्तु। ननु भेदः किं भिन्ने वर्तते उताभिन्ने। नाद्यः अनवस्थापातात्। नोत्यः। विरोधादिति चेव
ता। अभेदः। आत्म[...] निर्विवादत्वे आत्मनो निर्विशेषत्वस्वपक्षे दोषाभावः। परपक्षे दोषश्च तद्वृत्तिवर्तते। उत तद्वहितरस्यादेः स्याम[...]ता।
दघ[...]दादि स्वरूपं यद्वास्वाश्रयत्वयोग्ये वर्तते योग्यता च प्रमितिरूपकार्योन्नेया तर्हि प्रकृतेऽपि तथास्तु। एवमन्येऽपि स्वव्याघातकाः [...]सुरः

ना॰ मा॰ पदार्थाः परिशेषाः । न च भेदखण्डने केनापि कापि अखण्डाख्याघातिका ज्ञातिरूपा युक्तिरुक्ता । न तूक्ते । एतादृशस्य । वक्तारो ऽपि भोज्ञात्वान्तरा
१५० । मायी माध्यमिकश्चैव तावुपेक्ष्यौ बुभुत्सुभिरिति ॥ ॥ विशिष्टभेदखण्डनोद्धारः ॥ ॥ वं सत्ततत्त्वसम्मते भेदो वस्तु नास विशेषाभिन्नस्तत्र
भिन्नत्वात्तान वस्थादि । भेदप्रतिविधेश्च विशेषस्य सत्त्वात्तत्पर्यायत्वादिकं । विशेषश्च भेदहीनेऽप्येकतरपरिशेषाभावादिनिर्वाहकः । उक्तं
। भेदहीनेऽपि पर्यायशब्दान्तरनियामकः । विशेषो नाम कथितः सोऽस्ति वस्तुषु शेष तद्वृत्तिः । प्रमाणं त्वत्रार्थापत्तिः । तथा हि । विज्ञानमानंदं
ब्रह्मेत्यादिवाक्यबोध्यविज्ञानानंदादीनां परमते पि न तावद्भेदो भेदाभेदो वा । अखण्डार्थत्वात् तत्प्रकाशवाक्यत्वं अखण्ड्यमित्याद्येकरसश्रुति
विरोधाच्च । तत्र भेदप्रतिनिधिर्विशेषोऽपि न चेत् कथं तद्व्याप्तमपर्यायत्वं पदान्तरावैयर्थ्यं विज्ञानानंदयोरेकतरापरिशेषः अभेदघो
नत्वे न चैतन्यमात्रेऽपि मोक्षे वेदान्तीमानंदाप्रकाशस्त्यादिभेदकार्यं स्यात् । तत्स्वार्थभेदाभावेऽपि वैयर्थ्यभेदादपर्यायत्वं आवर्त्य
भेदादवैयर्थ्यं चेति चार्वंग पर्यवादे निरस्तं । न च स खण्डार्थवादेऽपि प्रवृत्तिनिमित्तयोर्ज्ञानत्वानंदत्वयोर्भेदादपर्यायत्वे एवं धर्मी निति
श्रुत्या तयोरपि भेदनिषेधात् । अर्थप्रकाशत्वनिरुपाधिकेष्टत्वरूपयोस्तयोरर्थप्रकाशनिरुपाधिकेष्टत्वाश्रयविशेषमापेक्षत्वाच्च । आ
काशशब्दाश्रयशब्दयोर्निमित्तभेदाभावे न पर्यायत्वापातात् । न ह्याकाशशब्दस्य शब्दाश्रयत्वादन्यन्निमित्तमस्ति । ज्ञानानंदयोरेकतरपरि
शेषे च मोक्षे आनंदप्रकाशो न स्यात् । तस्माद्विज्ञानानंदादेरेकश्रुतिबलाद्भेदरहितेऽकतरापरिशेषाद्यर्थं विशेषोऽङ्गीकार्यः । एवं तत्त्वमसीत्य राम
त्र सार्वतात्पर्यादाघटितवाक्यार्थस्यैकस्य ननु तावत् परमते भेदो भेदाभेदो वा एकस्यापि मिथ्यात्वापातात् । तत्र विविशेषोपि न चेत् कथं स्व

[...]शेप्येकस्याप्रकाशः। न प्रकाशस्य भेदभ्रमाविरोधित्वेप्येकप्रकाशस्य तद्विरोधः। तस्य निरपेक्षत्वेप्येकस्य सापेक्षत्वमिति सर्वदि
। न चाविद्यावरणादेकस्याप्रकाशः। विशेषाभावेऽनाद्यन्तविदभिन्नस्यैकस्यावरणायोगात्। न हि शुक्त्यज्ञानेन शुक्त्यंश एवावृतो नाव
तेश्च भवति। किं चैवं धर्मानितिश्रुतिवलादपि विशेषसिद्धिः। अत्र हि ब्रह्मधर्माननुक्त्वा तद्भेदो निषिध्यते। न च भेदप्रतिनिषेधे रभावे धर्मि
धर्मभावो धर्माणामनेकत्वं च युयुक्तं। न च धर्मानित्यनुवादः। श्रुतितोऽन्यन ब्रह्मधर्माप्राप्तेः। न चेयं श्रुतिरस्य तद्भेदनिषेधिका भेदमात्रवि
षेधात्। [...] भेदाभावस्य लोकत एव प्राप्तत्वाद्भेदाभेदे चयः। पक्षेपि त्रयातितमपवदेत्[...]दिस्य तेष्वा। तदुक्तं। उक्ता धर्मान्यथा त्वक्ष
निषेधादनुपपत्तिहि। विशेषोऽज्ञायते श्रुत्याभेदादन्यश्च साधितइति। किं च गुणगुणाद्यभेदपक्षे घटोपलब्धौ[...]पि शेक्लाद्यनुपलंभाद्भेदाभेदप
क्षेपि तयोरविरोधार्थमप्रामाणिकतमपरंपरापरिहारार्थं च अस्यं तद्भेदपक्षेपि समवायः। स च ध्वंसत्वासत्तीभेदोभिन्नः। अतएव विशेषोद्वात्र
:कालः। सदास्ति देशसर्वत्रेत्यबाधितव्यवहारार्थं विशेषोंगीकार्यः। किं चाभावादावस्तित्वादिर्नाभावादितो भिन्नः। गुणादिष्वनंतभावि
परपदार्थनियमभंगात्। अनियमपक्षेस्तित्वेप्यस्तित्वांतरमित्यनवस्थानात्। तत्र विशेषोपि न चेत् एकधे विशेषणविशेष्यभावादिन च
सत्त्वासत्त्वादिर्भाति। स न घटत्वादिवद्बाधात्। नाप्युपचारः स्खलितो देवदत्तो नेतिवत्सत्वासत्तीनेति कदाप्यव्यवहारात्। ननु[...]दे:
स्त्वं घटत्वाभावेपि स्वभावविशेषादेव सद्व्यवहार इति चेत्। तस्यैव स्वभावविशेषस्यास्माभिर्विशेषशब्देनोक्तेः। समवायादिः स्वान्ये
[...]रतिरेकेणास्वस्यस्वयमेव निर्वाहकं हि स्वनिर्वाहकं विशेषाभावे च कथमेकस्यैव निर्वहणक्रियायां कर्तृत्वकर्मत्वं च। अस्य वि

[illegible]णैव स्वविषयिनः स्वनिर्वाहकत्वेति नानवस्था। तस्य तथात्वं च धर्मिग्राहकमानसिद्धं। एवं भेदाभावः। भेदकार्यं च प्रमितं तत्रैव विशेष-
कल्पनं तदिति न प्रमितभेदे घटपटादौ विशेषमादाय भेदव्यवहारः। नहि सोमाभावे पूतीकरतितल्लाभेपि सः। एतेनोक्तस्थले भेद एवास्तु भेदका
२२१ र्यं चेन्न तु भेदप्रतिसिद्धिरिति निरस्तं। तत्र भेदस्य बाधितत्वात्। एवं च ब्रह्मस्वरूपभूतयोर्विज्ञानानंदयोर्ब्रह्माभेदयोश्चैकतरपरिशेषाभा
वः। प्रमेयत्वादेः स्वाश्रितत्वादिकं वा भेदान्यनियम्यं। भेदानियम्यत्वे सति नियम्यत्वात्। घटादनियम्यत्वे सति नियम्यं तत्तदन्यनियम्यं य
था संमतं। ब्रह्मस्वरूपविज्ञानानंदादिकं वा भेदान्यैकतरापरिशेषनिर्वाहकवत्। भेदहीनत्वे सत्येकतरापरिशेषरूपनिर्वाह्यवत्वात्। य
द्धीनत्वे सति यन्निर्वाह्यवत् तत्तदन्यतन्निर्वाहकवत्। यथा संमतं। स्वाश्रितप्रमेयत्वादिकं वा भेदान्याश्रयाश्रयिभावनिर्वाहकवत्। भेदही
नत्वे सत्याश्रयाश्रयिभावरूपनिर्वाह्यवत्वात्। यद्धीनत्वे सति यन्निर्वाह्यवत्। तत्तदन्यतन्निर्वाहक[illegible] यथा संमतं। इत्यादिप्रयोगो द्रष्टव्यः।
किं च [illegible]प्रत्यक्षसिद्धः। तथा हि। तंतुपटादिबुद्धीनामभिन्नघटपटादिबुद्धितो वैलक्षण्यं तावदनुभूयते। तच्च न तावत्संबंधविषयत्वेन
कुंडबदरादिबुद्धितो वैलक्षण्यानुभवात्। नापि संयोगान्यसंबंधविषयत्वेन घटतद्रूपतदभावादिबुद्धितोपि वैलक्षण्यानुभा
वात्। नापि स्वरूपप्रत्यासत्तिसंयोगान्यसंबंधविषयत्वेन। घटतद्भूमिकान्योन्याभावादिबुद्धेर्घटपटादिबुद्धितो वैलक्षण्याभावापातात्।
नाप्ययुतसिद्धिविषयत्वेन। आश्रयाश्रयाश्रयिभावनियमोप्ययुतसिद्धिः तद्वत इदानींतन आश्रयाश्रयिभावकुंडबदरादिबुद्धावपि भा राम
[illegible]सक्तन्न तंतुपटादिबुद्धावपि। नहि प्रत्यक्षात् तंतुपटादिधीः तंतुपटसंबंधनाशो वा तंतुपटविभागो वा न भविष्यतीत्याकारा। नापि कुंड

[illegible]नेवस्वभिन्नः स्वनिर्वाहकश्चेति नानवस्था। तस्य तथात्वं च धर्मिग्राहकमानसिद्धं। यत्र भेदाभावः। भेदकार्यं च प्रमितं तत्रैव विशेष॰
कल्पतरिति न प्रमितभेदे घटपटादौ विशेषमादाय भेदत्यागः। नहि सामाभावे पूर्तीकरतितत्वाभेविसः। एतेनोक्तस्थले भेद एवास्तु भेदका
२११ र्यं च न तु भेदप्रतिनिधिरिति निरस्तं। तत्र भेदस्य बाधितत्वात्। एवं च ब्रह्मस्वरूपभूतयोर्विज्ञानानंदयोर्ब्रह्माभेदयोश्चैकतरपरि[illegible]भा
वः। प्रमेयत्वादेः स्वाश्रितत्वादिकं वा भेदान्यनियम्यं। भेदानियम्यत्वे सति नियम्यत्वात्। यद्यद नियम्यत्वे सति नियम्यं तत्तदन्यनियम्यं य
था संमतं। ब्रह्मस्वरूपविज्ञानानंदादिकं वा भेदामेकतरापरिशेषनिर्वाहकवत्। भेदहीनत्वे सत्येकतरापरिशेषरूपनिर्वाह्यवत्वात्। य
द्धीनत्वे सति यन्निर्वाह्यवत् तत्तदन्यतन्निर्वाहकवत्। यथा संमतं। स्वाश्रितप्रमेयत्वादिकं वा भेदान्याश्रयाश्रयिभावनिर्वाहकवत्। भेदही
नत्वे सत्याश्रयाश्रयिभावरूपनिर्वाह्यवत्वात्। यद्धीनत्वे सति यन्निर्वाह्यवत् तत्तदन्यतन्निर्वाहक[illegible]। यथा संमतं। दर्शनादिप्रयोगो द्रष्टव्यः।
किं च [illegible]प्रत्यक्षसिद्धः। तथाहि। तंतुपटादिबुद्धौ नाभिन्नघटपटादिबुद्धितो वैलक्षण्यं ताद्रूप्येण नानुभूयते। तच्च न तावत्संबंधविषयत्वेन
कुंडबदरादिबुद्धितो विलक्षणानुभवात्। नापि संयोगान्यसंबंधविषयत्वेन घटतद्रूपतद्भावादिबुद्धितो विलक्षणानुभा
वात्। नापि स्वरूपप्रत्यासत्तिसंयोगान्यसंबंधविषयत्वेन। घटतद्रूपमितिकायोन्याभावादिबुद्धेर्घटपटादिबुद्धितो वैलक्षण्याभावापातात्।
नाप्ययुतसिद्धिविषयत्वेन। आश्रयाश्रयाश्रयिभावनियमो ह्ययुतसिद्धिः। तच्च तदानींतन आश्रयाश्रयिभावः कुंडबदरादिबुद्धावपिभा राम
[illegible]समस्त नतंतुपटादिबुद्धावपि। नहि प्रत्यक्षात् तंतुपटादिधीः। तंतुपटसंबंधनाशो वा तंतुपटविभागो वा न भविष्यतीत्याकारा। नापि कुंड

...दिधीस्तयोः संबंधनाशो वा कुंडबदरादिष्वागोवा भविष्यतीत्याकारात् नापि समवायविषयत्वेनेक्षरीत्यासंबंधनित्यत्वस्यैवासंबंधप्रयुक्तत्वसि
द्धत्वस्य वाऽवास्फुरणात्। तस्माद्भेदविषयत्वेनैव वैलक्षण्यं वाच्यं। अयं घटः गगनाम्बवादिरेव सेनापत्रमेव तादृक् रत्यादेः पुरोवर्त्तिनाद्यप
देरिव आतानवितानात्मकास्तंतवएवपटः प्रयुक्तः पटस्यादावपि तंत्वादिना पटस्याभेदप्रतीतेः। न चात्र पटत्वप्रयुक्तत्वयोरेकस्यत्वमेव भासि
तिवाच्यं। पटप्रयुक्तयोरैक्यस्याप्रतिपत्तेर्न गतिः। अन्यथा घटाद्याप्यभेदो न सिध्येत्। घटः पटो नेति धीष्वभेदविषयानस्यात्। दंडी चैत्र इत्यत्रापि दंडि
...भेदो भासेवा न च प्रयुक्तः पट इत्यत्र प्रयुक्तवानेव प्रयुक्तपदार्थ इति वाच्यं। प्रयुक्तस्यापि तत्र पटत्वं तत्संबंधो न तत्स्यैव हप्रतीतेः। अन्यथेहापि प्रयुक्ति
पट इति धीः स्यात्। पतद्भावादिकल्पनेतद्व्यवहारे न तद्प्रतीतेः। पटस्य शौक्ल्यं एष पटरूपादिधीस्तत्संबंधविषयानत्वभेदविषया सत्त्वासति
त्यादिवत् भेदाभावे प्रत्ययपत्तेश्च। पटस्य तंतुत्वस्य त्वेच गुरुत्वद्वयं अधिकं स्यात्। ते तदुक्ते भूतत्ते पटवृत्तिश्च न स्यात्। मूर्त्तानां समानदेशत्वविक
रणायोगात्। व्यवहारार्थं क्रियाभेदादिति पद्धतारंकादिवत् प्रयुक्तं। तस्मात् तदुपपादितद्वैरभेदविषयैव। पटश्चेयं केवलाभेदविषया हि
सामानाधिकरण्यव्यवहारं न जनयेत्। घटः कलश इत्यव्यवहारात्। ते न सा पते अधिकोप्यस्या विषयोस्तीति। न चायं भेदः पटेन प्रयुक्तो
स्फल्वे त्वायातात्। भेदाभेदावितिधाय विशिष्टस्यावश्यकत्वाच्चुत तस्माद्योधिको विषयः स एव विशेष इति सिद्धं विशेषस्य प्रत्यक्षत्वं। पटा
प्रयुक्तः पट इत्यादिसामानाधिकरण्यप्रतीतेर्भेदे निर्विशेषाभेदे वाप्युक्तेः सविशेषाभेदविषयत्वं कल्प्यत इति तस्य प्रत्यक्षत्वं। तदुक्तं
...प्रत्यसिद्धेन व्यवहारोखिलो भवेदिति। अभेदेपि विशेषोस्ति व्यवहारस्ततो भवेदिति स्मृतिसिद्धश्च विशेषः। तस्माद्भेदस्यैव...

द.मा.०
१९९

[illegible]शेषाभिन्नत्वात्तत्कोऽपदेशो वर्तते॥ ॥विशेषसमर्थनं॥ ॥ननु तथापि न तावज्जीवेश्वरभेदे प्रत्यक्षं मानं ईश्वरस्याप्रत्यक्षत्वेन तद्धर्मिक
स्य तत्प्रतियोगिकस्य वा भेदस्याप्रत्यक्षत्वात्। नाप्यनुमानं। जीवेश्वरौ भिन्नौ विरुद्धधर्माधिकरणत्वाद्दहनतुहिनवदित्यत्र तात्त्विकभेदे सा
ध्ये दृष्टांतस्य साध्यवैकल्यात्। अतात्त्विके साध्ये सिद्धसाधनात्। दुःखादेरंतःकरणधर्मत्वेनासिद्धेश्च। ब्रह्मतत्त्वतो जीवाद्भिन्नं सत्त्वे तत्त्वा
तद्व्यतिरेकेणाजीववदित्यत्राप्रसिद्धविशेषणत्वात्। ब्रह्म स्वधर्मिसत्तासमानसत्ताकभेदवदिति साध्यनिर्देशेऽप्यसाधारण्यात्। नाप्या
त्मत्वं नानाव्यक्तिनिष्ठं जातित्वात् पृथिवीत्ववदित्यादिभिरात्मभेदमात्रसिद्धिः। आत्मैक्यवादिनं प्रत्यसिद्धेः। दुःखं गुणत्वावांतरजातिः स्व
जातीयाश्रयभिन्नाश्रितं गुणत्वाद्रूपवदित्यत्र शब्दे व्यभिचारात्। दुःखादीनामंतःकरणधर्मत्वेन सिद्धसाधनाच्च। विमतानि शरीराणि
स्वस्वसंख्यासंख्येयात्मवंति शरीरत्वात् संमतवदित्यत्र योगिशरीरे व्यभिचारात्। आत्मा धर्मिसत्ता[illegible]नसत्ताकात्मप्रतियोगिकभेदवान्
द्रव्यत्वात् घटवत्। आत्मा द्रव्यत्वव्याप्यजातिमान् नानाश्रयावृत्तिविशेषगुणाधिकरणत्वात् घटवदित्यत्रात्मनो निर्गुणत्वेनासिद्धेः। उक्तसाध्य
एव शरीरात्मसंयोगाधारत्वात् शरीरवदित्यत्राभाससाम्यात्। नापि द्वा सुपर्णा इत्यादिश्रुतिः। अनुवादत्वात् व्यावहारिकभेदपरत्वाद्वा ए
वं भेदांतरेऽपि प्रमाणानि निरसनीयानीति। उच्यते। प्रत्यक्षं तावज्जीवेश्वरभेदे प्रमाणं घटः पटो नेतिवत् नाहं सर्वज्ञो नाहं निर्दुःख इत्यनुभ
वात्। न चेश्वरस्याप्रत्यक्षत्वात्तो भेदोऽप्यप्रत्यक्षः। यत्र हि प्रत्यक्षत्वमनुपलब्धिविरोधि तत्र तदभावः प्रत्यक्षं उक्तप्रतियोगिप्रत्यक्षत्वमभाव राम
[illegible]त्वे तंत्रं। जलपरमाणौ पृथिवीत्वाभावस्य प्रत्यक्षत्वापातात्। स्तंभः पिशाचो न भवति घटः परमाणुर्न भवतीति प्रत्यक्षप्रतीतेश्च। प्रतीत १९९

[illegible]मेदस्य च प्रयोजनं नैकत्वं। अन्यथा जीवेश्वराभेदश्रुतेरप्र[illegible]त्वप्रतिषेधत्वं स्यात्। तन्मेदश्रुतेश्च तत्त्व उक्तप्रत्यक्षप्राप्तानुवादित्वेन स्यात्। ईश्वरस्य
जीवाभेदे तु तास्यैहं वेदसर्वात्मिनत्वे र्वलत्वपरंतय। उक्तमः पुरुषस्त्वस्मरत्वादितद्दूचनानुमितमीश्वरमतस्तेप्रमाणे। नन्वत्रयो भातित्रितंकार
णाविद्यादिविशिष्टस्याहमर्थस्य निर्दुःखाभेदः समसमायीष्टः। यस्तु नेष्टः शुद्धचेतन्यस्य निर्दुःखाभेदः सोत्र न भातीति चेत्। न योहमस्वांस्ये
यस्य ममात्मानं संसारदुःखोहं निर्दुःखोनेति सुषुप्तिकाली नांतकरणानवछिन्नाभेदेनअनानाद्याअयाभेदे न च प्रत्यभिज्ञायमानेषु दृ
मेरुपं[illegible]धारस्यतदनाधाराभेदः एव द्वयोर्विवादः। न तु चेतन्यस्य चेतन्यांतरात्। साक्षित्वं चाहमर्थस्य दुःखात्मतापर्यायियपर्यातिनि
र्दुःखेत तथापि निर्दुःखमात्राभेदधीरियं ब्रह्मणोपि भेदविषयैव। न चाद्वैतिमते जीवदुःखेन ब्रह्माप्यदुःखीति न निर्दुःखं ब्रह्मेति वाच्यं। वद्धजीव
वावेब्रह्मभावरूपमुक्तेरनुमर्थत्वापातात्। एकजीववादे पि औपाधिकस्यापमत्वाद्वैविमहाकाशयोरिव दुःखित्वादेर्ब्रह्मण्यसत्त्वात्। विस्त
ते चेतरविद्याश्रयभंगे साधितं च प्रत्यक्षप्रामाण्यावसरे वा स्वप्रत्यक्षस्य बलवत्प्रत्यक्षेतरेण न बाधः। साक्षिप्रत्यक्षस्य न केनापि बाधइति
तस्माज्जीवेशभेदः प्रत्यक्षः। एवं शब्दादनुमानादिना चैत्रात्मादिकं ज्ञातवतामैत्रेण नाहं चैत्रो घटोन ब्रह्म घटोन पटः नाहं घट इत्यनुभवा
त्संचापिभेदाः प्रत्यक्षाः भेदपंचकेप्रत्यक्षं॥ ॥ अनुमानानि चाईश्वरः जीवप्रतियोगिकतात्विकभेदवान् सर्वज्ञत्वात्। सर्वशक्ति[illegible]त्वात्
सर्वकार्यकर्तृत्वात् स्वतंत्रत्वाद्वा। व्यतिरेकेण जीववत्। जीवो वा ब्रह्मप्रतियोगिकतात्विकभेदवान्। अल्पज्ञत्वात् अल्पकर्तृत्वात् संसारित्वा
द्व्यतिरेकेण ब्रह्मवत्। परमतेपि जीवब्रह्मणोर्व्यावहारिकभेदस्य सत्त्वान्न दृष्टांतभावः। अन्यथा परस्यापि जीवात्मनः तत्वतः परमात्म

[illegible]या० [illegible]भिन्नाः आत्मत्वात्परमात्मवदित्यादिनस्यात्। एतेन सर्वाद्वैतवादिने प्रतिसाध्याविशिष्ट्यादिदोषान्न भेदानुमानं क्लिष्टं क्लेति निरस्तं। परेत्वा[illegible]विश्च
५३ व्याहतिं निरासः। यद्व्यावहारिकभेदमात्रेण हेतुसाध्यादिव्यवस्थायां स्वीकृतत्वात्। भेदस्य स्वरूपत्वेपि विशेषवत्वाद्युक्तविशेषणत्वं चासीत्यत्र
त्वात् न भेदवत्वं वा[illegible]तं। न चाप्रसिद्धविशेषणता। जीवब्रह्माभेदे निषप्राप्तेर्वक्ष्यमाणत्वे न तद्विपर्ययप्रमाषृद्व्यातिरिक्तद्व्यादेरिव[illegible]मान
योग्यत्वात्। यद्वा जीवः किंचिद्धर्मिकप्रतियोगिज्ञानावाध्यभेदप्रतियोगी ब्रह्म वा किंचिद्धर्मिकप्रतियोगिज्ञानावाध्यभेदप्रतियोगि अधिष्ठानत्वा
च्छुक्तिवत् इति सामान्यतस्तत्सिद्धेर्नाप्रसिद्धिः। केचित्तु जीवाभिन्नत्वे वसाध्यं तथा च नाप्रसिद्धिः मिथ्याभेदेन सिद्धसाधनं तु निरसिष्य
ते। यद्वा ब्रह्म जीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवदिति साधनान्नाप्रसिद्धिः तावित्सिद्धसाधनं। न चोभयत्राप्यसाधारणत्वं[illegible]स्या
ग्रह्यमाणाविशेषावस्थावाभेवदोषत्वादित्याहुः। इतरे तु ब्रह्म जीवप्रतियोगिकतात्विकाभेदवन्नेति साधनान्नाप्रसिद्धिः। परपक्षेपि
यदेजी[illegible]काभेदाभावादित्याहुः। अपरे त्विह साध्यस्य जीवप्रतियोगिकतात्विकभेद[illegible]न्योन्याभावरूपत्वान्नाप्रसिद्धिर्दोषः। ता
हि व्याप्तिग्रहविघटकत्वेन दोषः। यद्वा तात्त्विसाध्यविषाविरहसहकृतसाधकमानाभाववत्वादिरूपासंदेहानपेक्षा। तत्सापेक्षत्वे विशेषेपि
वेपरत्याज्ञाविवजीवब्रह्मणोर्भेदे तात्विकत्वमस्ति न वेति संदेहे नैव साध्युक्तानतु ब्रह्मजीवान्नत्वतोभिन्नं न चेति संदेहसापेक्षा। व्यतिरेकिति
न साध्याभावस्य व्याप्तिः। अत्र च साध्याभावो जीवाभेदो जीवप्रसिद्धः यत्र तु व्यतिरेकितिभावः साध्यस्तत्राभावज्ञानस्य भावज्ञानाधीनत्वात्सादो राम
[illegible]त्याहुः। यद्वा ब्रह्म जीवात्तभिन्नं इः खोनत्तु भवितत्वात्तद्घटवदिति प्रयोगान्नाप्रसिद्धविशेषणतान साधारणता। न च मिथ्याभेदेन सिद्धसाधनं। १५३

भेदरूपार्थे साध्ये धर्म्यन्यत्वांशस्यासिद्धसाधनत्वात्त्वयोगात् । तदनुमितिविषयतया प्रामाणिकत्वे न सिध्यतो भेदस्य मिथ्यात्वायोगात् । अन्यथा
चद्रीयेषु मिथ्यात्वाद्यनुमानेषु कल्पितमिथ्यात्वादिना सिद्धसाधनं स्यात् । तात्त्विकत्वविशेषणेपि तात्त्विकत्वे न कल्पितभेदेन सिद्धसाधन
मितिवत् स्यात् यद्वा ब्रह्म जीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवत् दुःखाननुभवितृत्वात् अभ्रांतत्वात् । असंसारित्वाद्वा । घटवत् । जी
वो वा ब्रह्मप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवान् असर्वशक्तित्वात् असर्वज्ञत्वात् अस्वतंत्रत्वाद्वा घटवदिति प्रयोगान्न दोषः । अ
त्र जीव ब्रह्मशब्देन त्वन्मते पि तत्त्वमसीत्यत्र तत्त्वंपदाभ्यां जीवाः परमात्मनस्तत्त्वतो न भिद्यंते आत्मत्वात्परमात्मवदित्यत्र च जीवपरमात्म
शब्दाभ्यां ये विवक्षिते ते संसाराधारानाधारचैतन्ये विवक्षिते ते च सत्ये इति न सिद्धसाधनं । न च ब्रह्मणो धर्मित्वाभावात् बाधः धर्मित्वाभावं
प्रति धर्मित्वाधर्मित्वाभ्यां व्याघातात् । इह धर्मिशब्देनाश्रयमात्रस्य विवक्षितत्वाद्वा । धर्मिशब्दस्य च पित्रादिशब्दवत् संबंधिशब्दत्वान्न मिथ्या
त्वं प्रति धर्मिभूतशुक्तिरूप्यसमानसत्ताकप्रातिभासिकभेदेन सिद्धसाधनं । न हि माता पुत्रस्य तत्कृते स्वस्वतमाता भार्याप्युच्यते । धर्मिपदस्थाने स्वपदं
वास्तु सत्तात्रैविध्यं वदतस्तव मतेपि ब्रह्मणि बाधाभावरूपाया वा तदुपलक्षितरूपाया वा सत्ताया सत्वान्न बाधः । यद्वा धर्मिसत्तासमसत्ताकेति पदस्था
ने पारमार्थिकेति वा स्वस्वरूपमनुवर्त्तमानेति वा स्वाश्रयानाकालीनेति वा स्वज्ञानाबाध्येति वा विशेषणं देयं । स्वशब्दस्य च समभिव्याहृततत्तद्धर्मिपरत्व
स्य व्याख्यातत्वान्न कश्चिद्दोषः । अन्यथा तवापि स्वप्रागभावव्यतिरिक्तत्वाघटपुरुषं स्यात् । न चात्राद्ये साध्ये दृष्टांतस्य साध्यवैकल्यं घटो जीवप्रतियोगि
कधर्मियोगिज्ञानाबाध्यभेदवान् जीवधर्मिकधर्मिज्ञानाबाध्यभेदरहितत्वात् यद्यज्ज्ञानाबाध्ययद्धर्मिकभेदरहितं तत्तज्ज्ञानाबाध्यतत्प्रतियोगि

प प्रा०
१५५

...स्त्वतत्पथाऽऽदरस्यैव न स्यात्सोऽरेक इत्याद्यनुमानेन तत्सिद्धेः। यद्वा ब्रह्मतत्त्वतो जीवा अपि तन्नेति साध्यं एवं च न साध्यवैकल्यशंकापि। त्वन्मते वि-
ष्यते घटे कल्पितजीवात्तात्त्विकभेदवत्तात्त्विकाभेदस्याप्यभावात्। न चैवं ततः करणस्यैव दुःखानुभवितृत्वात्तदननुभवितृत्वं जीवे नैकान्तं। ब्रह्म-
ते दुःखादेरंतःकरणधर्मत्वेपि व्यावहारिकस्य स्वतोनर्थरूपदुःखानुभवात्मकवंधस्य मोक्षसमानाधिकरणप्रजीवस्यत्वावश्यंभावात्। त्वन्मते
पि पदनर्थरूपं अहं दुःखीत्यनुभवितृत्वं जीवस्य तत्र भावो हेतुरिति न कश्चिद्दोषः। न चासंसारित्वादेर्ब्रह्मलक्षणसिद्धिः जीवे नैकांत्यं वा। त्वन्मते
औपाधिकश्यामत्वादिवत्तस्य व्यवस्थितत्वात्। एवं च जीवे सुखरोधर्मिज्ञानाबाध्यपरस्परप्रतियोगिकभेदवत्त्वेतो विरुद्धधर्माधिकरणत्वात्।
दहनवद्धिनवदितीयपि हृस्यां विरोधस्योपपादि न सहानवस्थाने। अद्वैतिनं प्रत्यसिद्धेः। नापि वध्यघातकभावः। नाज्ञात एको येऽहं
ति नाप्यन्याधार इति न्याये न तस्य भेदासाधकत्वात्। नापि परस्पराभावव्याप्यत्वे परस्पराभावरूपत्वं वा कालभेदेन नीलरूपरक्तरूपे
...नावेव च प्रत्याश्रये घटे व्यभिचारात्। तथापि परस्परात्यन्ताभावरूपत्वं वा परस्परात्यन्ताभावव्याप्यत्वे वा कालभेदेनापि सामा
नाधिकरण्यायोग्यत्वं वा विरोधः संयोगतदत्यन्ताभावयोः सामानाधिकरण्येनेत्यावयोर्मतमिति न तदाश्रये व्यभिचारः। तादृशविरुद्ध-
धर्माश्रयत्वं तं चत्वा सत्वं तेजत्वादयः। नवासिद्धिः अल्पशक्तिरसार्वज्ञ्यं यारतंत्र्यमपूर्णता। उपजीवकत्वं जीवत्वमीशत्वे तद्विपर्ययः। स्वाभावितं
तयोरेतत्रान्यथा तद्कथं च नेत्यादिश्रुतेः। न च कल्पितायां सार्वज्ञ्यासार्वज्ञ्यादिव्यवस्थायां वर्णे दीर्घत्वह्रस्वत्वादिवत्कल्पितभेदेनैवोपपत्त्या
तात्त्विकभेदे प्रत्यप्रयोजकत्वं। सगुणवादे तु न्यायैः श्रुत सार्वज्ञ्यादेर्ब्रह्मलिङ्गप्रत्यक्षप्रमाणपवादोक्तन्याये निर्दोषानुभवरूपसाक्षिसिद्धा

सार्वज्ञ्यादेष्वजीवेसत्यत्वात्। एवं ब्रह्मस्वज्ञानाबाध्यजीवप्रतियोगिकभेदवत् पदार्थत्वात् घटवत् जीवस्यापि जीवांतराश्रितत्वात् व्यभिचारवत
नत्वं जीवत्वावछिन्नप्रतियोगिताकधर्मिज्ञानाबाध्यभेदवद्वृत्ति सर्वचेतनवृत्तित्वात् चेतनावृत्तित्वरहितत्वाद्वा शशशृंगत्ववदित्यादीनि चा
नुमानानि जीवेश्वरभेदे प्रमाणानि विपक्षे ब्रह्मणोपि जीववत्संसाराद्यापत्तिः। एतेनाप्रमेये अनुमानस्य प्रवृत्तिर्नैकथंचन। प्रमेय
स्यत्वनात्मत्वान्नत्र भेदानुमेयपत इति निरस्तं। त्वन्मतेप्यात्मनः शब्दलिंगादिजन्यवृत्तिव्याप्यत्वात्। अन्यथा अप्रमेयेनुमानस्य प्रवृत्ति
र्नैकथं[illegible]प्रमेयस्यत्वनात्मत्वान्नदेक्यानुमितिः कथमिति तु वचत्वेनत्वदीया आत्माभेदे अनुमाकुक्तिरयुक्ता स्यात्॥ ॥जीवब्रह्मणो
र्भेदेनुमानानि। जीवानामन्योन्यभेदे तु चैत्रः मैत्रप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान्। मैत्रानुसंहितदुःखाननुसंधातृत्वात् घटवत्
इहचदहनतुहिनादौ लक्षतयानुसंधानाननुधानत्वरूपविरुद्धधर्मयोरेवप्रयोजकत्वात्। विमतं सुरभिधर्मरहितेचंदनप्र[illegible]वृत्तिरहि
तत्वात्। इत्यादाविवासिद्धिवारकविशेषणात्वं नदोषः एवं चैत्रो मैत्रप्रतियोगिकतात्विकभेदवान् मैत्रीयस्मृतिहेत्वनुभवरहितत्वात्। मैत्र
यभ्रांतिनिवर्तकज्ञानरहितत्वात् मैत्रस्मृतसर्वास्मर्तृत्वात् मैत्रानुभूतसर्वाननुभावकत्वाद्वा घटवत् विमतो बंधध्वंसः स्वप्रतीयोगितावछे
दकावछिन्नाधारप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवन्निष्ठः बंधध्वंसत्वात् संमतवत्। जीवः संसारी वा संसारध्वंसाधारो वा स्वज्ञानना
[illegible]ध्यजीवप्रतियोगिकभेदवान् स्वज्ञानाबाध्यसंसारिप्रतियोगिकभेदवान्वा स्वज्ञानाबाध्यसंसारध्वंसाधिकरणप्रतियोगिकभेदवान्वा पदार्था
[illegible]घटवत् विपक्षे बाधकस्य वद्प्रमाणत्वात्। नाभाससाम्यं। आत्मभेदमात्रे तु आत्मा आत्मप्रतियोगिकस्वज्ञानाबाध्यभेदवान् पदार्थत्वात्

या०
५५

[…]त। विमत आनंदः स्वनिष्ठदुःखविरोधित्ववर्ज्यधर्मेणात्मत्वजातीयप्रतियोगिकत्वज्ञानाबाध्यभेदवान् दुःखविरोधित्वात् दुःखाभाववत्।
द्यात्मैवं भवपक्षे आकाश आत्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधारविशेषगुणवत् विभुव्यतिरिक्तः द्रव्यत्वात् पृथिवीवदित्याद्यपि द्रष्टव्यं।
केचित्तु पृथिवीत्वं जल[…]त्वं तेजस्त्ववायुत्वमनस्त्वेतरद्रव्यत्वसाक्षाद्व्याप्यजातिभिन्नं मेयत्वात् जलत्ववत्। गगनत्वजातिवादिनं प्रति गगने[…]
रेत्यपि विशेषणीयं। न चोक्तजातिमत्पदार्थान्तरसिद्ध्यार्थान्तरं। लाघवेन क्लृप्ते धर्मिणि धर्ममात्रेणानुमानपर्यवसानात्। सत्त्वाद्रव्यत्वव्याप्यात्म
निष्ठजातस्यास्याद्रव्यत्वे वा साक्षादात्मनिष्ठजात्यन्यतमेयत्वात् घटवत्। आत्माणुत्वमते आत्मा द्रव्यत्वसाक्षाद्व्याप्यजातिमान् अविभुद्रव्यत्वात् पृथि
वीवदित्यादिभिरात्मत्वजातिसिद्धौ तात्विकात्मभेदसिद्धिः जातेर्धर्मिज्ञानाबाध्यभेदं विनायोगात्। अन्यथा व्यक्ताभेदः क्वापि दे[…]न स्यात्।
विपक्षे आत्मत्वस्य जातित्वे लाघवं औपाधिकत्वे तस्योपाधिज्ञानाधीनत्वेन गौरवं बाधकं। आकाशादिकं तु धर्मिग्राहकमानेनैकतयसिद्धमिति
नाको[…]वादिवज्जातिरित्याहुः। जीवानामन्योन्यभेदेऽनुमानानि। आत्माभेदे त्वन्योन्यसुखदुःखाद्यनुसंधानं स्यात्। न चोपाधिभेदो न तु संधाने
तंत्रं। हस्तपादाद्युपाधिभेदेऽपि अनुसंधानदृष्टेः नापि विच्छिन्नोपाधिभेदस्तत्र तंत्रं। मातृसुखादेर्गर्भस्थेनानुसंधानापातात्। उघतापुधदोंईसा
पतितस्वशिरोच्छिद्भिः पश्यंतः पातयंति स्म कबंधा अप्यरीन् युधीति भारतोक्तेः विच्छिन्नेऽप्यनुसंधानदृष्टेश्च। नाप्यतीतादिशरीरस्थिवशरीर राम
भेदस्तत्र तंत्रं। तद्देहेऽपि बाल्येहं दुःखीत्यनुसंधानस्य जातिस्मरस्य च जन्मान्तरेऽहं दुःखीति अनुसंधानस्य योगिनश्च नानादेहगतभोगानुसं १५५
धानस्य च दर्शनात्। न च वयं सदा वर्तमानतया अनुभवं स्मरणं वा अनुसंधानं ब्रूमः किं नाम कदाचित्स्वीयतयानुभवमात्रं। न च तन्नास्त्यतीते

सुखात्मे। नवांतःकरणरूपोपाधिभेदस्तत्र। वंघेपोगिनस्तांतःकरणमेक एवेति वाच्यं। चैतन्यैकं चेपि तत्रांतःकरणभेदादननुसंधानस्यासंप्रत्यया
पत्तिद्धत्वेन शरीरभेदवत्तच्चक्षुरादिकरणभेदस्यवत्तभेदस्याप्रयोजकत्वात्। तत्र न्मते प्रत्यहं सुषुप्तावंतःकरणात्तये विपूर्वे पुरहं सुखीत्य
नुसंधानाच्च। सुषुप्तौ लीनसूक्ष्मानामंतःकरणभेदाभावेन संसारिदुःखाद्यनुभवापाताच्च। नवांतःकरणैकत्वानेकत्वेनुसंधानाननुसंधान
योस्तंत्रे। मुक्तौ स्वरूपसुखाननुभावापातात्। अंतःकरणानानात्वेप्यनुसंधानस्योक्तत्वाच्च। न चाविद्याद्युपाधिभेदस्तत्र तंत्रं सुषुप्तौ
चाविद्या[illegible]तीति वाच्यं। उक्तरीत्या तन्न प्रागभावमेव दत्तानभेदस्याप्रयोजकत्वात्। पार्वतिज्ञा[illegible]नितावैतपत्तानानानीतिमते एकस्मि न्
विज्ञीवे ब्रह्मत्तविषयकात्तानानात्वभिन्नत्वाद्य। मुक्तस्य संसारिदुःखाद्यनुसंधानापायापाताच्च। न चाविद्यैकत्वानेकत्वे अनुसंधानाननुसंधान
योस्तंत्रे। मुक्तस्य स्वरूपसुखाननुभावापातात्। किं चानेकाविद्यासंबंधस्य दुःखानुसंधानरूपस्यानर्थस्य च विशिष्टगत्वे वंधमो[illegible]
करणापातेन शुद्धगतत्वे वा चैत्रदुःखे चैत्रीयदुःखानुसंधानवदेव मैत्रीयदुःखानुसंधानमिति कथमनुसंधानाननुसंधानव्यवस्था। एतेन विंवप्रतिविं
वयोरवदातत्व श्यामत्ववत् घटाकाशमहाकाशयोः परिच्छिन्नत्वापरिच्छिन्नत्ववत् एकस्मिन्नेव नभसस्तत्तत्करणापुराच्छेदेन तत्तत्सुखाद्यभावव्यवस्थोपाधि
भेदेन जीवब्रह्मणो रनुसंधानाननुसंधाने इति निरस्तं। दुःखानुसंधानरूपस्यानर्थस्योपहितनिष्ठत्वे तस्य कल्पितत्वेन वद्धमुक्तनिवृत्तिरेवं तं
मोक्षस्यापातात्। दुःखाद्यनुसंधानस्य साक्षिरूपतयोपाधिधर्मत्वाभावेन श्यामत्वादिवैषम्याच्च। प्रतिविंवस्य छायावद्वस्त्वंतरत्वे नाका
शस्यानुत्पन्नत्वेपि कार्यद्रव्यतयापातात्सावयवत्वे [illegible] तैजसाहंकारकार्यत्वे श्रोत्रवत् [illegible] तत्पवभिन्नत्वेन दृष्टांतासंमतेश्च। एतेनामेहिंयमनोपुरुषे ते

या० त्यादुरितिश्रुतेर्विशिष्टस्यैव भोक्तृत्वात्तस्य च भिन्नत्वाद्यवस्थेति चेन्मुमुक्षोर्निरस्ताशुद्धचिन्मात्रनिष्ठत्वे तत्र भेदाप्रतीत्या कल्पितभेदस्याप्यभा
वात्। भावे वा भेदस्यैव व्यवस्थारूपस्य कार्यकारित्वोक्तौ तु स्यात्तद्वत्तद्धर्मिणा नानात्वाध्यासे अभेदस्यैव व्यवस्थारूपस्य कार्यानुकूलत्वे तु स्या
२५६ दविशिष्टात्मनिष्ठस्यापि तादृक्कल्पितभेदहीनस्य मुमुक्षोस्संसारिदुःखानुभवापत्तावुक्तौ। एतेन मोक्षहेतुरनुसंधाने किं तु तादृक्कमते आत्मनिदुः
खाद्याश्रयता देहादिनैविहायाविविक्तमात्रेऽनुसंधानात्तत्राविद्याध्यायाधिनावच्छिन्नतरतिनिरस्तात्मते आत्मनः रवाचापि विविक्त एवा न[illegible]
येन ब्रह्मसुखित्वापादकस्य संसारिदुःखस्य सत्वेन तत्स्वरूपमुक्तेरपुमुर्थत्वापातात्। नित्यमुक्तत्वश्रुतेर्निर्विषयत्वापाताच्चाविविक्ते चेत
दविद्याश्रयमंगे। ननु किमयं शास्त्रीजीवा नामानुसंधानमापाद्यं अविद्यो ब्रह्मणो वा नाद्यः। हस्तावच्छिन्नेन पादावच्छिन्नदुःखाद्यननुसंधा
नात्। नान्त्यः। तस्याभोक्तृत्वेन भोगाप्रसंगात् दुःखादिज्ञानमात्रस्य च सर्वज्ञत्वात्स्मितिविशिष्टत्वादिति चेत्। न तावदाद्ये दोषः। न हि भो[illegible]
संकुर्यमापाद्यते येन पादे मे वेदना शिरसि मे सुखमिति न स्यात् किं त्वनुसंधानमात्रं तच्चांशत्रामाभ्येव। अन्यथा चैत्रदेहस्थकंटको दूरता
यमैत्रस्यैव पादस्थकंटकोद्धरणाय हस्तव्यापारेण स्यात्। न च पूर्वदोषो विवोपपत्तिः दुःखाद्यनुमाने पूर्ववत्करपादे रत्नपत्ते भात[illegible]न गा
वच्छिन्नस्यात्मनः शस्त्राद्यनुपलम्भवदेकशरीरविशिष्टस्य शरीरान्तरेऽनुसंधानमिति निरस्तं। योऽहं रूपमद्राक्षं सोऽहं शृणोमीत्यनुभवात्।
अवच्छिन्नः करणस्य तदवच्छिन्नस्य वानुसंधानत्वाच्च ब्रह्मणस्तदितिवाच्यं दुःखभोगस्य शुद्धब्रह्मगतत्वोक्तेः। एतेनानवच्छिन्ने अभातेव ब्रह्मणो रा०
अनुसंधानेनैवस्यान्तःकरणावच्छेदस्याभावान्नेनस्याहं दुःखीति भ्रांतिरूपमनुसंधानमिति निरस्तं कल्पितस्य कल्पितस्यवा दुःखभो २५६
गस्य शुद्धविदिन्गतत्वावश्यंभावात्। भ्रांतवीकाभि[illegible]स्यां भ्रांतत्वापि मा च। एतेनांतःकरणावच्छिन्नानन्यत्वसंधानमप्रति अविद्यावच्छिन्न

स्यांशितान्तरस्यैव च दुःखानुसंधानेन तदुपपद्यत इति निरस्तं। चिन्मात्रमेवानुसंधातृ फलत्वात्। अवच्छिन्नस्यानुसंधातृत्वे व्यवस्थात्रयानुस्यूतत
यावच्छिन्नस्यैवानुसंधातृत्वे न तद्दूरादपुद्गस्यानुसंधानापरिहाराच्च। अन्तःकरणावच्छिन्नस्यैवानुसंधातृत्वे विविक्ततस्यानुसंधानस्य तदवच्छेद्या
विद्यावच्छिन्ननिष्ठत्ववत् अविद्यावच्छिन्ननिष्ठस्यापि तदवच्छेदपञ्चनिष्ठत्वापत्तेश्च। एतेन पश्वास्वकर्तृपुरवच्छिन्नतादोपत्तेर्भेदविभागोऽत्रा
वच्छिन्नादानुपलंभः। तथा सुखदुःखाद्युपलंभानुपलंभाविति निरस्तं। आत्मभेदे कर्तृभिन्नं तत्तद्दीपवत्त्वनियमवत्। एकात्मवादे सर्वदे
हान्तःस्थप्रत्यक्तत्त्वदीपत्वाभावे न स्वीयकर्तृपुरुषावच्छिन्नतादोपत्तेर्भवत्सर्वदेहस्य दुःखाद्यनुसंधानस्य दुर्वारत्वात् [illegible]
तत्तद्दीपत्वेन शरीराणां तत्तद्दीपत्वं। आत्मैकोऽकर्मत्वामपि तत्तद्दीपत्वनियमायोगात्। शरीरनियमे न कर्मनियमेत्वमोन्याश्रयणात् तात
दुक्तेः सिद्धो हि कर्मभेदस्यस्याद्युपाधिविभिन्नता। तत्सिद्धौ चैव तत्सिद्धिरित्यन्योन्याश्रयापत्तेः। एतेन पक्षेन विदुक्तेन हृद [illegible] स्य
पाभेदसिद्धिः। व्यवस्थाशब्देन धर्मभेदोक्तौ एकस्मिन्नेकदैव सुखदुःखदर्शनेन व्यभिचारात्। तापि न्नाप्रयधर्मोक्तौ त्वन्योन्या। आपाततः
द्धर्मोक्तौ तु विरोधस्य सहानवस्थानरूपत्वे दुःखध्वंसप्रागभावरूपत्वे नानात्वरतिन्याये न भेदासाधकत्वादिति निरस्तं। व्यवस्थाशब्दे
नानुसंधानानुसंधानयोर्विरुक्तेः। तस्मादात्मैक्येऽपि सुखदुःखादिव्यवस्थानस्यादेवात उक्तं। सुखदुःखादिभोगश्च स्वरूपेकोऽनभेदत
त्मकपाधिभेदे विहस्त्यादादिगोपथा। नानादेहगभोगानुसंधाने योगिनो यथा न चैन्द्रोगानुसंधानं न दिव्यायोगिनः कुत इति उक्ते तान्त्र
नुसं[illegible]रहितमैकं चेदेकता न तन्ता। चेतन्यैक्येऽनुसंधानं प्रमाणं नैव चापरमिति। एवं बहुमुक्तं व्यवस्थापंडितमूर्खव्यवस्था चैतत्प्रमया

पा॰या॰ ब्रह्मद्वित्वे आनुभूतेमेवस्मर्यस्यतिरित्यादिव्यवस्था च न स्यात् । न च तत्तदुपाध्यपगमे तत्तस्य मुक्तिः उपाधिसंबंधस्योपहितनिवृत्ते आत्मान्यो
१५७ न्यचैतन्यकाध्यानवस्था स्यात् संयातात् । शुद्धनिश्चयेपि किमेकेकोपाध्यपगमो मुक्तिः उत सर्वोपाध्यपगमः । नाद्यः । सदा मुक्तिरेव न तु बंधः स्यात्
त् । नांत्यः । अमुना बंधस्यैवानेकस्यापि मुक्तिरित्यापातात् । त्वन्मते इदानीं कल्पितबंधवतः तत्वतो मुक्तत्वेपि यादृशः कश्चितो प्यनर्थरूपः सानेनानो
तव्यो बंधः तदुहितस्य मुक्तशब्दार्थस्याभावात् । तदेवं नोपाधिकभेदमात्रेणाबद्धमुक्तादिव्यवस्था मुक्तादि कोवोपाधे भेदका वमेवा युक्तं । …
उपाधिः किमेकदेशेन संबध्यते कृत्स्नेन वा आद्ये त्वन्मते स्वाभाविकांशाभावे नोपाधिकत्वे वाप्यनवस्था । अंत्ये न भेदकता । कृत्स्नस्यैकोपाधि
ग्रस्तत्वात् । एवं गगनादावविद्याभाविकांशा … कारे घटाद्युपाधिसंबंधो न स्यादेव । तदुक्तं । न चेदुपाधिसंबंध एकदेशे थ सर्वतः
एकदेशे नवस्थास्यात्सर्वगश्चेन्न भेदकः इति । आत्मभेदे उक्तं तर्कः ॥ ॥ जडेशभेदे जडजीवभेदे च ब्रह्मजीवौ वा नात्यप्रति … मिथ्या
त्वानावाध्यभेदवान् । पदार्थत्वात् घटवत् ब्रह्मजीवौ वा घटप्रतियोगिकधर्मिज्ञानावाध्यभेदवान् … संबद्धकालसंबंधित्वात् तदवद्दे
शसंबंधित्वात् तज्ज्ञनकाजन्यत्वात् । पटवत् । ब्रह्मजीवौ॰वा । जडप्रतियोगिकधर्मिज्ञानावाध्यभेदवान् । जडानात्मकत्वात् । … वम
पाहूरस्य च न स्यात्त्योरैक्ये विपरीते तु घटस्तिध्येव ब्रह्मसिध्यावेदानवैयर्थ्यं ब्रह्मणो जडत्वानित्यत्वाद्यापत्तिः । हृत्तिसमानाधिकरणसंसाराध्या
सजीवस्य जडवन्नित्यत्वापत्तिः । गोरोहमित्यादिज्ञानं च प्रमा स्यादित्यादिबाधकं । जडानाम् अन्योन्यभेदे तु घटः तत्वतः मुक्तोपि स्यान्न मुक्तिसं रा॰
बद्धकालसंबंधित्वात् तज्ज्ञनकाजन्यत्वात् शुक्तारोपितरूप्यवत् । परमतेपि व्यावहारिकभेदस्य सत्वान्नासिध्यादिशंका । अन्यथा भेदासिध्य १५७

मिथ्योर्दृष्टांतरभावयोश्चाभेदेन स्वक्रियाविरोधात् । अनात्मस्वावृत्तिधर्मानाधारत्वानावाध्यांतर्गतिकभेदवान् पदार्थत्वात् आत्मवत् । विपक्षे हेतुरस्य
व न स्यात् । तोः श्रुतिरूपयोश्चाभेदग्राहिप्रत्यक्षतत्त्वावेदकं स्यात् । तथा श्रुतिसोमादिसंकर्षं च स्यादित्यादि वाधकं । आत्मनां परस्परं आत्मानात्मनोश्च तत्त्वि
कभेदो अनात्मा स्वावृत्तिधर्माधिकरणप्रतियोगिकप्रतियोगितानावाध्यभेदाधिकरणं यत्स्वावृत्तिधर्माधिकरणं तत्प्रतियोगिकप्रतियोगितानाव
वाध्यभेदाधिकरणं पदार्थत्वात् आत्मवत् । परस्वावृत्तिधर्माधिकरणमात्मा न तोभिन्नात् आत्मांतरादि भिन्नत्वे न साध्यसिद्धिः । दृष्टांते तु स्वावृत्तिधर्मा
धिकरणं जडं न तोभिन्नात् तज्जडांतरात् भिन्नत्वेनाभेदस्य तात्त्विकत्वात् । प्रतियोगितानावाध्येति विशेषणं । जीवस्य ब्रह्मतो जीवाद्यजड [illegible]
पृथिवीब्रह्मप्रतियोगिकधर्मितानावाध्यभेदाधिकरणं यद्यत्वाद्यनधिकरणं तत्प्रतियोगिकप्रतियोगितानावाध्यभेदवती वस्तुत्वात् घटवत् ।
आत्मादीन्यादिशब्देन तत्र ब्रह्मादिनः प्रति तत्र ब्रह्मादिसिद्धः पृथिवीत्वादन्ये जडनिष्ठा धर्माविदिताः । पक्षे ब्रह्मभिन्नात् जीवादिभिन्नत्वेन [illegible]सिद्धिः ।
दृष्टांते तु ब्रह्माभिन्नात् पार्थिवादि भिन्नत्वे नेति ज्ञेयं । जीवस्य ब्रह्मजीवांतराभ्यां जीवाद्यजडस्य भेदे पृथिवीब्रह्मप्रतियोगिकधर्मितानावाध्यभेदाधि
करणं पदत्वाद्यनधिकरणमांतर्गतिकभेदवद्धु तत्प्रतियोगिकप्रतियोगितानावाध्यभेदवती वस्तुत्वात् घटवत् । अत्र जीवस्य जीवांतरात् अपि भेदा
र्थं पदं स्यादधिकरणमांतर्गतिकभेदवदिति विशेषणं । अत्र पक्षे ब्रह्मतः परस्परं च भिन्ना तज्जावात भिन्नत्वे न साध्यसिद्धिः । दृष्टांते तु [illegible]
परस्परं वि आत्मपार्थिवादि भिन्नत्वे नेति ज्ञेयं । जीवस्य ब्रह्मजीवांतराभ्यां जडस्य च जीवात् ब्रह्मणो जडाद्भेदे पृथिवीब्रह्मप्रतियोगिक[illegible]
र्मितानावाध्यभेदाधिकरणं पदत्वाद्यनधिकरणं आंतर्गतिकभेदवद्वत् प्रतियोगिकप्रतियोगितानावाध्यभेदवत्त्वे सति अ[illegible]

अ॰ या॰ करणसंसारिधर्मिकधर्मिज्ञानाबाध्यभेदप्रतियोगिजीवसत्त्वादंबुधरात्। अत्र च प्रब्रह्मणो जडादपि भेदार्थं पूर्वस्मादधिकं अत्याद्यनधिकरण
२५८ संसारित्वादिविशेषणं। अत्र पक्षे अत्याद्यनधिकरणसंसारिब्रह्मतद्धर्मिकभेदप्रतियोगित्वेन साध्यसिद्धिः। द्वितीये तु अत्याद्यनधिकरणत्वादि
रियार्थिवेत तद्धर्मिकभेदप्रतियोगित्वेनेतिज्ञेयं। भेदमात्रे तु ब्रह्मभेदहीनेनाविति दृष्टे स्वज्ञानाबाध्यभेदवत्त्वात् पदार्थत्वात् घटवत् —
त्वान्यज्ञानाबाध्यभेदाधिकरणं पदार्थत्वात् आत्मवत्। ब्रह्मभेदो न सर्वविषयात्मत्वाभावप्रतियोगी घटनिरूप्यत्वात् पटाभेदवत्। ब्रह्मज्ञानेनबाध्य
ध्यभेदस्वविषयज्ञानत्वाच्छुक्तिज्ञानवत्। घटे घटसंसर्गानवच्छिन्नप्रतियोगिताकपटादिधर्मिकत्रैकालिकाभावप्रतियोगी द्रव्यत्वात्
पटवत्। अत्र च विपक्षे बाधकाननुकूलत्वाभासत्वसाम्यादिति। एवं समानाधिकरणधर्मप्रागभावसमानकालीनज्ञान[illegible]त्वं भेदः
परमार्थसन् प्रातिभासिकत्वानधिकरणत्वे सति असत्त्वानधिकरणत्वात्। वा सत्त्वागोचरप्रमाप्रतिसाक्ष्याविषयत्वात्। आरो[illegible]तमिथ्या
त्वकत्वानकल्पकरहितत्वात् स्वविषयकसाक्षात्कारानर्वभावित्वाद्वा आत्मवत्। जीवब्रह्मभेदः परमार्थसन् अनादित्वात्[illegible]
वेषः। सुखदुःखादिभेदः परमार्थसन् अनिषेध्यत्वेन दोषाजन्यज्ञानेप्रतिसाक्ष्याविषयत्वात्। आत्मवत्। धर्मिधर्मप्रागदानादिभेदः पर
मार्थसन् प्रतीतावर्थविषयत्वात् ब्रह्मवदित्याद्यप्यूह्यं। अत्र वेदको द्वारोजगत्सत्यत्वानुमानप्रस्तावेकृतः इति भेदपक्षे चवके अनुमानानि। किंपद
द्युपतीय आत्मनि तिष्ठन् नित्यो नित्यानां चेतनश्चेतनानां अज्ञोत्येको ब्रुपमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्य इत्यादिश्रुतिभिः नैतदेवं राम
तिपुरुषमेवं कुरु कुलोद्वह। अन्यश्च परमोराजन्तेषामं। एवं च विशाकः भवेद्वा रास्य जीवस्य सत्यभेदो परस्परामित्यादिस्मृतिभिःभेदव्यपदेशा १५८

त्र भेदव्यपदेशाच्चान्यः। शारीरश्चोभयेपि हि भेदेनैनमधीयते इत्युपदेशादित्यादिभिर्निर्णायकसूत्रैश्च सिद्धो भेदः। न च श्रुतिरनुवादः। जग
त्सत्त्वश्रुतेरनुवादत्वप्रसंगाच्च। अन्यार्थं जीवत्वावच्छिन्नजीवभेदस्याप्राप्तस्या न हिंस्यादित्यादिवदनुवादकत्वोपपत्तेः। शास्त्रांतरस्थविधिवा
क्यस्यैव तु विशेषं प्रत्यर्थवत्त्वाच्च। तुयोः प्रणयनीत्यादिवच्चतुर्न्न मानमात्रयाहि प्रत्यक्षाप्राप्तकालत्रयाबाध्यभेदप्रापकत्वोपपत्तेश्च। ऐक्ये षड्विधतात्प
र्यलिंगवत्तराख्यार्थत्वाच्च। षड्विधेतिरित्येवत्रूपादित्यवत्प्रतिप्रसवार्थत्वाच्च। प्रत्यक्षस्याप्रामाण्येपि श्रुतेरनुवादकत्वायोगाच्च। श्रुतेः प्रत्यक्षनिरपेक्षा
नुवादत्वेन धारावाहिकद्वितीयादिज्ञानवत्प्रमात्वोपपत्तेश्च। विदुषाद्यावत्सप्रयोजनत्वानुवादत्वेन स्वार्थपरत्वाच्च। यत्र त्वेत्यादिनि[illegible]ता
लिंगाभावेन विधेयांतरश्रवणेन च निषेधार्थानुवादायोगात्। विधानार्थानुवादे चानुवाद्यस्य तात्त्विकत्वनियमाच्च। अनुवादत्वेपि यथा[illegible]र्थस्व
प्रामाण्याहानेश्च। किं चौपनिषदस्य ब्रह्मतत्त्वे शास्त्रेणाप्राप्ते सत्तुर्मिकवस्यतत्त्वप्रतियोगिकस्य वा भेदस्य कथं शास्त्रनिरपेक्षप्र[illegible]ताप्राप्ति
ः। तच्च शास्त्रसापेक्षप्राप्त्या शास्त्रस्यानुवादकता भेदमात्रस्य प्राप्त्यानुवादत्वे त्वघटेन घटैकाप्राप्त्यैक्यश्रुतिरप्यनुवादः स्यात्। भेदश्रुतेरनुवाद
कत्वभंगः। न वाननुवादत्वेपि बाध्यव्यावहारिकभेदपरा श्रुतिः। अप्रामाण्यापातात्। न चाभेदश्रुतिविरोधात्तदिष्टेः तस्मात्तत्त्वतायां विज्ञार्थवि
न्मात्रपरत्वे न भेदाविरोधि[illegible]सिद्धित्वात्। तावेव परिग्रहस्यापि सत्त्वं च त्वाच्च। यदि तु भेदश्रुतिः प्रत्यक्षाप्राप्तार्थत्वाद्दुर्बलात्तर्ह्यैक्यश्रुतिरपि तद्विरुद्धत्वात्त्र्या
स्यात्। मानांतरप्राप्तिवन्न ह्यविरोधस्यापि दौर्बल्यहेतुत्वात्। यदि चैक्यश्रुतिः प्रत्यक्षाविरुद्धे कार्यपरा तर्हि भेदश्रुतिरपि तदविरुद्धे विका[illegible]
भेदपरास्तु। न च षड्विधतात्पर्यलिंगवत्त्वादैक्यश्रुतिः प्रबला लिंगानां तात्पर्यमात्रज्ञापकत्वेनार्थतथात्वाज्ञापकत्वात्। स्वीकृतं च भे[illegible]श्रुति

यायाः० रज्जुसर्पादकत्वं ब्रुवतां त्वयापि भेदपरत्वं। अस्तिरत्रापि श्रुतिरनश्नन्पूर्णः परो जीवसंयोगम् पूर्ण इत्याद्यपत्रिरूपं। स त्वं भिदा सत्वं भिदा सुतां
१५९ त्पादावभ्यासादिरूपं वचतात्पर्यलिंगं। तदूहूर्वं चत्वमस्येप्रमाणसंभव वदद्वार्थभिन्नकं। वस्यतेच भेदश्रुतेरपि षड्विधलिंगवत्त्वान्निषेधवाक
दैवाश्रुतिः प्रबलेति निरस्तं। किंच भेदश्रुतेर्वैकापतिषेधरूपः। किंच भेदश्रुतिरेव प्रबला नुपसंजातविरोधित्वात्। प्रत्यक्षादिसंवादात् इति वेका
शत्वाद्। उक्तं हि। स्वातंत्र्येच विशिष्टत्वे स्थानमत्यैकरूपयोरपि सार्वप्येचैकवाक्यस्यकत्वावकाशा यथेष्टत इति। किंचाद्वैतभेदो तथा व्यावहारिकः मु
क्तावपि भेदस्यस्मृतेः श्रुतेश्च। नच सामुक्तिरवाङ्मनसगोचरं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायंते प्रलये न व्यथंति चेत्यादि स्म
तौ सर्गाद्यभावोक्तेः। तथा च मायाविमुक्तापरे हरेरनुव्रता यत्र सुरासुरार्चिताः श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशस
इति स्मृतौ मायानिषेधात्। यो वेद निहितं गुहायां सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेत्यत्र श्रुत ब्रह्मतो न फलत्वोक्तेश्च। त्वया विशुद्ध
ब्रह्मविषयत्वेन वीकृतायाम् भूमविद्यायाः फलोक्तावपि सर्वेतस्य सर्वेषु लोकेषु कामचारो भवति स एकधा भवति यंचधा सहस्र [illegible] णा
परंज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षत्क्रीडन्रममाणा इत्यादौ स्वरूपाभिव्यक्त्युक्तेश्च। तदा विद्वान्पुण्यपापे वि
धूय निरंजनः परमं साम्यमुपैतीति कर्मत्वयोक्तेश्च। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः। एष मात्मानं प्रेरितारं च मत्वा
जुष्टस्ततस्तेनामृतत्वमेतीत्यादौ भेदज्ञानेन मोक्षोक्तेश्च त्वन्मते विभेद भोगादिविरहेण फलाश्रयानुपपत्तेः स्येषु जगद्व्यापारवर्ज संकल्पादे राम
र्भुक्तेर्भोगमात्रसाम्यलिंगेत्यादिसूत्रेषु अकांतमुक्तब्रह्मविद्याफलस्यैव व्याख्यातत्वाच्च। भेदश्रुतेर्व्यावहारिकभेदपरत्वभंगः। किंच पूर्वतंत्रेद्विती १५९

पार्थक्येयैः शब्दान्तरादिभिः कर्मभेद उक्तो नैवं जीवेश्वरभेदसिद्धिः । एष सर्वज्ञो जीवं प्रबोधयति एतस्माज्जीव उत्तिष्ठतीति विरुद्धार्थधातुनिष्पन्नाख्यात
शब्दान्तरस्य नित्यः पर्वतो नित्यो जीवद्रस्य प्रत्यभिज्ञायमानत्वात् पुनः प्रकृतिरूपाभ्यासस्य द्वा सुपर्णेत्यादि संख्याया अनश्नन्नित्यादेर्भेदकस्य गुणान्तरस्य च
तो वाचो निवर्त्तन्त इत्यादि प्रकरणान्तरस्य जीवेशादिनामधेयभेदस्य च सत्वात् । जीवेशभेदे शब्दान्तरादि । सेति च भेदश्रुतेस्तद्विषयहि धतात्पर्यलिंगानि
। तथाहि । आथर्वणे तो द्वा सुपर्णेत्युपक्रमः । परमं साम्यमुपैतीत्युपसंहारः । तयोरन्यः अनश्नन्नन्यः अन्यमीशमित्यभ्यासः । शास्त्रैकगम्येश्वरअत
यौगिकस्य तद्भिन्नस्य वाकात्तत्त्रयेणाबाध्यभेदस्य शास्त्रं विना अप्राप्तेरपूर्वता । तपापाये विधूपेति फलं । अस्य महिमानमेतीति [illegible] वा
दः । अति अनश्नन्नित्युपपत्तिः । अत्र च मायामात्रमिदं द्वैतमित्याद्य विवद्धिशब्द एव भेदवाचकः तदाक्षेपको वाद्वित्वसंख्येव कथं विरोधिनी तत्पक्र
मो भेदविषयः । तस्मिन्नन्नविशेषितमेव च तन्निष्ठवद्धधर्मयोगित्वं तत्सादृश्यं न तु विशेष्यमात्रं नायं सः किंतु तत्सदृशः नायं तत्सदृ [illegible] एवे
ति सादृश्ये कायोरेकतरविधानायान्यतरनिषेधात् । गगनं गगनाकारमित्यादि तु तत्सदृशः वस्त्वन्तरनिषेधपरं । गगनाद्येकदेशस्य तदेकदेशसा
दृश्यपरं वेत्युपसंहारे विभेदपरः । अभ्यासत्वे चार्थतएकप्रकारत्वं तन्त्रं न तु शब्दतो निष्प्रसंगात् । यस्य त्वन्यमीशमित्येव शगतान्यत्वप्रतिपत्ति
निष्प्रतोऽजीवः यदि जायेन प्रतियोगितया सेतं ध्यन्तरतिसिद्धोभ्यासः । एवं वेत्थ त्वं काप्य तमन्तर्यामिन इत्युपक्रमः । एष त आत्मान्तर्यामी [illegible]
से तरः । एष त आत्मान्तर्याम्यमृत इत्येकविंशतिकृत्वोऽभ्यासः । अन्तर्यामित्वस्याप्राप्तत्वादपूर्वता । स ब्रह्मविदित्यादि फलं । तद्वेत्थ यावत्स वल्कास तन्यधि
ष्ठितं तर्यामिणं ब्रह्मन्गवीरस्त्वं सेन्मूर्धा ते विपतिष्यतीति निंदारूपोऽर्थवादः । यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्याद्युपपत्तिः । एवं च

न्या॰ पा॰ तिभेदपरेतिसूत्र हत्तैवोक्तं। शारीरस्त्वोभयेपिहि भेदेनैनमधीयत इतिसूत्रे भेदपरमिति त्वयापि विभाषितत्वात्। भेदश्रुतेः षड्विधतात्पर्यलिंगा
१६० नि। किंच तिष्टतु भेदः ऐक्यं किमात्मस्वरूपं उतान्यत्। नाद्यः। पर्यायत्वैकतरपरिशेषायापत्तेः। सापेक्षत्वैकस्यनिरपेक्षात्मरूपत्वायोगाच्च।
स्वप्रकाशस्यात्मनो विद्यादिसाक्षित्वेन स्वरूपप्रकाशमानत्वेन शास्त्रवैयर्थ्याच्च। न च तन्मतेः पर्यायत्वादिनिर्वाहको विशेषोस्ति। नचभेद
निरासार्थं शास्त्रं अधिष्ठानप्रकाशं विना भेदस्य भ्रमस्यैवायोगात्। स्वरूपप्रकाशेन प्रकाशमानेप्यात्मनि अज्ञानविरोधित्वस्वभावात भ्रमदर्शि
तेऽअविद्याविभ्रमभंगे निरस्तं। अन्येप्यैक्यं सत्यं मिथ्या वा। आद्ये द्वैतहानिः। अभावद्वैतेऽभावद्वैते अभावस्याधिकरणमात्रत्वे च प्रागेव नि
रस्तं। भेदाभावोपलक्षितआत्मैक्यमिति पक्षेपि न युक्तं। उपलक्षणीभूतभेदाभावस्य सत्वे द्वैतहानेः। मिथ्यात्वे द्वितीयेंतर्भावात्। द्वि[illegible]तत्व
मसीत्यादेरतत्वावेदकत्वापातात्। भेदस्य सत्यत्वापत्तेश्च। किंवान्यत्पक्षे ऐक्यं किमेकत्वसंख्या तन्निष्ठसकलधर्माश्रयत्वं वा तन्निष्ठा धा
रणधर्माश्रयत्वं वा भेदाभावो वा। तदनिष्ठधर्मानधिकरणत्वं वा। नाद्यः। निर्धर्मके ब्रह्मणि तत्वतः संख्याद्यभावात्। न चतुर्थः। [illegible]
वरूपत्वेनान्योन्याश्रयात्। नवं च मः। शून्यस्यापि ब्रह्मैक्यापातात्। विशेषनिषेधे शेषाभ्यनुज्ञानेन सधर्मकत्वापातात्। किंवा भेदे अभे
दत्वपारमार्थिकत्वासहैलक्षण्यादीनि तत्वतः संति चेत्तैरेव सद्वितीयत्वं नचेद्भेदत्वादिहानिरिति। नचैक्यस्य दुर्वचत्वेप्यात्मस्वरूपमात्र
मबाधितमिति वाच्यं। तन्मात्रस्य संमतत्वेन तत्वज्ञानशास्त्राविषयत्वात्। भेद एव दुर्योस्माकं न तु भेदः। साधयरतितु निरस्तं। ऐक्यस्वरूपभंगः॥ ॥न्या
पद्वैदुच्यते। जीवब्रह्मभेदे तत्वमसीत्यादिश्रुतिर्मानं। यद्यप्यत्र सार्वज्ञासार्वज्ञादिविविधविरुद्धयोस्तत्वंपदवाच्ययोरैक्यं जरद्गवादिवाक्य १६०

त्वयोग्यताविरहात्त्वयुक्तं तथापि सोयं देवदत्त इत्यादिवत्तद्विरुद्धांशत्यागेन लक्षितयोरैक्यमुक्तं। उक्तं हि। पुष्पदन्तस्य हि भागत्वे स्यादर्थवदिदं वचः। अ
न्वमितेनर्थकं स्याद्दुःखरेखेव गायनमिति। एवं च नवप्रकारतो बद्धिधतात्पर्यलिंगवत्त्वाद्ब्रह्मपरत्वं तथा हि। एकमेवाद्वितीयमित्युपक्रमः। तत्त्व
मसीत्युपसंहारः। तत्त्वमसीतत्त्वमसीति नववारं त्वोऽभ्यासः। जीवब्रह्मैक्यस्यान्यतोऽप्राप्तत्वादपूर्वता। अथ संपत्स्य इति फलं येनाश्रुतं श्रुतं भव
तीत्यादिरर्थवादः। मृत्पिंडादिदृष्टान्तैरुपपादितत्वादुपपत्तिरपि। एवं विमता आत्मानः परमात्मनो न तत्त्वतो भिद्यंते आत्मत्वात्परमात्मवदित्याद्य
नुमानान्यपि चेति। अत्र क्रमः। विरुद्धाकारत्यागः किमविद्यामात्रेण तिरस्कृतत्वेन वा मिथ्यात्वेन वा। नाद्यः। विरुद्धाकारस्याविद्यायाम ... नां
नहि असद्वा इदमग्र आसीत् सदेव सौम्येदं ब्रह्मेत्यादिश्रुत्या सत्त्वस्यान्यत्वयोर्बाधितजडत्वयोर्वा अविद्यामात्रेण ब्रह्मणोऽद्वैतं हेतोः शून्येन जडे ... मंकि
स्वचेतनद्वितीयः। तथात्वेन त्वमभविष्यसीति निर्देशापत्त्यासीति वर्तमाननिर्देशायोगात्। नादृशाभेदे न भेदाभेदपोसत्त्वापत्त्यात्वायाप्यनंगीकाराद्धा। जी
वेशयोः स्वातंत्र्यपारतंत्र्यादेर्नित्यत्वश्रुत्यादेरुक्तत्वाच्च। न तृतीयः। निर्दोषश्रुतिसाक्षिसिद्धयोर्विरुद्धधर्मयोर्मिथ्यात्वायोगात्। दिस्फुक्तत्वात् ... प
मित्यादौ तु तत्त्वादेर्न त्यागः। इममेतौ कव्रततत्रेदं तयोरविरोधादित्युक्तेः। किंचैकश्रुत्याप्रत्यक्षसिद्धं जीवमनूद्य तस्य ब्रह्मत्वं वाश्रुतिसिद्धं ब्रह्मचानूद्य तस्य
जीवत्वं वाऽभ्याऽयात्तु वानेत्यभेदो वा विधेयः। सर्वथाप्युपजीव्यविरोधान्न केवलप्रामाण्यं। प्रत्यक्षेण जीवस्य ब्रह्मतोऽभिन्नत्वेन श्रुत्या च सर्वज्ञत्वादिना
ब्रह्मग्राहिणा ब्रह्मणा सर्वज्ञत्वेनानुभूयमानाज्जीवाद्भिन्नत्वेन ग्रहणात्। उपजीव्योपजीवकयोर्हि विरोधे न तावत्तद्वयोः प्रामाण्यं। व ...
रूपान्यायात्तात्। नापि द्वयोरप्रामाण्यं। वस्तुनो निःस्वभावत्वापातात्। नाप्युपजीव्यस्यैवाप्रामाण्यं दुर्बलेन प्रबलबाधायोगात्। तस्मात्तु शिष्टा

न्याया० डपजीव्यकस्यैवाप्रामाण्यं । तदुक्तं । शास्त्रगम्यपरेशानाभेदः स्वात्मनेर्ष्यते । अनुभूतिविरोधेन कथमेकत्वमुच्यते । सार्वज्ञादिगुणोपजीव्याद्भिन्नत्वा
पपविष्कृतिः । न शक्तानुपजीव्ये वर्वर्त्तते नैकोवादिनीतिरीश्वरस्यानुपमेयत्वेप्युपजीव्यविरोध एव । अनुमित्याविततस्य सर्वज्ञत्वादिनैवसिद्धेः
१६१ नचैवं निषेध्यार्पकं नेदं रूप्यमिति धीरपि नेदं रूप्यमित्यस्योपजीव्या स्यादिति वाच्यं । पयरवेदं यस्य बाधेस्य स्यापि बाधायत्तिस्तत्र स[illegible]
मिहातद्वयद्धर्मी द्विग्राहकं स्वप्रामाण्यापद्विग्राहकत्वस्य तदेव न तु निषेध्यार्पकं । न हि स्वस्वरूपधर्मिज्ञानाप्रामाण्ये । पेक्षज्ञानाप्रामाण्ये च
वस्याभेकज्ञानाप्रामाण्यवत्प्रतिषेधज्ञानाप्रामाण्ये निषेधज्ञानाप्रामाण्ये प्रतिषेधशास्त्रलोपापातात् । नचेदं रूप्यमिति धीरपि धर्मिग्रा
हित्वेनोपजीव्या । धर्मिताऽवच्छेदकस्यापि नेदं रूप्यमिति प्रत्यक्षेणावसिद्धेः । न चाजीवोपितत्वमस्मादिवाक्यसिद्धः । अप्राप्ते शास्त्रम[illegible]र्थवत्त्वा
त् । अस्तु वेदं रूप्यमिति धीरपि धर्मिग्राहकत्वेनोपजीव्या । तथापि नेदमित्यत्र इदमंशमात्रे धर्मि न तु रजतत्वविशिष्टे इदमंशमात्रे रूप्य
त्वनिषेधेनैवेष्टसिद्धेः । एवं च प्रकृते उपजीव्ये तत्र बाध्यं चिदंशस्याबाधात् । एतद्बाध्यं रजतत्ववैशिष्ट्यं न तदुपजीव्यं रजतत्वविशिष्ट[illegible]वि
त्वानत् । नन्वेवमेकोपि ब्रह्मस्वरूपमात्रे धर्मि न तु सार्वज्ञादिविशिष्टं । एवं च प्रकृते उपजीव्यं न तद्बाध्यं यद्बाध्यं न तदुपजीव्यमिति चेत् । किं सा
र्वज्ञादिनाभावरूपेण । असंसारित्वादिना अभावरूपेण वा । असाधारणधर्मेण ब्रह्मोद्देश्यं चित्त्वादिना साधारणधर्मेण वा । स्वरूपेणे राम
व वा । आद्ये सुतरामुपजीव्यविरोधः । द्वितीये चितराचजीवैको सिद्ध्येत् ब्रह्मणः । न चेष्टमपि संमते । न तृतीयः । शब्देनासाधारणब्रह्म १६१
स्वरूपे उद्देश्ये साधारणधर्मेणाविना सिद्ध्योपजीव्यविरोधस्यानारवस्थानात् । साधारणस्वरूपोद्देशे च ब्रह्मैक्यासिद्धेः । एतेन नन सर्वज्ञ

दिवाकारासिद्धं ब्रह्मधर्मि किं तु निर्गुणत्वादिवाकारासिद्धमिति निरस्तं तत्सिद्धस्याप्यकल्पकपद्मावहिर्भावात् निर्गुणत्वादिवाकारेणापि धर्मिग्राहकविरोधे
न गुणनिषेधासंभवात्। एतेन सार्वज्ञाद्युपलक्षितो धर्मीति निरस्तं। जीवव्यावृत्तब्रह्मत्वस्योपलक्षणत्वावच्छेदकत्वे धर्मिग्राहकविरोधात्। वि
त्वस्यतत्त्वे सिद्धसाधनता। सोपदेशे वस्त्वन्तरस्यादेशे तु नत्राविशिष्टपक्षवोद्देश्यः पद्मन्तरयाज्ञातपवपदन्वयधीः तत्त्वरूपविशेषणत्वस्यतत्रादेः संभवा
दितु चेत्। न च प्रकृतेपि संसारित्वेन ज्ञाते ब्रह्मणि बाधीः तद्ज्ञानस्य प्रमात्वे ब्रह्मणि वाधीमाता श्रमत्वे चोपजीव्यस्योपजीवके नवाधापातात्। पुरो
शाकपाले न तु षाण्मुपवयतीत्य वाधिष्टाने लक्षणायामपि न दोषः। तत्रापि तु वोधपवायवस्य नान्यतो प्राप्त्या न ततुषो पवाय विधाने [illegible] चेत्:
रहतु वितोज्ञी वेद्यो न नेष्ट सिद्धिः। एवं चावितः चिन्ते कं सिद्धं नः सार्वज्ञादिविशिष्टपोः स्ये कंतु धर्मिग्राहिप्यो भ्रूत्पत्ताभ्यां विरुध्यते। [illegible]स्यथा
परमाणवः सावयवाः ईश्वरो सर्वज्ञः इत्यादिस्यो प्रपद्यत्वादावपि उपजीव्यविरोधो न स्यात्। उत्पत्तिशिष्टगुणाविरुद्धगुणावि[illegible]ज्ञाकावि
रोषश्च न स्यात्। तत्रापि परमाणुत्वादिविशिष्टो न धर्मी किं तु स्वरूपमात्रमिति सुवचत्वात्। निरवयवत्वादिना विना परमाण्वादेर्धर्मीकरणा
मेव न सिध्यतीति चेन्न समं प्रकृतेपि सर्वज्ञत्वादिना विना ईश्वरस्यापि धर्मीकरणासिद्धेः। आरोपितेन सार्वज्ञादिनाव्यावृत्तं धर्मीति चेत्तर्ह्यारोपि
तेन निरवयवत्वादिनाव्यावृत्तो धर्म्यस्तु निरवयत्वादिग्राहिणः प्रमाणत्वान्नतथेति चेन्न समं प्रकृतेपि। एतेनैकाग्रते जीवान्यतब्रह्मनी[illegible]न्य
त्रतान्यर्थमिति निरस्तं। निरीश्वरवादे तन्मात्रेन बहुश्रुतिविरोधात्। परे तु सार्वज्ञासार्वज्ञादिके विरुद्धधर्मवत्त्वपविचित्वादिनैकोविभागा[illegible]
न्मादि संमतं। एतेनैकश्रुतेर्लक्षणायापिमात्रपरत्वेनैकपरत्वाभावात्र तस्य धर्मिग्राहकत्वेन श्रुत्यादिकमुपजीव्यं न वाधतद्विरोधः इति

न्याया० तिरस्तोद्दुष्टायत्वेः। यद्रूपेण न विनाश्यस्यात्‌ तद्रूपेनैतत्त्वस्योपजीव्यत्वं इदं रूपमिति धीश्च प्रतिबध्यार्थकतयोपजीव्यैव तथापि न दोषः। तद्रूपस्यो
१६२ प्यत्वमेव प्रावल्ये तंत्रं किं तु परीक्षितत्वविशिष्टं। न चाविशिष्टस्य व्यभिचाराद्दृष्टिविशिष्टमप्रयोजकं भवति। परीक्षा च न तावत्प्रतिबध्यार्थविषु
क्तिरूपा भेदज्ञाने शेषिता। तद्भ्रमे तेपि तस्याव्यावहारिकप्रामाण्यापातात्‌। इह तु निषेध्यार्थ[illegible]कापि मे दश्रुतिसाक्षिप्रत्यक्षे च न विरोधित्वात्प
रीक्षितं तद्रूपमेव च दोषाभावादिज्ञानरूपपरीक्षायां च नाभ्यासे प्रमाणतदाभासयो[illegible]वस्थानस्यादिप्यक्तेः। प्रत्यक्षप्रावल्यप्रस्ता
वे। यद्यपि धर्मपर्यंके इदं ज्ञानांशे परीक्षितत्वविशिष्टं उपजीव्यत्वमस्ति तथापि न तद्बाध्यं इत्यनुपदमेवोक्तं। तदुक्तं। अप्रमेयप्रमे
गोक्षितमात्रमुपजीव्यं तु बाधकज्ञानवृत्तिः स्यात्‌ अत्रैव तु परीक्षितं इति तस्मादुपजीव्यविरोधात्‌। उत्पत्तिवाक्यवित्तात्तर्कमेवं सर्वमन्न
यते। न चाश्रितगुणलेशकेन तद्विरोधिगुणांतरमिति वार्त्तिकोक्तरीत्या श्राविज्ञानाकोपजीवकस्य वाक्यस्य न वाक्यस्य तद्विरोधिगुणा[illegible]विधाय
कत्ववत्प्रत्यक्षोपजीवकस्य यजमानः प्रस्तर इत्यादेः साक्षिरूढयजमानत्वाबोधकत्ववद्वत्तत्त्वमस्यादिवाक्यस्याद्वैतबोधकतापुक्तौ तदुक्तं।
यजमानप्रस्तरत्वं यथानार्थः श्रुतेर्भवेत्‌। ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविरोधत इति यजमानप्रस्तरादि[illegible]वाक्यान्तर्ग्रन्थाश्रुतेर्वैषम्यं स्तका
तप्रत्यक्षस्य शब्दाबाध्यत्वप्रसंगावेनिरस्ता। नेवं भेदश्रुतेरेकाश्रुतिरुपजीव्याधर्मिणा जीवस्य प्रत्यक्षेणेश्वरस्य च सर्वज्ञत्वादिवाक्येन ग्रा
वधीप्रामाण्यादेष्वप्रत्यक्षे रोधवक्षिडे। तस्य च सर्वस्य भेदानुगुणत्वात्‌। प्रतिबध्यार्थकविरोधस्य च प्रतिबंधशास्त्रप्रामाण्यानापादक राम
त्वादित्युक्तत्वात्‌। श्रुतिविन्नैवैकप्रामाण्यमात्रत्वाद्‌। एकश्रुतेस्तन्निबंधप्रसक्तिर्भेदश्रुतिप्रत्यक्षाभ्यामेवात्‌। तत्पक्षेपि हि भेदश्रुति १६२

यपि निषेधार्थकैवनत्तुसत्यचिन्मात्रपरा। तत्त्वावेदकत्वापत्तेः निषेधार्थकमपि परीक्षितं चेत् नबाध्यमित्युक्तं। एतेनेतानभेदं नोल्लिखंती धीर्नभे
दोल्लेखनं तन्मात्रथा चाद्येप्रमाणसाम्यात्। तेस्वाप्ने स्वं वेशसादिति निरस्तं। तदुक्तं। नोपजीव्यो ह्यभेदोत्र ह्युक्तविभेददृष्टेर्न वृत्वादिति। एकाग्रता तेरू
पजीव्यबाधः। किंच तत्त्वमसि तेपदद्वये लक्षणात्तनोवरं मद्वीतैकरस्यं सत्स्मरेत्वंपदे वा अस्तु व्यावृत्तिः। तथाहि धान्यमसि धिनुहीत्यत्र तंदुले धान्य
शब्दवत्। तदधीनत्वात् तदिति व्यपदेशः। प्राणं वै धनं हि सोम्यमन इति वाक्यशेषे जीवस्येशाधीनत्वोक्तेः। परधीनापस्यसत्त्रात तत्तदित्येवभण्यते।
विद्यमानेविभेदेपि मिथो नित्यं स्वरूपतः इति भारतोक्तेः। पट्वानत्साहचर्यात्तदिति व्यपदेशः। वसंतादिभ्यष्ठगित्यत्र साहचर्यात्ताच्छब्द्यं वसंतसह
चरितमध्ययनं वसंताध्ययनमिति महाभाष्योक्तेः। प्रसिद्धं च जीवस्य ब्रह्मसहितत्वं। द्वा सुपर्णा सयुजा सखाय इति। पद्धात तदाश्रितत्वात्तदिति व्यपदेश
ः। समर्थः पदविधिरित्यत्र समर्थपदाश्रितत्वात्पदविधिरुपचारेण समर्थ उद्देनोच्यत इति महाभाष्योक्तेः। सर्वाः प्रजाः सदायतनाः इति वाक्य
शेषाच्च। अथवा ब्राह्मणोस्य मुखमासीदित्यादिवत् ततो जातत्वात्तदिति व्यपदेशः। इग्यणः संप्रसारणमित्यत्र काका ज्ञातः। काकः श्येनो ज्ञातः
श्येनः एवं संप्रसारणाज्ज्ञातो वर्णः संप्रसारणमिति महाभाष्योक्तेः। सन्मूलाः सोम्येमाः सर्वाः प्रजा इति वाक्यशेषाच्च। ब्राह्मणो मुखमित्येव
मुखाज्जात त्वं हि तत्त्वं। यथावरत्त श्रुतौ तद्वेजीवो ब्रह्मेति वा भवेदिति स्मृतेश्च। अथवातिदेशोयं तद्वत्त्वमसीत्यर्थः। वरुणलोकादित्यन्नवरुण
लावतुउत्तायः संख्यावाद्ववेति श्रुतेरेण प्रिवतिमतिदेशो गम्यते। अब्रह्मदत्ते ब्रह्मदत्तशब्दस्याहतेवर्ध्य मन्यामहेब्रह्मदत्तवदयं भवतीति
भाष्योक्तेः। सरूपादिनैमिनि सूत्रे आदित्यो यूप इत्यादिकं सारूप्यादि स्तुकृत्वाद्वातद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति ब्रह्मसूत्रेच

न्या॰या॰ लगुणाद्योगाच्छीवेतदिति व्यपदेशः तत्पत्तत्वाच्च। भिन्नाज्जीवात्परो भिन्नस्तथापि ज्ञानरूपतः। प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वशः इति स्मृतेश्च। अथ
१६३ यांतत्त्वमसीति वाक्यमबोधकं स्यात्। यथोक्तं महाभाष्ये योगमश्च इति कृपान्नज्ञातु चित्सं प्रत्ययः स्यादिति। यद्वा शाखासदेशे चन्द्रे शाखाशब्दवत् जीवं तत्
पदमितया जीवसदेशे ब्रह्मणि तत्त्वमिति व्यपदेशः। यत्राप्यन्निति ष्ठन्नित्यादिश्रुते। यद्वा ब्राह्मणो वै सर्वा देवता इत्यादिवत् जीवाश्रयत्वाद् ब्रह्मणि
त्वमिति व्यपदेशः। यद्वा ब्रह्मणः सर्वकर्तृत्वात् यज्ञमानं प्रस्तरः इत्यादिवत् तत्सिद्ध्यात्वमिति व्यपदेशं वेच। तदधीनत्वतादृश्यतात्स्यात्ता
द्धर्म्यपूर्वकैः निमित्तैः सत्त्वमप्यस्यादिसामानाधिकरण्यगीः। न चैवे मुख्यार्थत्यागे दोषः। अतत्पदमिति त्वमित्यादेर्मुख्यतापावसमात्वात्।
तद्रीत्यापरत्वम्य लक्षणतो मद्रीत्यापकपदलक्षणायाम्यापत्तेश्च। किंवा जहदजहल्लक्षणायां वाच्यांतर्गतत्वेन प्राग्धीस्य परस्य नेतरम
नुपपत्तिदर्शनेन त्यक्तस्यपुनः स्वीकारः। जहल्लक्षणायां तु अधीस्य प्राप्य त्यक्तस्यैव स्वीकारः। सत्त्व स्वीकारादपि वरं अधीस्य स्वीकारः। अप
वेच। एकस्या मुख्यवृत्तेर्वतत्त्वमित्यसंभवे। पदेनैवेकपरता नेकलक्षणा या कुतः। न च सदेवेत्यादिवाक्ये लक्षणा प्रकृते पुरुषे प्रकृतेस्त
चितत्पदस्याभिधेवेतिवाच्यं। पुरुषस्यावाच्यत्वात्। तदित्येकपदलक्षणाया निरासायतदैक्षत तत्तेजोऽसृजतेत्याद्यनेकपदलक्षणायोगाद्
यद्वा सर्वं खल्विदमित्यादि सन्नातत्ततीयाविभक्त्यादेर्लुक् प्रथमैकवचनादेशो वा। ततस्त्वं तेन त्वं तिष्ठसीति वा तत्त्वं जातः इति वा तस्यत्वमिति वा
तस्मिंस्त्वमिति वार्थः। अनेन जीवेनात्मनानुप्रविश्य वेधीयमानो मोदमानः क्षिपति स नम्रत्वात्। सौम्येमाः सर्वाः प्रजा एतदात्म्यमिदं सर्वमित्या राम॰
दिवाक्यशेषात्। मीमांसकैरुक्तं यत्तत्त्वं वेति ताभिधेनीसत्तद्वाकुरित्यत्र पत्रस्तत्त्वं वेतितत्र हविर्धाने स्थित्वा ताभिधेनीरनुब्रूयादिति सप्तम्यर्थे १६३

ऽपृथगास्वीकाराद्वान्याय्यंचनिरवकाशप्रधानभूतानेकप्रातिपदिकस्वारस्यापसंख्यार्थत्वेनसावकाशाप्रधानैकविभक्तिस्वारस्यं।प्रोहाद्तहणपक्षि
त्यत्रविभक्त्यंतरेप्रथमैकवचनस्यैवषष्ठीवहुवचनस्याप्यत्राविधानात्वहुवचनानुसारेणप्रातिपदिकस्यप्रक्षीत्राविहितोगेषुत्तहताश्रि
ता।३।एवंचप्रयाजशेषेणहवींष्यभिघारयतीत्यत्रप्रयाजशेषप्रातिपदिकस्वारस्यापप्रयाजशेषंहविःषुप्रक्षिपतीतिविभक्तिस्वारस्यं।एवंच।
अवकीर्णोक्तिता।नैकमुख्यनामानुसारतः।उक्तोऽताहग्विपक्षेऽहिंबाधः।प्रयाजशेषवत्।एतदात्म्यत्वमित्यर्थेनतत्त्वमितिसमस्तंपदं।एतदायेतदा
त्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसीत्यनेननात्मापरामृश्यते किंत्वेतदात्म्यं नपुंसकलिंगत्वात्।एतदात्म्यमित्यस्यचैषवासावात्माचैतत
दात्मानस्येदमेतदात्म्यं एतदीयंवस्तुत्वमसीत्यर्थः।परमतेपिएतत्सत्आत्मापस्यतदेतदात्म्यमितिव्याख्यातत्वात्भावप्रत्ययोवार्थः।ततो
वरमर्थंतराश्रयेवसंहर्त्राविधंतारक्षिताहरिः।तेनव्याप्तमिदंसर्वंवैतदात्म्यमतोविष्णुरितिस्मृतेश्च।केचित्तुशरीरवाचिनोदेवमनुष्यादिशब्दा
नांशरीरिपर्यंततत्त्वदर्शनात्जीवस्यचयस्यात्माशरीरमित्यादिश्रुत्येश्वरशरीरत्वात्तत्त्वमितिव्यपदेशःशारीरश्चांशीतिभावनिवंधनंतत्त्वमाहु
।रतरेतुआदित्योआत्मेत्यादिवत्तत्जीवेब्रह्मत्वोपासनार्थस्तत्त्वमसीतिनिर्देशः।नतुवस्तुतत्त्वनिष्ठइत्याहुः।यद्वासआत्मातत्त्वमसीत्यत्रेयथा
विद्धापरछेदः।समर्थीतथापिशाङ्गोनित्यस्तत्रनित्ययदृष्टांतेनानित्यइतिचेदवत्त्रत्राविभिन्नशकुनिसूत्रादिदृष्टांतेरतदितिछेदः।नद्या
घवंहेसयथाशकुनिःसूत्रेणप्रबद्धइत्यनयोःशकुनिसूत्रयोःयथेलवणमेतदुदकइत्यादिनोक्तयोर्लवणोदकयोः।सप्रमेरुहषंसोम्यगं
धारेभ्यइत्यादिनोक्तयोःपुरुषगंधारदेशयोः।नवमेअपहार्षीत्स्तेयमकार्षीदित्यादिनोक्तयोःस्तेनापहार्ययोः—च्चैवं।स्तेनापहार्यदृष्टां

न्या. पा. ते हि स्पष्टं पेकात्म्यानि नो नर्थः। परकीयब्रह्मत्वाभिमानी हि स्तेनः; नतु विद्यमानब्रह्मत्वाज्ञानी न च सत्यानृताभिसंधिमात्रमिह विवक्षितं। तथात्वे सत्यानृ
१६४ त वाक्यदृष्टांतेन पूर्वैरपहार्षीत् स्तेयमकार्षीदित्यपहारदृष्टांतायोगात्। आद्यखंडे सुषुप्तिविषयेऽस्वमपीतो भवतीत्यत्र ब्रह्मणि स्वशब्दो न जी
वाभेदाभिप्रायः स्यात्। तेऽत्र स्वद इति प्रोक्त आत्मायं चाततत्वतः। ब्रह्माय गुणापूर्णत्वाद्भगवान्विष्णुरर्थे इति श्रुतेः। आत्मीयार्थत्वं से भवाद्वा अपीतो
भवतीत्यस्यापि तिरोहितः सन्प्राप्तो भवतीत्येवार्थः। नत्वभिन्न इति। अत्र पेरपिधानिरशाश्रुगतो निष्पापाश्चकर्त्रेरिशक्रेः; नु प्रत्वात् पेको योग
रूपोरभावाद्वा। पेकार्थत्वेऽप्यपीतइत्यस्य भवतेश्चाकर्मकत्वेन श्रुतद्वितीयायोगाद्वा। अश्रुततृतीयाकल्पनाप्रसंगाद्वा। स्वं कुलायं यथा
पीतः पक्षी स्यादेवमीश्वरं। अप्येति जीवः प्रस्थापेइत्तिस्मृतेश्च। यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः संहत्य पक्षौ सल्लयाया
पैव ध्रियत एवमेवायं पुरुष इति सुषुप्तिविषयपश्रुत्यंतरेऽपि श्येनदृष्टांतोक्तेश्च। प्राज्ञेनात्मना संपरिष्वक्त इति सुषुप्ते भेदश्रुतेश्च।
त्वन्मतेऽपि भेदपरे णसुषुप्त्याक्रांत्याभेदेनेति सूत्रेणाविरोधाद्वा। त्वत्पक्षेऽपि जागरणाद्यवस्थासु सावस्थाविद्यकजीवब्रह्मभेदस्य सत्त्वाद्वा। न
च द्वितीयखंडे नानात्ययानां वृक्षाणां रसानामित्यादिनोक्तानां नानावृक्षरसानां तत्तीवेद्रमाः सोम्येत्यादिनोक्तयोर्नदीसमुद्रयोश्चैके
शंक्यं। न हि नानावृक्षरसानामन्योन्यभेदत्यागेन प्राप्तिर्दृष्टेन मधुनैकमापद्यंते न वा प्राग्भेदभ्रांतिविषयाः पश्चात्तदविषयाः। किंतु तत्तद्वृ
क्षपदं अन्योन्यमित्रायचप्रागसिद्धं मधुत्वादवंति। न चेदं दार्ष्टांतिकानुगुणं। नदीसमुद्रदृष्टांतेऽपि किं नदीसमुद्रावयविनोरैक्यं किंवा तद राम
वयवजलानामैक्यं तद्व्यतिरेभः। नाद्यद्वितीयो। माषतश्चौपहि प्रमाषतदवयवानामिव क्षीरे प्रक्षिप्तनीरतदवयवानामिवात्यंतमिश्रीभा १६४

वेपिप्राग्भिन्ना नाम्नोयथ्वादेव्याद्योपा न्नाता एवापोद्देति तस्य समुद्रनिःशेषितत्वं तरति को मे पारं इदं कमेऊ त्तुस्या आयः स्विकमेऊ लोनिविद्विप्राः स्ता
एवं वसिष्ठोरन्नवानिद्गुक्तेऽस्त्रांसप्रनदी नामि श्रीमन्ता नामपविउ नर्दिगुत्स्यसमुद्रगमनदर्शनाच्च। यथोदकं समुद्रे समुद्रमासिक्तं तादृगेव भवती
ति सावधारणाश्रुतिविरोधाच्च। उदकं तद्के सिक्तं मिश्रमेव यथा भवेत् तान्नैव तदेव भवति यतो वृद्धिः प्रदृश्यत इति समुद्रेति कस्य ति विरोधाद्य
समुद्रे तु महत्त्वाद्वृद्ध्यदर्शने। एतावृत यो शीतो स्यवोः मधुरत्व लवणयोर्मल्लनेऊ भयगुणादर्शनाच। ताः समुद्रात्समुद्रमेवापियंतीति अवधि
त्वाद्विनिर्देशायोगाच्च। वावस्यति नापि अवस्थितेऽरीतिकाशक्ष्मस्मरतिमत्रे नदीसमुद्राभेदस्य निरस्तत्वाच्च। भेदास्ता नेतु क्षीरनीरयोरिवव्या
मिश्रतु तत्स्वर्त्ताताम्रादेरिव वमिश्रीभावापत्तेः। अत्वे न कस्यापि केनापि ऐक्यादर्शनाति कानानुगुणं च। ताः समुद्रात्समुद्रमेवापियंतिस
मुद्रसमुद्रएव भवतीत्यत्रापि प्रकृतनदी रूढिश्य समुद्रभवन विधाने तं तुल्ला ओदनेभवंतीत्यादि वत्ताः समुद्रएव भवंतीति स्यात्।
अतो न यः नियतजलराशिरूपात्खात रूपाद्वा देवतारूपाद्वा समुद्रात् उत्तिष्ठंति प्रविशंति च समुद्रस्तु समुद्रस्त्वस एव नेतासां समुद्र
त्वमिति वा स समुद्र एव न तु नदीत्वं प्राप्नोतीति वार्थः। तस्मात् सतोऽपि अभेदस्याता न एव रमौरद्धोतो। अत एव नो नार स वाक्ये
दाष्टीति केऽएवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति त इह व्याघ्रो वेति नदीसमुद्रवाक्येन
दार्ष्टान्तिके सर्वैमैत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वेति सतो भेदस्यात्ता नेनैवानर्थ उक्तः। न हि गृहे प्रविष्टस्य
गृहाद्आगतस्य वा तदैक्यं [illegible]। तस्मादृष्टान्तानुसारेण तत्त्वमसीति बोध उक्तः। तथा च श्रुत्यंतरे। यथा पश्यीवसन्तेवना नाच्छन्दः

न्याया०

१६५

पथ्या। पथ्यानघः समुद्रमुद्धो दल्लवरो यथा पथ्यास्तेनावहार्यैश्च यथा पुंविषयावपि तथा जीवेश्वरौ मित्रौ सर्वदेव विलक्षणा वित्तादिं ा

घे खंडे स्वप्नांतमेसौम्य विजानीहीति स्वातंत्र्यशंकानास्पदस्तु श्रुतिनिदर्शनेन चतुर्थे चास्य पदैकांशांखो जीवो ज्ञाहातीत्यादिनान्वय

व्यतिरेकौ त्वा अष्टमे च पुरुषं सौम्योपतापिनमित्यादिना स्वातंत्र्यशंकानास्पदमरणनिदर्शनेनेश्वराधीनत्वस्योक्तत्वात। अत

दित्येव छेदो युक्तः॥ एवं च वाक्यशेषानुसारेण मुख्यार्थस्यैव संभवे तद्विरुद्धानेकपदलक्षणा नैव युज्यते। चतुर्थखंडे अनेन

जीवेनात्मनानुप्रभूतः पेपियमानो मोदमानस्तिष्ठतीत्यत्र वज्जीवशब्द ईश्वरपरः मोदमान इति संसारित्वं पथ्युक्तेः॥ एतस्यैव सौम्य

षोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठतीत्यत्राणिमशब्दः परमसूक्ष्मेश्वरपरः। स एषोऽणिमैतदात्म्यमिदं सर्वमिति इहैव प्रतादीश्वरेतस्य

प्रयोगात। न तु परतीत्याद्यानापरः तासां किमत्र पश्यसीति अ एव्य इवे माधानाभगव इति भाव प्रत्ययरहितेन स्त्रीलिंगेन वकृतत्व

नांतेन इवशब्दशिरस्केन वाणुशब्देन निर्दिष्टत्वात तद्विपरीताणिमशब्दानर्हत्वात। न निभानं पसेदत्प क्ताद्दश्यत्वायोगाच्च। यदि चा

ष्टमे विदुषो ब्रह्मप्राप्तिमात्रे विवक्षितं तदा तस्य वाधन क्लिसंपद्यत इत्यादि तेनः परस्योदेवतायामित्येतमेव वाक्यं स्यात। तस्य पावन्न

वाधनक्लिसंपद्यते इत्यादि व्यर्थं। स्यातिश्च। यदा प्राणान्द्रदाती शस्तदा चेतनकोरिवत्तं। जानाति ग्रस्तकरणास्तेन वेत्ति न किंचनेति।

स आत्मेत्यत्र चैत्त अणिमशब्दोक्त ईश्वर आत्मा आतत इत्येवार्थः न तु जीवात्मेति। यदाप्नो नैवैति पदोदन्ते यद्वाति विषयानिहाय ब्रह्मस्पतं राम

तत्तो मायवसेनामेति हि मरणपतरतिभारतोक्तेः। तानुमानमतत्वदातप्राणप्रभृति तस्तत्रे तमेवैकं जानथ आत्मानमिति वाक्योक्तोमा १६५

जीवलक्षणचिदंशाभावादितित्वपायिसिद्धांतितत्वेनात्मशब्दस्यजीवेचमुख्यत्वाच्च।इमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याक
रोदित्यत्रापिजीवशब्देनस्वरूपमुच्यते।नतुसंसारीजीवइतिभगवतोनिरूढस्याख्येतिश्रुतेः।विश्वजीवसंज्ञोइतिप्रोक्तः।सततेप्राणधारणादितिस्मृ
तेश्चजीवेवियोगसंभवेनरूढिकल्पकाभावाच्च।अहहिजीवसंज्ञोवैस्वपिजीवः।ससाहितइतिमोक्षधर्मेभगवद्वचनाच्च।प्राणधारकत्वरूपनि
मित्तस्यैवाएवमुख्यत्वाच्च।संसारिणस्त्रिवृत्करणपूर्वकनामरूपात्मकप्रपंचकर्तृत्वायोगाच्च।तेजोबन्नानांतत्रैजन्यत्वेततआपपेदंत
इमास्तिस्रोदेवताइतिपूर्वमेवचेतनत्वसिद्धाउक्तजीवप्रवेशोक्त्ययोगाच्च।एकमेवाद्वितीयमित्युपक्रमः।एकविज्ञानेनसर्वविज्ञानेप्रागे
वव्याख्याता।नचैकस्याप्रसक्तेरततत्वमसीतिनिषेधायोगः।इष्टापूर्तंमन्यमानावरिष्ठमित्यादाविवश्रुतितात्पर्यापरिज्ञानेनवातदेकआहुरस
देवेदमग्रआसीदित्यादाविवानादिकुसमयेनवादेहेंद्रियादीन्प्रतिस्वातंत्र्यरूपस्येश्वरलक्षणस्यसर्वैरपिस्वात्मन्यभिमन्यमानत्वेनप्रसक्ते
णवाप्रसक्तस्यैकस्यनिषेधोपपत्तेः।एवंचैकमेवाद्वितीयमितिसमाभ्यधिकराहित्यस्योपक्रमात्।ऐतदात्म्यमितितस्यैवोपसंहारात्।अतत्व
मसीतिनवकृत्वोभ्यासात्।शास्त्रविनाशहेतुकगम्येश्वरभेदस्याप्रसक्तेरपूर्वत्वात्।अल्पसंपत्स्यतइतिफलश्रवणात्।येनाश्रुतंश्रुतंभवती
त्यर्थवादात्।शकुनिसूत्रादिदृष्टांतेहूपपादनात्।षड्विधतात्पर्यलिंगानिभेदपराण्येवेति॥ ॥तत्त्वमसिवाक्यार्थः॥ ॥सोहंब्रह्मास्मीत्या
द्यपिव्याख्यातः।उक्तरीत्याएकपदलक्षणया।ब्रह्मसाहचर्यादिनाजीवेब्रह्मेतिव्यपदेशस्यसादृश्यादिनाब्रह्मरूपहमितिव्यपदेशस्य
चोपपत्तेरुपदहृदयलक्षणयैकपरत्वायोगात्।किंचाहंशब्दोजीवांतर्यामिणिमुख्यः।सर्वांतर्यामिकोविष्णुः।सर्वनाम्नामभिधेयतोऽपि

